रामोपाख्यानम्
Rāmopākhyānam - The Story of Śrī Rāma in Mahābhārata

Dhruvil "Aveṣī" Dave

असतो मा सद्गमय।
तमसो मा ज्योतिर्गमय।
मृत्योर्मामृतं गमय॥
ॐ शान्तिः शान्तिः शान्तिः॥

Preface

श्रीगुरुभ्यो नमः।

नारायणं नमस्कृत्य नरं चैव नरोत्तमम्।
देवीं सरस्वतीं चैव ततो जयमुदीरयेत्॥

Once, amid the exile of the Pāṇḍavas, Draupadī was abducted by Jayadratha. She was brought back after having fought with Jayadratha and his army. They went to the sage Mārkaṇḍeya and mentioned the pain to him. Then, the sage narrated Rāma, Sītā, and Lakṣmaṇa's exile to Yudhiṣṭhira. While living in that forest, Sītā was abducted by the ten-headed demon Rāvaṇa. This is the story of Śrī Rāma's unparalleled deeds as told in the great epic of Mahābhārata by the seer Vedavyāsa.

This entire endeavour would be impossible without the help of Unicode Aware Saṃskṛta Transliteration (UAST). I dedicate this book to my parents, Tushar Dave and Pragna Dave, and my Guru, Prof. Shishir Saxena, who graced me with the knowledge of Saṃskṛta language and took me from the darkness of ignorance to the light of knowledge.

Contents

Preface i

Contents ii

०१ ०३ २५७ 1

०२ ०३ २५८ 9

०३ ०३ २५९ 21

०४ ०३ २६० 47

०५ ०३ २६१ 59

०६ ०३ २६२ 93

०७ ०३ २६३ 119

०८ ०३ २६४ 147

०९ ०३ २६५ 191

१० ०३ २६६ 211

११ ०३ २६७ 253

१२ ०३ २६८ 285

१३ ०३ २६९ 309

१४ ०३ २७० 319

१५ ०३ २७१ 337

१६ ०३ २७२ 355

१७ ०३ २७३ 373

१८ ०३ २७४ 395

१९ ०३ २७५ 415

२० ०३ २७६ 457

— ०१ —

०३ २५७

असतो मा सद्गमय।
तमसो मा ज्योतिर्गमय।
मृत्योर्मामृतं गमय॥
ॐ शान्तिः शान्तिः शान्तिः॥

०३ २५७ ००१

शास्त्र - *śāstra*

जनमेजय उवाच।
एवं हृतायां कृष्णायां प्राप्य क्लेशमनुत्तमम्।
अत ऊर्ध्वं नरव्याघ्राः किमकुर्वत पाण्डवाः॥

janamejaya uvāca.
evaṃ hṛtāyāṃ kṛṣṇāyāṃ prāpya kleśamanuttamam.
ata ūrdhvaṃ naravyāghrāḥ kimakurvata pāṇḍavāḥ..

अन्वय - *anvaya*

यदा कृष्णा द्रौपदी जयद्रथेन हृता तदा व्याघ्राः इव नराः पाण्डवाः अनुत्तमम् क्लेशम् प्राप्नुवन्। अतः ऊर्ध्वम् ते किम् अकुर्वत।

yadā kṛṣṇā draupadī jayadrathena hṛtā tadā vyāghrāḥ iva narāḥ pāṇḍavāḥ anuttamam kleśam prāpnuvan. ataḥ ūrdhvam te kim akurvata.

English Translation

Janamejaya said: Having obtained unparalleled excruciating pain from the abduction of Kṛṣṇā, what did the tiger amongst men, Pāṇḍavās do henceforth?

०३ २५७ ००२

शास्त्र - *śāstra*

वैशंपायन उवाच।
एवं कृष्णां मोक्षयित्वा विनिर्जित्य जयद्रथम्।
आसां चक्रे मुनिगणैर्धर्मराजो युधिष्ठिरः॥

vaiśaṃpāyana uvāca.
evaṃ kṛṣṇāṃ mokṣayitvā vinirjitya jayadratham.
āsāṃ cakre munigaṇairdharmarājo yudhiṣṭhiraḥ..

अन्वय - *anvaya*

पाण्डवैः द्रौपदी जयद्रथात् एवम् मुच्यते सः च पराजीयते। ततः पश्चात् धर्मराजः युधिष्ठिरः मुनिगणैः सह आसितः।

pāṇḍavaiḥ draupadī jayadrathāt evam mucyate saḥ ca parājīyate. tataḥ paścāt dharmarājaḥ yudhiṣṭhiraḥ munigaṇaiḥ saha āsitaḥ.

English Translation

Vaiśampāyana said: Thus, having freed Kṛṣṇā and having entirely defeated Jayadratha, the righteous king Yudhiṣṭhira sat with various sages.

०३ २५७ ००३

शास्त्र - *śāstra*

तेषां मध्ये महर्षीणां शृण्वतामनुशोचताम्।
मार्कण्डेयमिदं वाक्यमब्रवीत्पाण्डुनन्दनः॥

teṣāṃ madhye maharṣīṇāṃ śṛṇvatāmanuśocatām.
mārkaṇḍeyamidaṃ vākyamabravītpāṇḍunandanaḥ..

अन्वय - *anvaya*

महर्षयः अशृण्वत अन्वशोचन् च। तेषाम् मध्ये मार्कण्डेयः आसीत्। पाण्डुनन्दनः युधिष्ठिरः तम् अब्रवीत्।

maharṣayaḥ aśṛṇvata anvaśocan ca. teṣām madhye mārkaṇḍeyaḥ āsīt. pāṇḍunandanaḥ yudhiṣṭhiraḥ tam abravīt.

English Translation

Amid those great sages who were listening and mourning, Pāṇḍunandana said this to Mārkaṇḍeya.

०३ २५७ ००४

शास्त्र - *śāstra*

युधिष्ठिर उवाच।
मन्ये कालश्च बलवान्दैवं च विधिनिर्मितम्।
भवितव्यं च भूतानां यस्य नास्ति व्यतिक्रमः॥

yudhiṣṭhira uvāca.
manye kālaśca balavāndaivaṃ ca vidhinirmitam.
bhavitavyaṃ ca bhūtānāṃ yasya nāsti vyatikramaḥ..

अन्वय - *anvaya*

कालः बलवान्। ये देवैः निर्मिताः ते अपि विधिम् एव अनुरूपम् भवन्ति। यद् यद् भवितव्यम् तद् तद् एव भवेत्। भवितव्यात् व्यतिक्रमः न अस्ति। इति मन्ये।

kālaḥ balavān. ye devaiḥ nirmitāḥ te api vidhim eva anurūpam bhavanti. yad yad bhavitavyam tad tad eva bhavet. bhavitavyāt vyatikramaḥ na asti. iti manye.

English Translation

Yudhiṣṭhira said: I believe that time is powerful and that the divine will is created by destiny, and for everything in this world, there is no getting rid of that which should be.

०३ २५७ ००५

शास्त्र - *śāstra*

कथं हि पत्नीमस्माकं धर्मज्ञां धर्मचारिणीम्।
संस्पृशेदीदृशो भावः शुचिं स्तैन्यमिवानृतम्॥

kathaṃ hi patnīmasmākaṃ dharmajñāṃ dharmacāriṇīm.
saṃspṛśedīdṛśo bhāvaḥ śuciṃ stainyamivānṛtam..

अन्वय - *anvaya*

अस्माकम् पत्नी द्रौपदी धर्मज्ञा धर्मचारिणी शुचिः च अस्ति। कथम् ईदृशः स्तैन्यम् इव अनृतम् भावः ताम् संस्पृशेत्। किम् कारणात् सा हार्यते।

asmākam patnī draupadī dharmajñā dharmacāriṇī śuciḥ ca asti. katham īdṛśaḥ stainyam iva anṛtam bhāvaḥ tām saṃspṛśet. kim kāraṇāt sā hāryate.

English Translation

How shall such a wrong condition like theft touch our wife, who is pure, a knower, and a follower of righteousness?

०३ २५७ ००६

शास्त्र - *śāstra*

न हि पापं कृतं किंचित्कर्म वा निन्दितं क्वचित्।
द्रौपद्या ब्राह्मणेष्वेव धर्मः सुचरितो महान्॥

na hi pāpaṃ kṛtaṃ kiṃcitkarma vā ninditaṃ kvacit.
draupadyā brāhmaṇeṣveva dharmaḥ sucarito mahān..

अन्वय - *anvaya*

द्रौपदी किंचित् पापम् न कृतवती। द्रौपद्याः क्वचित् कर्मणः निन्दा न शक्नोति। तस्याः धर्मः महान्। ब्राह्मणेषु अपि एव सा सुचरिता।

draupadī kiṃcit pāpam na kṛtavatī. draupadyāḥ kvacit karmaṇaḥ nindā na śaknoti. tasyāḥ dharmaḥ mahān. brāhmaṇeṣu api eva sā sucaritā.

English Translation

Draupadī did nothing vicious or blamable. Amongst the Brāhmaṇas also, her way is excellent and well-conducted.

०३ २५७ ००७

शास्त्र - *śāstra*

तां जहार बलाद्राजा मूढबुद्धिर्जयद्रथः।
तस्याः संहरणात्प्राप्तः शिरसः केशवापनम्।
पराजयं च संग्रामे ससहायः समाप्तवान्॥

tāṃ jahāra balādrājā mūḍhabuddhirjayadrathaḥ.
tasyāḥ saṃharaṇātprāptaḥ śirasaḥ keśavāpanam.
parājayaṃ ca saṃgrāme sasahāyaḥ samāptavān..

अन्वय - *anvaya*

मूढबुद्धिः राजा जयद्रथः ताम् बलात् अहरत्। तस्मात् तस्य शिरसः केशान् आवपाम। संग्रामे जयद्रथम् ससहायान् च अजयाम।

mūḍhabuddhiḥ rājā jayadrathaḥ tām balāt aharat. tasmāt tasya śirasaḥ keśān āvapāma. saṃgrāme jayadratham sasahāyān ca ajayāma.

English Translation

Stupid King Jayadratha forcefully, against her own will, abducted her. As a result, the hair on his head was shaved off, and he was utterly defeated along with his aides in battle.

०३ २५७ ००८

शास्त्र - *śāstra*

प्रत्याहृता तथास्माभिर्हत्वा तत्सैन्धवं बलम्।
तद्दारहरणं प्राप्तमस्माभिरवितर्कितम्॥

pratyāhṛtā tathāsmābhirhatvā tatsaindhavaṃ balam.
taddāraharaṇaṃ prāptamasmābhiravitarkitam..

अन्वय - *anvaya*

यदा तद् सैन्धवम् बलम् अस्माभिः अहन्यामहि तदा द्रौपदी मुच्यते। अवितर्कितः अनुभवः प्राप्यामहि अस्माभिः हरणात् पत्न्याः।

yadā tad saindhavam balam asmābhiḥ ahanyāmahi tadā draupadī mucyate. avitarkitaḥ anubhavaḥ prāpyāmahi asmābhiḥ haraṇāt patnyāḥ.

English Translation

Having defeated the Saindhava army, she was freed from restraints. Due to the abduction of our wife, we obtained unforeseen experiences.

०३ २५७ ००९

शास्त्र - *śāstra*

दुःखश्चायं वने वासो मृगयायां च जीविका।
हिंसा च मृगजातीनां वनौकोभिर्वनौकसाम्।
ज्ञातिभिर्विप्रवासश्च मिथ्या व्यवसितैरयम्॥

duḥkhaścāyaṃ vane vāso mṛgayāyāṃ ca jīvikā.
hiṃsā ca mṛgajātīnāṃ vanaukobhirvanaukasām.
jñātibhirvipravāsaśca mithyā vyavasitairayam..

अन्वय - *anvaya*

वने वासः दुःखम्। वनस्य मृगयायाम् जीविका। हिंसा वनौकोभिः ज्ञातिभिः वनौकसाम् मृगजातीनाम्। अयम् विप्रवासः मिथ्या व्यवसितैः।

vane vāsaḥ duḥkham. vanasya mṛgayāyām jīvikā. hiṃsā vanaukobhiḥ jñātibhiḥ vanaukasām mṛgajātīnām. ayam vipravāsaḥ mithyā vyavasitaiḥ.

English Translation

There is misery in living in this forest, living by hunting, injury by people dwelling in the forest of the forest animals and birds, and staying away by false deceit.

०३ २५७ ०१०

शास्त्र - *śāstra*

अस्ति नूनं मया कश्चिदल्पभाग्यतरो नरः।
भवता दृष्टपूर्वो वा श्रुतपूर्वोऽपि वा भवेत्॥

asti nūnaṃ mayā kaścidalpabhāgyataro naraḥ.
bhavatā dṛṣṭapūrvo vā śrutapūrvo'pi vā bhavet..

अन्वय - *anvaya*

अपि दृष्टपूर्वः वा श्रुतपूर्वः अपि वा भवता कश्चित् नूनम् नरः अल्पभाग्यतरः मत् भवेत्।

api dṛṣṭapūrvaḥ vā śrutapūrvaḥ api vā bhavatā kaścit nūnam naraḥ alpabhāgyataraḥ mat bhavet.

English Translation

Which man would be indeed even less fortunate than me about whom you shall have seen or heard before?

— ०२ —

०३ २५८

असतो मा सद्गमय।
तमसो मा ज्योतिर्गमय।
मृत्योर्मामृतं गमय॥
ॐ शान्तिः शान्तिः शान्तिः॥

०३ २५८ ००१

शास्त्र - *śāstra*

मार्कण्डेय उवाच।
प्राप्तमप्रतिमं दुःखं रामेण भरतर्षभ।
रक्षसा जानकी तस्य हृता भार्या बलीयसा॥

mārkaṇḍeya uvāca.
prāptamapratimaṃ duḥkhaṃ rāmeṇa bharatarṣabha.
rakṣasā jānakī tasya hṛtā bhāryā balīyasā..

अन्वय - *anvaya*

भरतर्षभ युधिष्ठिर रामेण अप्रतिमम् दुःखम् प्राप्यत। रामस्य भार्या जानकी सीता बलीयसा रक्षसा रावणेन हृता। सीता जनकस्य आत्मजा तस्मात् तस्याः नाम जानकी।

bharatarṣabha yudhiṣṭhira rāmeṇa apratimam duḥkham prāpyata. rāmasya bhāryā jānakī sītā balīyasā rakṣasā rāvaṇena hṛtā. sītā janakasya ātmajā tasmāt tasyāḥ nāma jānakī.

English Translation

Mārkaṇḍeya said: O chief of Bharata! Rāma obtained unparalleled pain. His wife, Jānakī, was abducted by the stronger evil demon Rāvaṇa.

०३ २५८ ००२

शास्त्र - *śāstra*

आश्रमाद्राक्षसेन्द्रेण रावणेन विहायसा।
मायामास्थाय तरसा हत्वा गृध्रं जटायुषम्॥

āśramādrākṣasendreṇa rāvaṇena vihāyasā.
māyāmāsthāya tarasā hatvā gṛdhraṃ jaṭāyuṣam..

अन्वय - *anvaya*

रावणः इन्द्रः राक्षसानाम्। रावणेन आश्रमात् सीता हृता। सा ह्रियते मायया। सः जटायुषम् गृध्रम् हतवान्। रावणः सीताम् विहायसा तरसा अहरत्।

rāvaṇaḥ indraḥ rākṣasānām. rāvaṇena āśramāt sītā hṛtā. sā hriyate māyayā. saḥ jaṭāyuṣam gṛdhram hatavān. rāvaṇaḥ sītām vihāyasā tarasā aharat.

English Translation

She was kidnapped through the air swiftly from the hermitage by the king of demons, Rāvaṇa, having used illusions and killed the vulture Jaṭāyu.

०३ २५८ ००३

शास्त्र - *śāstra*

प्रत्याजहार तां रामः सुग्रीवबलमाश्रितः।
बद्ध्वा सेतुं समुद्रस्य दग्ध्वा लङ्कां शितैः शरैः॥

pratyājahāra tāṃ rāmaḥ sugrīvabalamāśritaḥ.
baddhvā setuṃ samudrasya dagdhvā laṅkāṃ śitaiḥ śaraiḥ..

अन्वय - *anvaya*

रामः सीताम् प्रत्याहरत्। सः सुग्रीवस्य बलेन आश्रितः। ते समुद्रस्य सेतुम् बद्धवन्तः लङ्काम् च शितैः शरैः अदहन्। रावणः राजा लङ्कायाः।

rāmaḥ sītām pratyāharat. saḥ sugrīvasya balena āśritaḥ. te samudrasya setum baddhavantaḥ laṅkām ca śitaiḥ śaraiḥ adahan. rāvaṇaḥ rājā laṅkāyāḥ.

English Translation

Having built a bridge over the sea and burning Laṅkā with sharp arrows, Rāma freed her with the help of the army of Sugrīva.

०३ २५८ ००४

शास्त्र - *śāstra*

युधिष्ठिर उवाच।
कस्मिन्नामः कुले जातः किंवीर्यः किंपराक्रमः।
रावणः कस्य वा पुत्रः किं वैरं तस्य तेन ह॥

yudhiṣṭhira uvāca.
kasminrāmaḥ kule jātaḥ kiṃvīryaḥ kiṃparākramaḥ.
rāvaṇaḥ kasya vā putraḥ kiṃ vairaṃ tasya tena ha..

अन्वय - *anvaya*

कस्मिन् कुले रामः जातः। सः वीर्यः किम्। सः पराक्रमः किम्। रावणः कस्य पुत्रः। रावणस्य रामेण वैरम् किम्। किम् कारणेन रावणः रामस्य भार्याम् सीताम् अहरत्।

kasmin kule rāmaḥ jātaḥ. saḥ vīryaḥ kim. saḥ parākramaḥ kim. rāvaṇaḥ kasya putraḥ. rāvaṇasya rāmeṇa vairam kim. kim kāraṇena rāvaṇaḥ rāmasya bhāryām sītām aharat.

English Translation

Yudhiṣṭhira said: In which family was Rāma born? What were his deeds and strengths? Whose son was Rāvaṇa, and what was his enmity with Rāma?

०३ २५८ ००५

शास्त्र - *śāstra*

एतन्मे भगवन्सर्वं सम्यगाख्यातुमर्हसि।
श्रोतुमिच्छामि चरितं रामस्याक्लिष्टकर्मणः॥

etanme bhagavansarvaṃ samyagākhyātumarhasi.
śrotumicchāmi caritaṃ rāmasyākliṣṭakarmaṇaḥ..

अन्वय - *anvaya*

भगवन् रामस्य अक्लिष्टकर्मणः सम्पूर्णम् कथाम् श्रोतुम् इच्छामि। एतत् विवरणम् कुरु।

bhagavan rāmasya akliṣṭakarmaṇaḥ sampūrṇam kathām śrotum icchāmi. etat vivaraṇam kuru.

English Translation

O Lord! Could you please tell me the entirety of this? I desire to hear the deeds of the unparalleled acts of Rāma.

०३ २५८ ००६

शास्त्र - *śāstra*

मार्कण्डेय उवाच।
अजो नामाभवद्राजा महानिक्ष्वाकुवंशजः।
तस्य पुत्रो दशरथः शश्वत्स्वाध्यायवाञ्शुचिः॥

mārkaṇḍeya uvāca.
ajo nāmābhavadrājā mahānikṣvākuvaṃśajaḥ.
tasya putro daśarathaḥ śaśvatsvādhyāyavāñśuciḥ..

अन्वय - *anvaya*

अजः नाम महान् राजा अभवत्। सः इक्ष्वाकोः वंशजः। अजस्य पुत्रः शश्वत् स्वाध्यायवान् शुचिः दशरथः।

ajaḥ nāma mahān rājā abhavat. saḥ ikṣvākoḥ vaṃśajaḥ. ajasya putraḥ śaśvat svādhyāyavān śuciḥ daśarathaḥ.

English Translation

Mārkaṇḍeya said: There was a great king named Aja who was the descendant of Ikṣvāku. His son was Daśaratha, a pure and continuous student of the Vedas.

०३ २५८ ००७

शास्त्र - *śāstra*

अभवंस्तस्य चत्वारः पुत्रा धर्मार्थकोविदाः।
रामलक्ष्मणशत्रुघ्ना भरतश्च महाबलः॥

abhavaṃstasya catvāraḥ putrā dharmārthakovidāḥ.
rāmalakṣmaṇaśatrughnā bharataśca mahābalaḥ..

अन्वय - *anvaya*

दशरथस्य चत्वारः पुत्राः अभवन्। तेषाम् नामानि रामः लक्ष्मणः भरतः शत्रुघ्नः च। भरतः महाबलः। ते धर्मस्य अर्थस्य च ज्ञातारः।

daśarathasya catvāraḥ putrāḥ abhavan. teṣām nāmāni rāmaḥ lakṣmaṇaḥ bharataḥ śatrughnaḥ ca. bharataḥ mahābalaḥ. te dharmasya arthasya ca jñātāraḥ.

English Translation

Of him, there were four sons, Rāma, Lakṣmaṇa, the mighty Bharata, and Śatrughna, who were learned in religious merit and wealth.

०३ २५८ ००८

शास्त्र - *śāstra*

रामस्य माता कौसल्या कैकेयी भरतस्य तु।
सुतौ लक्ष्मणशत्रुघ्नौ सुमित्रायाः परंतपौ॥

rāmasya mātā kausalyā kaikeyī bharatasya tu.
sutau lakṣmaṇaśatrughnau sumitrāyāḥ paraṃtapau..

अन्वय - *anvaya*

दशरथस्य तिस्रः भार्याः। तासाम् नामानि कौसल्या कैकेयी सुमित्रा च। रामस्य माता कौसल्या। भरतस्य मात कैकेयी। लक्ष्मणस्य शत्रुघ्नस्य माता सुमित्रा। लक्ष्मणः शत्रुघ्नः च परंतपौ।

daśarathasya tisraḥ bhāryāḥ. tāsām nāmāni kausalyā kaikeyī sumitrā ca. rāmasya mātā kausalyā. bharatasya māta kaikeyī. lakṣmaṇasya śatrughnasya mātā sumitrā. lakṣmaṇaḥ śatrughnaḥ ca paraṃtapau.

English Translation

Kausalyā is the mother of Rāma. Kaikeyī is the mother of Bharata. The destroyer of enemies, Lakṣmaṇa and Śatrughna, are sons of Sumitrā.

०३ २५८ ००९

शास्त्र - *śāstra*

विदेहराजो जनकः सीता तस्यात्मजा विभो।
यां चकार स्वयं त्वष्टा रामस्य महिषीं प्रियाम्॥

videharājo janakaḥ sītā tasyātmajā vibho.
yāṃ cakāra svayaṃ tvaṣṭā rāmasya mahiṣīṃ priyām..

अन्वय - *anvaya*

विभो युधिष्ठिर विदेहस्य राजा जनकः। सीता तस्य आत्मजा। तस्मात् सा वैदेही। त्वष्टा स्वयम् ताम् चकार। सीता रामस्य महिषी। सीता रामस्य प्रियतमा।

vibho yudhiṣṭhira videhasya rājā janakaḥ. sītā tasya ātmajā. tasmāt sā vaidehī. tvaṣṭā svayam tām cakāra. sītā rāmasya mahiṣī. sītā rāmasya priyatamā.

English Translation

O King! Sītā is the daughter of the king of Videha, Janaka. The creator itself made her. She was the beloved and the queen of Rāma.

०३ २५८ ०१०

शास्त्र - *śāstra*

एतद्रामस्य ते जन्म सीतायाश्च प्रकीर्तितम्।
रावणस्यापि ते जन्म व्याख्यास्यामि जनेश्वर॥

etadrāmasya te janma sītāyāśca prakīrtitam.
rāvaṇasyāpi te janma vyākhyāsyāmi janeśvara..

अन्वय - *anvaya*

जनेश्वर युधिष्ठिर रामस्य सीतायाः च जन्मौ त्वया श्रुतौ। रावणस्य जन्मः अपि अहम् वदिष्यामि।

janeśvara yudhiṣṭhira rāmasya sītāyāḥ ca janmau tvayā śrutau. rāvaṇasya janmaḥ api aham vadiṣyāmi.

English Translation

O Lord of the people! The births of Rāma and Sītā were mentioned to you. I will tell you the birth of Rāvaṇa also.

०३ २५८ ०११

शास्त्र - *śāstra*

पितामहो रावणस्य साक्षाद्देवः प्रजापतिः।
स्वयंभूः सर्वलोकानां प्रभुः स्रष्टा महातपाः॥

pitāmaho rāvaṇasya sākṣāddevaḥ prajāpatiḥ.
svayaṃbhūḥ sarvalokānāṃ prabhuḥ sraṣṭā mahātapāḥ..

अन्वय - *anvaya*

रावणस्य पितामहः साक्षात् देवः प्रजापतिः। सः स्वयम्भुः सर्वलोकानां प्रभुः स्रष्टा महातपाः।

rāvaṇasya pitāmahaḥ sākṣāt devaḥ prajāpatiḥ. saḥ svayambhuḥ sarvalokānāṃ prabhuḥ sraṣṭā mahātapāḥ.

English Translation

Rāvaṇa's grandfather is the lord of all the worlds, self-existent, creator, Lord Prajāpati himself.

०३ २५८ ०१२

शास्त्र - *śāstra*

पुलस्त्यो नाम तस्यासीन्मानसो दयितः सुतः।
तस्य वैश्रवणो नाम गवि पुत्रोऽभवत्प्रभुः॥

pulastyo nāma tasyāsīnmānaso dayitaḥ sutaḥ.
tasya vaiśravaṇo nāma gavi putro'bhavatprabhuḥ..

अन्वय - *anvaya*

तस्य पुलस्त्यः नाम मानसः दयितः सुतः आसीत्। सः ब्रह्मणः मानसः दयितः सुतः। पुलस्त्यस्य वैश्रवणः नाम गविपुत्रः अभवत्।

tasya pulastyaḥ nāma mānasaḥ dayitaḥ sutaḥ āsīt. saḥ brahmaṇaḥ mānasaḥ dayitaḥ sutaḥ. pulastyasya vaiśravaṇaḥ nāma gaviputraḥ abhavat.

English Translation

He had a beloved mind-born son Pulastya. Pulastya had a powerful cow-born son named Vaiśravaṇa.

०३ २५८ ०१३

शास्त्र - *śāstra*

पितरं स समुत्सृज्य पितामहमुपस्थितः।
तस्य कोपात्पिता राजन्ससर्जात्मानमात्मना॥

pitaraṃ sa samutsṛjya pitāmahamupasthitaḥ.
tasya kopātpitā rājansasarjātmānamātmanā..

अन्वय - *anvaya*

वैश्रवणः पितरम् समुतसृजत्। सः पितामहम् उपस्थितः। राजन् तस्मात् कोपात् पिता पुलस्त्यः आत्मानम् आत्मना असृजत्।

vaiśravaṇaḥ pitaram samutasṛjat. saḥ pitāmaham upasthitaḥ. rājan tasmāt kopāt pitā pulastyaḥ ātmānam ātmanā asṛjat.

English Translation

Having abandoned his father, Vaiśravaṇa approached his grandfather. O King! His father, from anger, created another life by himself.

०३ २५८ ०१४

शास्त्र - *śāstra*

स जज्ञे विश्रवा नाम तस्यात्मार्धेन वै द्विजः।
प्रतीकाराय सक्रोधस्ततो वैश्रवणस्य वै॥

sa jajñe viśravā nāma tasyātmārdhena vai dvijaḥ.
pratīkārāya sakrodhastato vaiśravaṇasya vai..

अन्वय - *anvaya*

ततः सक्रोधः पुलस्त्यः वैश्रवणस्य प्रतीकाराय आत्मार्धेन जज्ञे। तस्य द्विजस्य नाम विश्रवाः।

tataḥ sakrodhaḥ pulastyaḥ vaiśravaṇasya pratīkārāya ātmārdhena jajñe. tasya dvijasya nāma viśravāḥ.

English Translation

Therefore, he was born, angrily with the other-born half, for Vaiśravaṇa's revenge, whose name was Viśravas.

०३ २५८ ०१५

शास्त्र - *śāstra*

पितामहस्तु प्रीतात्मा ददौ वैश्रवणस्य ह।
अमरत्वं धनेशत्वं लोकपालत्वमेव च॥

pitāmahastu prītātmā dadau vaiśravaṇasya ha.
amaratvaṃ dhaneśatvaṃ lokapālatvameva ca..

अन्वय - *anvaya*

वैश्रवणस्य तु प्रीतात्मा पितामहः अमरत्वम् धनेशत्वम् लोकपालत्वम् एव च दत्तवान्।

vaiśravaṇasya tu prītātmā pitāmahaḥ amaratvam dhaneśatvam lokapālatvam eva ca dattavān.

English Translation

But the pleased grandfather of Vaiśravaṇa granted immortality, the superiority of wealth, and certainly guardianship of the world.

०३ २५८ ०१६

शास्त्र - *śāstra*

ईशानेन तथा सख्यं पुत्रं च नलकूबरम्।
राजधानीनिवेशं च लङ्कां रक्षोगणान्विताम्॥

īśānena tathā sakhyaṃ putraṃ ca nalakūbaram.
rājadhānīniveśaṃ ca laṅkāṃ rakṣogaṇānvitām..

अन्वय - *anvaya*

पितामहः रुद्रेण ईशानेन सख्यम् ददौ। नलकूबरम् नाम पुत्रम् ददौ। लङ्काम् ददौ। सा लङ्का रक्षोगणाः अन्विता। विश्रवणः लङ्कायाम् राजधान्याम् अवसत्।

pitāmahaḥ rudreṇa īśānena sakhyam dadau. nalakūbaram nāma putram dadau. laṅkām dadau.

sā laṅkā rakṣogaṇāḥ anvitā. viśravaṇaḥ laṅkāyām rājadhānyām avasat.

English Translation

Also, friendship with Īśāna, a son named Nalakūbara, and living in Laṅkā capital filled with many kinds of Rākṣasas.

— ०३ —

०३ २५९

असतो मा सद्गमय।
तमसो मा ज्योतिर्गमय।
मृत्योर्मामृतं गमय॥
ॐ शान्तिः शान्तिः शान्तिः॥

०३ २५९ ००१

शास्त्र - *śāstra*

मार्कण्डेय उवाच।
पुलस्त्यस्य तु यः क्रोधादर्धदेहोऽभवन्मुनिः।
विश्रवा नाम सक्रोधः स वैश्रवणमैक्षत॥

mārkaṇḍeya uvāca.
pulastyasya tu yaḥ krodhādardhadeho'bhavanmuniḥ.
viśravā nāma sakrodhaḥ sa vaiśravaṇamaikṣata..

अन्वय - *anvaya*

यः पुलस्त्यस्य क्रोधात् अर्धदेहः विश्रवाः नाम मुनिः अभवत् सः सक्रोधः वैश्रवणम् ऐक्षत।

yaḥ pulastyasya krodhāt ardhadehaḥ viśravāḥ nāma muniḥ abhavat saḥ sakrodhaḥ vaiśravaṇam aikṣata.

English Translation

Mārkaṇḍeya said: That sage named Viśravas, who was born from the anger of Pulastya, saw Vaiśravaṇa angrily.

०३ २५९ ००२

शास्त्र - *śāstra*

बुबुधे तं तु सक्रोधं पितरं राक्षसेश्वरः।
कुबेरस्तत्प्रसादार्थं यतते स्म सदा नृप॥

bubudhe taṃ tu sakrodhaṃ pitaraṃ rākṣaseśvaraḥ.
kuberastatprasādārthaṃ yatate sma sadā nṛpa..

अन्वय - *anvaya*

वैश्रवणः राक्षसानाम् ईश्वरः। सः पितुः विश्रवसः क्रोधम् बुबुधे। वैश्रवणः कुबेरः आसीत्। नृप युधिष्ठिर कुबेरः सदा विश्रवसः प्रसादाम् ऐच्छत्। सः सदा तम् प्रसादम् यतते स्म।

vaiśravaṇaḥ rākṣasānām īśvaraḥ. saḥ pituḥ viśravasaḥ krodham bubudhe. vaiśravaṇaḥ kuberaḥ āsīt. nṛpa yudhiṣṭhira kuberaḥ sadā viśravasaḥ prasādām aicchat. saḥ sadā tam prasādam yatate sma.

English Translation

The king of demons knew of his father's anger. O King! Vaiśravaṇa, who is Kubera, always strived for his father's favour.

०३ २५९ ००३

शास्त्र - *śāstra*

स राजराजो लङ्कायां निवसन्नरवाहनः।
राक्षसीः प्रददौ तिस्रः पितुर्वै परिचारिकाः॥

sa rājarājo laṅkāyāṃ nivasannaravāhanaḥ.
rākṣasīḥ pradadau tisraḥ piturvai paricārikāḥ..

अन्वय - *anvaya*

सः नरवाहनः राजराजः कुबेरः। सः लङ्कायाम् अवसत्। सः तिस्रः राक्षसीः परिचारिकाः पित्रे प्रददौ। सः पितुः प्रसादार्थाय परिचारिकाः प्रददौ।

saḥ naravāhanaḥ rājarājaḥ kuberaḥ. saḥ laṅkāyām avasat. saḥ tisraḥ rākṣasīḥ paricārikāḥ pitre pradadau. saḥ pituḥ prasādārthaāya paricārikāḥ pradadau.

English Translation

He, who lives in Laṅkā, where people carry the king of kings, gave away three demonic maids to his father.

०३ २५९ ००४

शास्त्र - *śāstra*

तास्तदा तं महात्मानं संतोषयितुम् उद्यताः।
ऋषिं भरतशार्दूल नृत्तगीतविशारदाः॥

tāstadā taṃ mahātmānaṃ saṃtoṣayitum udyatāḥ.
ṛṣiṃ bharataśārdūla nṛttagītaviśāradāḥ..

अन्वय - *anvaya*

युधिष्ठिरः भरतेषु शार्दुलः। याः परिचारिकाः प्रादीयन्त पित्रे विश्रवणेन ताः नृत्यस्य संगीतस्य च विशारदाः। भरतशार्दुल ताः परिचारिकाः ऋषिम् पितरम् संतोषयितुम् उद्यताः।

yudhiṣṭhiraḥ bharateṣu śārdulaḥ. yāḥ paricārikāḥ prādīyanta pitre viśravaṇena tāḥ nṛtyasya saṃgītasya ca viśāradāḥ. bharataśārdula tāḥ paricārikāḥ ṛṣim pitaram saṃtoṣayitum udyatāḥ.

English Translation

O tiger amongst Bharatas! Those skilled in dancing and singing presented to please the great Ṛṣi.

०३ २५९ ००५

शास्त्र - *śāstra*

पुष्पोत्कटा च राका च मालिनी च विशां पते।
अन्योन्यस्पर्धया राजञ्श्रेयस्कामाः सुमध्यमाः॥

puṣpotkaṭā ca rākā ca mālinī ca viśāṃ pate.
anyonyaspardhayā rājañśreyaskāmāḥ sumadhyamāḥ..

अन्वय - *anvaya*

विशाम् पते राजन् युधिष्ठिर ताः नामानि पुष्पोत्कटा राका मालिनी च आसन्। ताः परस्पराभ्यः स्पर्धयाः श्रेयस्कामाः सुमध्यमाः च आसन्।

viśām pate rājan yudhiṣṭhira tāḥ nāmāni puṣpotkaṭā rākā mālinī ca āsan. tāḥ parasparābhyaḥ spardhayāḥ śreyaskāmāḥ sumadhyamāḥ ca āsan.

English Translation

O King! O Lord of the merchants! Puṣpotkaṭā, Rākā, and Mālinī were desirous of prosperity and graceful from the competition with each other.

०३ २५९ ००६

शास्त्र - *śāstra*

तासां स भगवांस्तुष्टो महात्मा प्रददौ वरान्।
लोकपालोपमान्पुत्रानेकैकस्या यथेप्सितान्॥

tāsāṃ sa bhagavāṃstuṣṭo mahātmā pradadau varān.
lokapālopamānputrānekaikasyā yathepsitān..

अन्वय - *anvaya*

सः एकैकस्याः तासाम् तुष्टः भगवान् महात्मा वरान् लोकपालोपमान् यथेप्सितान् पुत्रान् प्रददौ।

saḥ ekaikasyāḥ tāsām tuṣṭaḥ bhagavān mahātmā varān lokapālopamān yathepsitān putrān pradadau.

English Translation

That great soul, pleased with them, one by one gave the best world-protector sons as they desired.

०३ २५९ ००७

शास्त्र - *śāstra*

पुष्पोत्कटायां जज्ञाते द्वौ पुत्रौ राक्षसेश्वरौ।
कुम्भकर्णदशग्रीवौ बलेनाप्रतिमौ भुवि॥

puṣpotkaṭāyāṃ jajñāte dvau putrau rākṣaseśvarau.
kumbhakarṇadaśagrīvau balenāpratimau bhuvi..

अन्वय - *anvaya*

पुष्पोत्कटायाः द्वौ पुत्रौ अभवताम्। तयोः नामनी कुम्भकर्णः दशग्रीवः च। भुवि बलेन अप्रतिमौ तौ। तौ राक्षसेश्वरौ।

puṣpotkaṭāyāḥ dvau putrau abhavatām. tayoḥ nāmanī kumbhakarṇaḥ daśagrīvaḥ ca. bhuvi balena apratimau tau. tau rākṣaseśvarau.

English Translation

Two demonic sons with unparalleled strength on this earth, Kumbhakarṇa and Daśagrīva, were born from Puṣpotkaṭā.

०३ २५९ ००८

शास्त्र - *śāstra*

मालिनी जनयामास पुत्रमेकं विभीषणम्।
राकायां मिथुनं जज्ञे खरः शूर्पणखा तथा॥

mālinī janayāmāsa putramekaṃ vibhīṣaṇam.
rākāyāṃ mithunaṃ jajñe kharaḥ śūrpaṇakhā tathā..

अन्वय - *anvaya*

विभीषणः पुत्रः मालिन्याः। खरः राकायाम् पुत्रः शूर्पणखा च पुत्री।

vibhīṣaṇaḥ putraḥ mālinyāḥ. kharaḥ rākāyām putraḥ śūrpaṇakhā ca putrī.

English Translation

Mālinī birthed a son named Vibhīṣaṇa. Similarly, Rākā birthed a pair, Khara and Śūrpaṇkhā.

०३ २५९ ००९

शास्त्र - *śāstra*

विभीषणस्तु रूपेण सर्वेभ्योऽभ्यधिकोऽभवत्।
स बभूव महाभागो धर्मगोप्ता क्रियारतिः॥

vibhīṣaṇastu rūpeṇa sarvebhyo'bhyadhiko'bhavat.
sa babhūva mahābhāgo dharmagoptā kriyāratiḥ..

अन्वय - *anvaya*

विभीषणः रूपेण सर्वेभ्यः अभ्यधिकः अभवत्। सः महाभागः धर्मगोप्ता क्रियायाम् रतिः बभूव।

vibhīṣaṇaḥ rūpeṇa sarvebhyaḥ abhyadhikaḥ abhavat.
saḥ mahābhāgḥ dharmagoptā kriyāyām ratiḥ babhūva.

English Translation

Vibhīṣaṇa was the best of all by appearance. He was highly fortunate, a protector of righteousness, and one who found pleasure in work.

०३ २५९ ०१०

शास्त्र - *śāstra*

दशग्रीवस्तु सर्वेषां ज्येष्ठो राक्षसपुंगवः।
महोत्साहो महावीर्यो महासत्त्वपराक्रमः॥

daśagrīvastu sarveṣāṃ jyeṣṭho rākṣasapuṃgavaḥ.
mahotsāho mahāvīryo mahāsattvaparākramaḥ..

अन्वय - *anvaya*

दशग्रीवः सर्वेषाम् ज्येष्ठः राक्षसानाम् पुंगवः महोत्साहः महावीर्यः महासत्त्वपराक्रमः आसीत्।

daśagrīvaḥ sarveṣām jyeṣṭhaḥ rākṣasānām puṃgavaḥ
mahotsāhaḥ mahāvīryaḥ mahāsattvaparākramaḥ āsīt.

English Translation

Daśagrīva was the eldest of all, the chief of demons, one who was very strong, very powerful, and one who was of noble character and heroism.

०३ २५९ ०११

शास्त्र - *śāstra*

कुम्भकर्णो बलेनासीत्सर्वेभ्योऽभ्यधिकस्तदा।
मायावी रणशौण्डश्च रौद्रश्च रजनीचरः॥

kumbhakarṇo balenāsītsarvebhyo'bhyadhikastadā.
māyāvī raṇaśauṇḍaśca raudraśca rajanīcaraḥ..

अन्वय - *anvaya*

कुम्भकर्णः बलेन सर्वेभ्यः अभ्यधिकः आसीत्। सः मायावी रणशौण्डः रौद्रः रजनीचरः आसीत्।

kumbhakarṇaḥ balena sarvebhyaḥ abhyadhikaḥ āsīt.
saḥ māyāvī raṇaśauṇḍaḥ raudraḥ rajanīcaraḥ āsīt.

English Translation

Kumbhakarṇa was the strongest of them all. He possessed magical powers, was skilled in war, fierce, and was a night-watcher.

०३ २५९ ०१२

शास्त्र - *śāstra*

खरो धनुषि विक्रान्तो ब्रह्मद्विट्पिशिताशनः।
सिद्धविघ्नकरी चापि रौद्रा शूर्पणखा तथा॥

kharo dhanuṣi vikrānto brahmadviṭpiśitāśanaḥ.
siddhavighnakarī cāpi raudrā śūrpaṇakhā tathā..

अन्वय - *anvaya*

खरः धनुषि विक्रान्तः। सः ब्रह्मणः अद्वेट्। सः पिशितानि अखादत्। शूर्पणखा सिद्धस्य विघ्नकरी रौद्रा च आसीत्।

kharaḥ dhanuṣi vikrāntaḥ. saḥ brahmaṇaḥ adveṭ. saḥ piśitāni akhādat. śūrpaṇakhā siddhasya vighnakarī raudrā ca āsīt.

English Translation

Khara was a Brāhman-hating, flesh-eating, excellent archer. Śūrpaṇakhā was angry and would create obstacles to achievements.

०३ २५९ ०१३

शास्त्र - *śāstra*

सर्वे वेदविदः शूराः सर्वे सुचरितव्रताः।
ऊषुः पित्रा सह रता गन्धमादनपर्वते॥

sarve vedavidaḥ śūrāḥ sarve sucaritavratāḥ.
ūṣuḥ pitrā saha ratā gandhamādanaparvate..

अन्वय - *anvaya*

यद्यपि सर्वे राक्षसीकुले जायन्ते तथापि ते सर्वे वेदविदः सुचरितव्रताः शूराः च आसन्। ते पित्रा सह अवसन्। ते गन्धमादने नाम्नि पर्वते रताः।

yadyapi sarve rākṣasīkule jāyante tathāpi te sarve vedavidaḥ sucaritavratāḥ śūrāḥ ca āsan. te pitrā saha avasan. te gandhamādane nāmni parvate ratāḥ.

English Translation

They were all well-versed in Vedas, fearless warriors, and well-mannered. They lived with their father and were addicted to the fragrances of the Gandhamādana mountain.

०३ २५९ ०१४

शास्त्र - *śāstra*

ततो वैश्रवणं तत्र ददृशुर्नरवाहनम्।
पित्रा सार्धं समासीनमृद्ध्या परमया युतम्॥

tato vaiśravaṇaṃ tatra dadṛśurnaravāhanam.
pitrā sārdhaṃ samāsīnamṛddhyā paramayā yutam..

अन्वय - *anvaya*

ततः सर्वे नरवाहनम् कुबेरम् वैश्रवणम् तत्र गन्धमादने पर्वते अपश्यन्। सः पित्रा विश्रवसे सार्धम् समासीनम्। सः परमया ऋद्धया सह आसीत्।

tataḥ sarve naravāhanam kuberam vaiśravaṇam tatra gandhamādanae parvate apaśyan. saḥ pitrā viśravase sārdham samāsīnam. saḥ paramayā ṛddhayā saha āsīt.

English Translation

After that, they saw Vaiśravaṇa, the one carried by people, joined with a lot of wealth, sitting together with their father.

०३ २५९ ०१५

शास्त्र - *śāstra*

जातस्पर्धास्ततस्ते तु तपसे धृतनिश्चयाः।
ब्रह्माणं तोषयामासुर्घोरेण तपसा तदा॥

jātaspardhāstataste tu tapase dhṛtaniścayāḥ.
brahmāṇaṃ toṣayāmāsurghoreṇa tapasā tadā..

अन्वय - *anvaya*

ततः ते स्पर्धायाः तपसे धृतनिश्चयाः। तदा ते घोरेण तपसा ब्रह्माणम् तोषयामासुः।

tataḥ te spardhāyāḥ tapase dhṛtaniścayāḥ. tadā te ghoreṇa tapasā brahmāṇam toṣayāmāsuḥ.

English Translation

Therefore, they, firmly resolute for penance and envious, pleased Lord Brahmā with terrific penance.

०३ २५९ ०१६

शास्त्र - *śāstra*

अतिष्ठदेकपादेन सहस्रं परिवत्सरान्।
वायुभक्षो दशग्रीवः पञ्चाग्निः सुसमाहितः॥

atiṣṭhadekapādena sahasraṃ parivatsarān.
vāyubhakṣo daśagrīvaḥ pañcāgniḥ susamāhitaḥ..

अन्वय - *anvaya*

दशग्रीवः एकपादेन सहस्रम् परिवत्सरान् वायुभक्षः पञ्चाग्निः सुसमाहितः अतिष्ठत्।

daśagrīvaḥ ekapādena sahasram parivatsarān vāyubhakṣaḥ pañcāgniḥ susamāhitaḥ atiṣṭhat.

English Translation

Daśagrīva, absolutely focused, stood on one leg for a thousand years while living only on air and maintaining the five sacred fires.

०३ २५९ ०१७

शास्त्र - *śāstra*

अधःशायी कुम्भकर्णो यताहारो यतव्रतः।
विभीषणः शीर्णपर्णमेकमभ्यवहारयत्॥

adhaḥśāyī kumbhakarṇo yatāhāro yatavrataḥ.
vibhīṣaṇaḥ śīrṇaparṇamekamabhyavahārayat..

अन्वय - *anvaya*

कुम्भकर्णः अधःशायी यताहारः यतव्रतः। विभीषणः तपोऽर्थाय एकम् शीर्णपर्णस्य पत्रम् एव अखादत्।

kumbhakarṇaḥ adhaḥśāyī yatāhāraḥ yatavrataḥ. vibhīṣaṇaḥ tapo'rthāya ekam śīrṇaparṇasya patram eva akhādat.

English Translation

Kumbhakarṇa slept down and restrained his food for observation of his vows. Vibhīṣaṇa ate only a single Neem leaf.

०३ २५९ ०१८

शास्त्र - *śāstra*

उपवासरतिर्धीमान्सदा जप्यपरायणः।
तमेव कालमातिष्ठत्तीव्रं तप उदारधीः॥

upavāsaratirdhīmānsadā japyaparāyaṇaḥ.
tameva kālamātiṣṭhattīvraṃ tapa udāradhīḥ..

अन्वय - *anvaya*

धीमान् विभीषणः सदा जप्याय परायणः। सः उपवासे रतिः। उदारधीः सः आतिष्ठत् तीव्रम् कालम् तपः।

dhīmān vibhīṣaṇaḥ sadā japyāya parāyaṇaḥ. saḥ upavāse ratiḥ. udāradhīḥ saḥ ātiṣṭhat tīvram kālam tapaḥ.

English Translation

The intelligent Vibhīṣaṇa was always wholly devoted to the muttered prayers and found pleasure in fasting. He was engrossed in excessively long penance for that time.

०३ २५९ ०१९

शास्त्र - *śāstra*

खरः शूर्पणखा चैव तेषां वै तप्यतां तपः।
परिचर्यां च रक्षां च चक्रतुर्हृष्टमानसौ॥

kharaḥ śūrpaṇakhā caiva teṣāṃ vai tapyatāṃ tapaḥ.
paricaryāṃ ca rakṣāṃ ca cakraturhṛṣṭamānasau..

अन्वय - *anvaya*

हृष्टमानसौ खरः शूर्पणखा च परिचर्याम् अकुरुताम्। तेषाम् तप्यताम् तपः अरक्ष्येताम् ताभ्याम्।

hṛṣṭamānasau kharaḥ śūrpaṇakhā ca paricaryām akurutām. teṣām tapyatām tapaḥ arakṣyetām tābhyām.

English Translation

The happy Khara and Śūrpaṇakhā indeed wandered and protected the penance of those who were practising austerities.

०३ २५९ ०२०

शास्त्र - *śāstra*

पूर्णे वर्षसहस्रे तु शिरश्छित्त्वा दशाननः।
जुहोत्यग्नौ दुराधर्षस्तेनातुष्यज्जगत्प्रभुः॥

pūrṇe varṣasahasre tu śiraśchittvā daśānanaḥ.
juhotyagnau durādharṣastenātuṣyajjagatprabhuḥ..

अन्वय - *anvaya*

दशाननः दुराधर्षः दशग्रीवः सहस्त्रवर्षस्य तपः अकुरुत। तस्मिन् पुर्णे सः शिरांसि अग्नौ जुहोति। तस्मात् जगत्प्रभुः ब्रह्मा अतुष्यत्।

daśānanaḥ durādharṣaḥ daśagrīvaḥ sahastravarṣasya tapaḥ akuruta. tasmin purṇe saḥ śirāṃsi agnau juhoti. tasmāt jagatprabhuḥ brahmā atuṣyat.

English Translation

At the end of the thousand years, having cut off his head, invincible Daśānana offered it as a sacrifice, and by that, the world's lord was pleased.

०३ २५९ ०२१

शास्त्र - *śāstra*

ततो ब्रह्मा स्वयं गत्वा तपसस्तान्न्यवारयत्।
प्रलोभ्य वरदानेन सर्वानेव पृथक्पृथक्॥

tato brahmā svayaṃ gatvā tapasastānnyavārayat.
pralobhya varadānena sarvāneva pṛthakpṛthak..

अन्वय - *anvaya*

ततः ब्रह्मा स्वयम् तत्र गतः। सः पृथक् पृथक् वरदानम् दत्त्वा घोरतपसः तान् न्यवारयत्। तान् रुन्धताम् इति ब्रह्मा ऐच्छत्।

tataḥ brahmā svayam tatra gataḥ. saḥ pṛthak pṛthak varadānam dattvā ghoratapasaḥ tān nyavārayat. tān rundhatām iti brahmā aicchat.

English Translation

Therefore, Lord Brahmā himself went there and freed them from their penance, alluring them with different boons.

०३ २५९ ०२२

शास्त्र - *śāstra*

ब्रह्मोवाच
प्रीतोऽस्मि वो निवर्तध्वं वरान्वृणुत पुत्रकाः।
यद्यदिष्टमृते त्वेकममरत्वं तथास्तु तत्॥

brahmovāca
prīto'smi vo nivartadhvaṃ varānvṛṇuta putrakāḥ.
yadyadiṣṭamṛte tvekamamaratvaṃ tathāstu tat..

अन्वय - *anvaya*

पुत्रकाः प्रीतः अस्मि युष्माभिः तपोभिः। निवर्तध्वम्। वरान् वृणीध्वम्। यद् यद् इष्टम् तत् तथास्तु ऋते तु एकम् अमरत्वम्।

putrakāḥ prītaḥ asmi yuṣmābhiḥ tapobhiḥ. nivartadhvam. varān vṛṇīdhvam. yad yad iṣṭam tat tathāstu ṛte tu ekam amaratvam.

English Translation

Brahmā said: O children! I am pleased by you. May you now stop and choose a boon. Whatever you wish except immortality, may it be.

०३ २५९ ०२३

शास्त्र - *śāstra*

यद्यदग्नौ हुतं सर्वं शिरस्ते महदीप्सया।
तथैव तानि ते देहे भविष्यन्ति यथेप्सितम्॥

yadyadagnau hutaṃ sarvaṃ śiraste mahadīpsayā. tathaiva tāni te dehe bhaviṣyanti yathepsitam..

अन्वय - *anvaya*

यद् यद् तव सर्वम् शिरसः अग्नौ हुतानि महते ईप्सया तानि तव देहे यथेपसितम् भविष्यन्ति।

yad yad tava sarvam śirasaḥ agnau hutāni mahate īpsayā tāni tava dehe yathepasitam bhaviṣyanti.

English Translation

Whichever heads you sacrificed in the fire with a desire for greatness, all those will be on your body as desired.

०३ २५९ ०२४

शास्त्र - *śāstra*

वैरूप्यं च न ते देहे कामरूपधरस्तथा।
भविष्यसि रणेऽरीणां विजेतासि न संशयः॥

vairūpyaṃ ca na te dehe kāmarūpadharastathā.
bhaviṣyasi raṇe'rīṇāṃ vijetāsi na saṃśayaḥ..

अन्वय - *anvaya*

तव देहे न वैरूप्यम् भविष्यसि। कामरूपधरः भविष्यसि। रणे अरीणाम् विजेतासि न संशयः।

tava dehe na vairūpyam bhaviṣyasi. kāmarūpadharaḥ bhaviṣyasi. raṇe arīṇām vijetāsi na saṃśayaḥ.

English Translation

Your body will not deform. You can assume any shape you want. There is no doubt that you will win over your enemies in battle.

०३ २५९ ०२५

शास्त्र - *śāstra*

रावण उवाच।
गन्धर्वदेवासुरतो यक्षराक्षसतस्तथा।
सर्पकिंनरभूतेभ्यो न मे भूयात्पराभवः॥

rāvaṇa uvāca.
gandharvadevāsurato yakṣarākṣasatastathā.
sarpakiṃnarabhūtebhyo na me bhūyātparābhavaḥ..

अन्वय - *anvaya*

गन्धर्वदेवासुरयक्षराक्षससर्पकिंनरभूतेभ्यः मे पराभवः न भूयात्।

gandharvadevāsurayakṣarākṣasasarpakiṃnarabhūtebhyaḥ me parābhavaḥ na bhūyāt.

English Translation

Rāvaṇa said: I shall not be defeated by Gandharvas, Devas, Yakṣas, Asuras, Rākṣasas, Sarpas, Kiṃnaras, or Bhūtas.

०३ २५९ ०२६

शास्त्र - *śāstra*

ब्रह्मोवाच
य एते कीर्तिताः सर्वे न तेभ्योऽस्ति भयं तव।
ऋते मनुष्याद्भद्रं ते तथा तद्विहितं मया॥

brahmovāca
ya ete kīrtitāḥ sarve na tebhyo'sti bhayaṃ tava.
ṛte manuṣyādbhadraṃ te tathā tadvihitaṃ mayā..

अन्वय - *anvaya*

त्वम् एतान् सर्वान् कीर्तितान् ऋते मनुष्यात् न बिभीहि इति तद् भद्रम् विहितम् मया तुभ्यम्।

tvam etān sarvān kīrtitān ṛte manuṣyāt na bibhīhi iti tad bhadram vihitam mayā tubhyam.

English Translation

Brahmā said: Do not fear all those you mentioned earlier. I bestow this blessing on you.

०३ २५९ ०२७

शास्त्र - *śāstra*

मार्कण्डेय उवाच।
एवमुक्तो दशग्रीवस्तुष्टः समभवत्तदा।
अवमेने हि दुर्बुद्धिर्मनुष्यान्पुरुषादकः॥

mārkaṇḍeya uvāca.
evamukto daśagrīvastuṣṭaḥ samabhavattadā.
avamene hi durbuddhirmanuṣyānpuruṣādakaḥ..

अन्वय - *anvaya*

एवम् उक्तः दशग्रीवः तुष्टः। तदा सः समभवत्। दुर्बुद्धिः पुरुषादकः रावणः मनुष्यान् अवामन्यत हि।

evam uktaḥ daśagrīvaḥ tuṣṭaḥ. tadā saḥ samabhavat. durbuddhiḥ puruṣādakaḥ rāvaṇaḥ manuṣyān avāmanyata hi.

English Translation

Mārkaṇḍeya said: Having been told in that way, Daśagrīva was satisfied, and he sprung up. The cannibal fool indeed despised humans.

०३ २५९ ०२८

शास्त्र - *śāstra*

कुम्भकर्णमथोवाच तथैव प्रपितामहः।
स वव्रे महतीं निद्रां तमसा ग्रस्तचेतनः॥

kumbhakarṇamathovāca tathaiva prapitāmahaḥ.
sa vavre mahatīṃ nidrāṃ tamasā grastacetanaḥ..

अन्वय - *anvaya*

तथा एव प्रपितामहः ब्रह्मा कुम्भकर्णम् उवाच। सः ग्रस्तः चेतनः कुम्भकर्णः तमसा महतीम् निद्राम् वव्रे।

tathā eva prapitāmahaḥ brahmā kumbhakarṇam uvāca. saḥ grastaḥ cetanaḥ kumbhakarṇaḥ tamasā mahatīm nidrām vavre.

English Translation

After that, the paternal great-grandfather Brahmā spoke to Kumbhakarṇa. He chose deep sleep as his mind was swallowed with darkness.

०३ २५९ ०२९

शास्त्र - *śāstra*

तथा भविष्यतीत्युक्त्वा विभीषणमुवाच ह।
वरं वृणीष्व पुत्र त्वं प्रीतोऽस्मीति पुनः पुनः॥

tathā bhaviṣyatītyuktvā vibhīṣaṇamuvāca ha.
varaṃ vṛṇīṣva putra tvaṃ prīto'smīti punaḥ punaḥ..

अन्वय - *anvaya*

तथा भविष्यति इति ब्रह्मा कुम्भकर्णम् उवाच। वरम् वृणीष्व पुत्र त्वम् प्रीतः अस्मि इति सः विभीषणम् पुनः पुनः उवाच।

tathā bhaviṣyati iti brahmā kumbhakarṇam uvāca. varam vṛṇīṣva putra tvam prītaḥ asmi iti saḥ vibhīṣaṇam punaḥ punaḥ uvāca.

English Translation

Having said - "May it be", he repeatedly told Vibhīṣaṇa - "O child! I am pleased. Ask for a boon."

०३ २५९ ०३०

शास्त्र - *śāstra*

विभीषण उवाच।
परमापद्गतस्यापि नाधर्मे मे मतिर्भवेत्।
अशिक्षितं च भगवन्ब्रह्मास्त्रं प्रतिभातु मे॥

vibhīṣaṇa uvāca.
paramāpadgatasyāpi nādharme me matirbhavet.
aśikṣitaṃ ca bhagavanbrahmāstraṃ pratibhātu me..

अन्वय - *anvaya*

परमापदि अपि मम मतिः अधर्मे न भवेत्। भगवन् च अशिक्षितम् ब्रह्मास्त्र प्रतिभातु मे।

paramāpadi api mama matiḥ adharme na bhavet. bhagavan ca aśikṣitam brahmāstra pratibhātu me.

English Translation

Vibhīṣaṇa said: Even in the highest disasters, my mind shall not be wicked. O Lord! An unlearned Brahmāstra shall please me.

०३ २५९ ०३१

शास्त्र - *śāstra*

ब्रह्मोवाच
यस्माद्राक्षसयोनौ ते जातस्यामित्रकर्शन।
नाधर्मे रमते बुद्धिरमरत्वं ददामि ते॥

brahmovāca
yasmādrākṣasayonau te jātasyāmitrakarśana.
nādharme ramate buddhiramaratvaṃ dadāmi te..

अन्वय - *anvaya*

अमित्रकर्शन यद्यपि तव जातः राक्षसयोनौ असि तथापि तव बुद्धिः अधर्मे न रमते। तस्मात् अमरत्वम् ते ददामि।

amitrakarśana yadyapi tava jātaḥ rākṣasayonau asi tathāpi tava buddhiḥ adharme na ramate. tasmāt amaratvam te dadāmi.

English Translation

Brahmā said: O emaciator of enemies! Even though your birth is in the lineage of demons, your intellect does not enjoy unrighteousness. I grant you immortality.

०३ २५९ ०३२

शास्त्र - *śāstra*

मार्कण्डेय उवाच।
राक्षसस्तु वरं लब्ध्वा दशग्रीवो विशां पते।
लङ्कायाश्च्यावयामास युधि जित्वा धनेश्वरम्॥

mārkaṇḍeya uvāca.
rākṣasastu varaṃ labdhvā daśagrīvo viśāṃ pate.
laṅkāyāścyāvayāmāsa yudhi jitvā dhaneśvaram..

अन्वय - *anvaya*

विशाम् पते वरम् लब्धवा युधि च जित्वा राक्षसः दशग्रीवः धनेश्वरम् कुबेरम् लङ्कायाः च्यावयामास।

viśām pate varam labdhavā yudhi ca jitvā rākṣasaḥ daśagrīvaḥ dhaneśvaram kuberam laṅkāyāḥ cyāvayāmāsa.

English Translation

Mārkaṇḍeya said: O lord of the merchants! Having obtained the boon and winning the war, the demon Daśagrīva drove away the lord of the wealth from Laṅkā.

०३ २५९ ०३३

शास्त्र - *śāstra*

हित्वा स भगवाल्ँलङ्कामाविशद्गन्धमादनम्।
गन्धर्वयक्षानुगतो रक्षःकिंपुरुषैः सह॥

hitvā sa bhagavālāḷaṅkāmāviśadgandhamādanam.
gandharvayakṣānugato rakṣaḥkiṃpuruṣaiḥ saha..

अन्वय - *anvaya*

सः भगवान् रावणः गन्धमादनम् हित्वा लङ्काम् गन्धर्वयक्षरक्षःकिंनरैः सह आविशत्।

saḥ bhagavān rāvaṇaḥ gandhamādanam hitvā laṅkām gandharvayakṣarakṣaḥkiṃnaraiḥ saha āviśat.

English Translation

Having left Gandhamādana, he entered Laṅkā with Gandharvas, Yakṣas, Rākṣasas, and Kiṃnaras.

०३ २५९ ०३४

शास्त्र - *śāstra*

विमानं पुष्पकं तस्य जहाराक्रम्य रावणः।
शशाप तं वैश्रवणो न त्वामेतद्वहिष्यति॥

vimānaṃ puṣpakaṃ tasya jahārākramya rāvaṇaḥ.
śaśāpa taṃ vaiśravaṇo na tvāmetadvahiṣyati..

अन्वय - *anvaya*

वैश्रवणस्य पुष्पकम् विमानम् आक्रम्य रावणः जहार। न त्वाम् एतत् वहिष्यति इति वैश्रवणः रावणम् शशाप।

vaiśravaṇasya puṣpakam vimānam ākramya rāvaṇaḥ jahāra. na tvām etat vahiṣyati iti vaiśravaṇaḥ rāvaṇam śaśāpa.

English Translation

Having attacked his Puṣpaka aerial chariot, Ravaṇa abducted it. "It will not carry you", Vaiśravaṇa cursed him.

०३ २५९ ०३५

शास्त्र - *śāstra*

यस्तु त्वां समरे हन्ता तमेवैतद्वहिष्यति।
अवमन्य गुरुं मां च क्षिप्रं त्वं न भविष्यसि॥

yastu tvāṃ samare hantā tamevaitadvahiṣyati.
avamanya guruṃ māṃ ca kṣipraṃ tvaṃ na bhaviṣyasi..

अन्वय - *anvaya*

यः तु त्वाम् समरे हन्ता तम् एव एतत् वहिष्यति। गुरुम् माम् च अवमन्य त्वम् क्षिप्रम् न भविष्यसि।

yaḥ tu tvām samare hantā tam eva etat vahiṣyati.
gurum mām ca avamanya tvam kṣipram na bhaviṣyasi.

English Translation

“But he who will kill you, this will carry him certainly. Having despised me and my teacher, you will seize to exist quickly.”

०३ २५९ ०३६

शास्त्र - *śāstra*

विभीषणस्तु धर्मात्मा सतां धर्ममनुस्मरन्।
अन्वगच्छन्महाराज श्रिया परमया युतः॥

vibhīṣaṇastu dharmātmā satāṃ dharmamanusmaran.
anvagacchanmahārāja śriyā paramayā yutaḥ..

अन्वय - *anvaya*

विभीषणः तु धर्मात्मा सताम् धर्मम् अनुस्मरन्। महाराज श्रिया परमया युतः अन्वगच्छत्।

vibhīṣaṇaḥ tu dharmātmā satām dharmam anusmaran. mahārāja śriyā paramayā yutaḥ anvagacchat.

English Translation

But Vibhīṣaṇa, the one who followed righteousness, remembered the duties of the good. O King! He went after along with ultimate wealth.

०३ २५९ ०३७

शास्त्र - *śāstra*

तस्मै स भगवांस्तुष्टो भ्राता भ्रात्रे धनेश्वरः।
सेनापत्यं ददौ धीमान्यक्षराक्षससेनयोः॥

tasmai sa bhagavāṃstuṣṭo bhrātā bhrātre dhaneśvaraḥ.
senāpatyaṃ dadau dhīmānyakṣarākṣasasenayoḥ..

अन्वय - *anvaya*

सः धीमान् भगवान् धनेश्वरः भ्राता तुष्टः तस्मै भ्रात्रे सेनापत्यम् ददौ यक्षराक्षससेनयोः।

saḥ dhīmān bhagavān dhaneśvaraḥ bhrātā tuṣṭaḥ tasmai bhrātre senāpatyam dadau yakṣarākṣasasenayoḥ.

English Translation

The wise, great, pleased, wealthy brother gave his brother commandership of the armies of Yakṣas and Rākṣasas.

०३ २५९ ०३८

शास्त्र - *śāstra*

राक्षसाः पुरुषादाश्च पिशाचाश्च महाबलाः।
सर्वे समेत्य राजानमभ्यषिञ्चद्दशाननम्॥

rākṣasāḥ puruṣādāśca piśācāśca mahābalāḥ.
sarve sametya rājānamabhyaṣiñcaddaśānanam..

अन्वय - *anvaya*

सर्वे राक्षसाः पुरुषादाः च महाबलाः च पिशाचाः राजानम् दशाननम् समायन् अभ्यषिञ्चन् च।

sarve rākṣasāḥ puruṣādāḥ ca mahābalāḥ ca piśācāḥ rājānam daśānanam samāyan abhyaṣiñcan ca.

English Translation

All demons, cannibals, and the strong devils arrived and consecrated King Daśānana.

०३ २५९ ०३९

शास्त्र - *śāstra*

दशग्रीवस्तु दैत्यानां देवानां च बलोत्कटः।
आक्रम्य रत्नान्यहरत्कामरूपी विहंगमः॥

daśagrīvastu daityānāṃ devānāṃ ca balotkaṭaḥ.
ākramya ratnānyaharatkāmarūpī vihaṃgamaḥ..

अन्वय - *anvaya*

कामरूपी तु विहंगमः बले उत्कटः दशग्रीवः दैत्यानाम् देवानाम् च आक्रम्य रत्नानि अहरत्।

kāmarūpī tu vihaṃgamaḥ bale utkaṭaḥ daśagrīvaḥ daityānām devānām ca ākramya ratnāni aharat.

English Translation

But moving through the sky, assuming any shape as desired, strong Daśagrīva attacked and abducted the jewels of Daityas and gods.

०३ २५९ ०४०

शास्त्र - *śāstra*

रावयामास लोकान्यत्तस्माद्रावण उच्यते।
दशग्रीवः कामबलो देवानां भयमादधत्॥

rāvayāmāsa lokānyattasmādrāvaṇa ucyate.
daśagrīvaḥ kāmabalo devānāṃ bhayamādadhat..

अन्वय - *anvaya*

यत् लोकान् रावयामास तस्मात् रावणः उच्यते। दशग्रीवः कामबलः देवानाम् भयम् आदधत्।

yat lokān rāvayāmāsa tasmāt rāvaṇaḥ ucyate.
daśagrīvaḥ kāmabalaḥ devānām bhayam ādadhat.

English Translation

He who caused people to bellow is said to be Rāvaṇa. Daśagrīva who had force as desired, instilled fear among gods.

— ०४ —

०३ २६०

असतो मा सद्गमय।
तमसो मा ज्योतिर्गमय।
मृत्योर्मामृतं गमय॥
ॐ शान्तिः शान्तिः शान्तिः॥

०३ २६० ००१

शास्त्र - *śāstra*

मार्कण्डेय उवाच।
ततो ब्रह्मर्षयः सिद्धा देवराजर्षयस्तथा।
हव्यवाहं पुरस्कृत्य ब्रह्माणं शरणं गताः॥

mārkaṇḍeya uvāca.
tato brahmarṣayaḥ siddhā devarājarṣayastathā.
havyavāhaṃ puraskṛtya brahmāṇaṃ śaraṇaṃ gatāḥ..

अन्वय - *anvaya*

ततः सिद्धाः नानाविधाः ऋषयः देवाः सर्वान् हव्यवाहम् पुरस्कृत्य ब्रह्माणम् शरणम् गताः।

tataḥ siddhāḥ nānāvidhāḥ ṛṣayaḥ devāḥ sarvān havyavāham puraskṛtya brahmāṇam śaraṇam gatāḥ.

English Translation

Mārkaṇḍeya said: Therefore, all gods, Brahmarṣis, Rājarṣis, and Siddhas honoured Agni and went to the shelter of Brahmā.

०३ २६० ००२

शास्त्र - *śāstra*

अग्निरुवाच
यः स विश्रवसः पुत्रो दशग्रीवो महाबलः।
अवध्यो वरदानेन कृतो भगवता पुरा॥

agniruvāca.
yaḥ sa viśravasaḥ putro daśagrīvo mahābalaḥ.
avadhyo varadānena kṛto bhagavatā purā..

अन्वय - *anvaya*

यः विश्रवसः पुत्रः दशग्रीवः महाबलः सः अवध्यः वरदानेन कृतः भगवता पुरा।

yaḥ viśravasaḥ putraḥ daśagrīvaḥ mahābalaḥ saḥ avadhyaḥ varadānena kṛtaḥ bhagavatā purā.

English Translation

Agni said: He who is the son of Viśravas, strong Daśagrīva, is unkillable by your earlier boon.

०३ २६० ००३

शास्त्र - *śāstra*

स बाधते प्रजाः सर्वा विप्रकारैर्महाबलः।
ततो नस्त्रातु भगवन्नान्यस्त्राता हि विद्यते॥

sa bādhate prajāḥ sarvā viprakārairmahābalaḥ.
tato nastrātu bhagavannānyastrātā hi vidyate..

अन्वय - *anvaya*

सः महाबलः विप्रकारैः सर्वाः प्रजाः बाधते। भगवन् ततः अस्मान् त्रातु। अन्यः त्राता हि न विद्यते।

saḥ mahābalaḥ viprakāraiḥ sarvāḥ prajāḥ bādhate. bhagavan tataḥ asmān trātu. anyaḥ trātā hi na vidyate.

English Translation

The strong one tortured all people with wickedness. O Lord! Protect us. Another protector is not known.

०३ २६० ००४

शास्त्र - *śāstra*

ब्रह्मोवाच
न स देवासुरैः शक्यो युद्धे जेतुं विभावसो।
विहितं तत्र यत्कार्यमभितस्तस्य निग्रहे॥

brahmovāca
na sa devāsuraiḥ śakyo yuddhe jetuṃ vibhāvaso.
vihitaṃ tatra yatkāryamabhitastasya nigrahe..

अन्वय - *anvaya*

न सः देवासुरैः शक्यः युद्धे जेतुम् विभावसो। अभितस् तस्य निग्रहे यद् कार्यम् तद् विहितम्।

na saḥ devāsuraiḥ śakyaḥ yuddhe jetum vibhāvaso.
abhitas tasya nigrahe yad kāryam tad vihitam.

English Translation

Brahmā said: O Vibhāvasu! It is impossible to win a battle against him by Devas and Asuras. That which should be done regarding his destruction has been destined.

०३ २६० ००५

शास्त्र - *śāstra*

तदर्थमवतीर्णोऽसौ मन्नियोगाच्चतुर्भुजः।
विष्णुः प्रहरतां श्रेष्ठः स कर्मैतत्करिष्यति॥

tadarthamavatīrṇo'sau manniyogāccaturbhujaḥ.
viṣṇuḥ praharatāṃ śreṣṭhaḥ sa karmaitatkariṣyati..

अन्वय - *anvaya*

तदर्थम् मत् नियोगात् असौ सः अवतीर्णः चतुर्भुजः। विष्णुः प्रहरताम् श्रेष्ठः एतद् कर्म करिष्यति।

tadartham mat niyogāt asau saḥ avatīrṇaḥ caturbhujaḥ. viṣṇuḥ praharatām śreṣṭhaḥ etad karma kariṣyati.

English Translation

Therefore, from my order for that, the four-handed Viṣṇu descended. He, the best among fighters, will do that action.

०३ २६० ००६

शास्त्र - *śāstra*

मार्कण्डेय उवाच।
पितामहस्ततस्तेषां संनिधौ वाक्यमब्रवीत्।
सर्वैर्देवगणैः सार्धं संभवध्वं महीतले॥

mārkaṇḍeya uvāca.
pitāmahastatasteṣāṃ saṃnidhau vākyamabravīt.
sarvairdevagaṇaiḥ sārdhaṃ saṃbhavadhvaṃ mahītale..

अन्वय - *anvaya*

ततः पितामहः तेषाम् संनिधौ इदम् वाक्यम् अब्रवीत्। सर्वैः देवगणैः सार्धम् सम्भवध्वम् महीतले इति।

tataḥ pitāmahaḥ teṣām saṃnidhau idam vākyam abravīt. sarvaiḥ devagaṇaiḥ sārdham sambhavadhvam mahītale iti.

English Translation

Mārkaṇḍeya said: Then Pitāmaha Brahmā said this in their presence - "May you all be jointly united with all types of gods on the surface of the earth."

०३ २६० ००७

शास्त्र - *śāstra*

विष्णोः सहायानृक्षीषु वानरीषु च सर्वशः।
जनयध्वं सुतान्वीरान्कामरूपबलान्वितान्॥

viṣṇoḥ sahāyānṛkṣīṣu vānarīṣu ca sarvaśaḥ.
janayadhvaṃ sutānvīrānkāmarūpabalānvitān..

अन्वय - *anvaya*

विष्णोः ऋक्षीषु वानरीषु च सर्वशः जनयध्वम् सहायान् सुतान् वीरान् कामरूपबलान्वितान्।

viṣṇoḥ ṛkṣīṣu vānarīṣu ca sarvaśaḥ janayadhvam sahāyān sutān vīrān kāmarūpabalānvitān.

English Translation

"May you all be born as warrior sons and companions of Viṣṇu possessed with power and form as desired to female ṛkṣīs and vānarīs."

०३ २६० ००८

शास्त्र - *śāstra*

ततो भागानुभागेन देवगन्धर्वदानवाः।
अवतर्तुं महीं सर्वे रञ्जयामासुरञ्जसा॥

tato bhāgānubhāgena devagandharvadānavāḥ.
avatartuṃ mahīṃ sarve rañjayāmāsurañjasā..

अन्वय - *anvaya*

ततः भागानुभागेन देवगन्धर्वदानवाः अवतर्तुम् महीम् सर्वे रञ्जयामासुः अञ्जसा।

tataḥ bhāgānubhāgena devagandharvadānavāḥ avatartum mahīm sarve rañjayāmāsuḥ añjasā.

English Translation

Therefore, all Devas, Gandharvas, and Dānavas quickly rejoiced with a greater or smaller share to descend the earth.

०३ २६० ००९

शास्त्र - *śāstra*

तेषां समक्षं गन्धर्वीं दुन्दुभीं नाम नामतः।
शशास वरदो देवो देवकार्यार्थसिद्धये॥

teṣāṃ samakṣaṃ gandharvīṃ dundubhīṃ nāma nāmataḥ.
śaśāsa varado devo devakāryārthasiddhaye..

अन्वय - *anvaya*

तेषाम् समक्षम् दुन्दुभीम् नाम गन्धर्वीम् आसीत्। शशास वरदः देवः ताम् देवकार्यार्थसिद्धये।

teṣām samakṣam dundubhīm nāma gandharvīm āsīt.
śaśāsa varadaḥ devaḥ tām devakāryārthasiddhaye.

English Translation

There was a Gandharvī named Dundubhī present amongst them. The boon-granting God instructed her for the fulfilment of the divine command.

०३ २६० ०१०

शास्त्र - *śāstra*

पितामहवचः श्रुत्वा गन्धर्वी दुन्दुभी ततः।
मन्थरा मानुषे लोके कुब्जा समभवत्तदा॥

pitāmahavacaḥ śrutvā gandharvī dundubhī tataḥ.
mantharā mānuṣe loke kubjā samabhavattadā..

अन्वय - *anvaya*

ततः पितामहवचः श्रुत्वा गन्धर्वी दुन्दुभी मानुषे लोके कुब्जा मन्थरा समभवत् तदा।

tataḥ pitāmahavacaḥ śrutvā gandharvī dundubhī mānuṣe loke kubjā mantharā samabhavat tadā.

English Translation

Therefore, having heard the words of Pitāmaha, Gandharvī Dundubhī became hump-backed Mantharā in the human world.

०३ २६० ०११

शास्त्र - *śāstra*

शक्रप्रभृतयश्चैव सर्वे ते सुरसत्तमाः।
वानरर्क्षवरस्त्रीषु जनयामासुरात्मजान्।
तेऽन्ववर्तन्पितॄन्सर्वे यशसा च बलेन च॥

śakraprabhṛtayaścaiva sarve te surasattamāḥ.
vānararkṣavarastrīṣu janayāmāsurātmajān.
te'nvavartanpitṝnsarve yaśasā ca balena ca..

अन्वय - *anvaya*

शक्रप्रभृतयः च एव सर्वे ते सुरसत्तमाः वानरर्क्षवरस्त्रीषु जनयामासुः आत्मजान्। ते सर्वे अन्ववर्तन् पितॄन् यशसा च बलेन च।

śakraprabhṛtayaḥ ca eva sarve te surasattamāḥ vānararkṣavarastrīṣu janayāmāsuḥ ātmajān. te sarve anvavartan pitṝn yaśasā ca balena ca.

English Translation

The best amongst the gods, beginning with Indra, were all born as children to the best females of monkeys and bears. They all followed their fathers with strength and fame.

०३ २६० ०१२

शास्त्र - *śāstra*

भेत्तारो गिरिशृङ्गाणां शालतालशिलायुधाः।
वज्रसंहननाः सर्वे सर्वे चौघबलास्तथा॥

bhettāro giriśṛṅgāṇāṃ śālatālaśilāyudhāḥ.
vajrasaṃhananāḥ sarve sarve caughabalāstathā..

अन्वय - *anvaya*

भेत्तारः गिरिशृङ्गाणाम्। तेषाम् आयुधाः शालाः तालाः शिलाः। वज्रः इव संहननाः सर्वे। सर्वे च ओघाः बलैः तथा।

bhettāraḥ giriśṛṅgāṇām. teṣām āyudhāḥ śālāḥ tālāḥ śilāḥ. vajraḥ iva saṃhananāḥ sarve. sarve ca oghāḥ balaiḥ tathā.

English Translation

They were conqueror of the peaks of mountains, and their weapons were Śāl trees, Palm trees, and stones. They all had solidity like the Vajra, and they all had an abundance of strength.

०३ २६० ०१३

शास्त्र - *śāstra*

कामवीर्यधराश्चैव सर्वे युद्धविशारदाः।
नागायुतसमप्राणा वायुवेगसमा जवे।
यत्रेच्छकनिवासाश्च केचिदत्र वनौकसः॥

kāmavīryadharāścaiva sarve yuddhaviśāradāḥ.
nāgāyutasamaprāṇā vāyuvegasamā jave.
yatrecchakanivāsāśca kecidatra vanaukasaḥ..

अन्वय - *anvaya*

सर्वे कामवीर्यधराः। सर्वे च एव युद्धविशारदाः। अयुताः नागाः समः प्राणाः। वायुवेगसमाः जवे। यत्र इच्छकनिवासाः च केचित् अत्र वनौकसः।

sarve kāmavīryadharāḥ. sarve ca eva yuddhaviśāradāḥ. ayutāḥ nāgāḥ samaḥ prāṇāḥ. vāyuvegasamāḥ jave. yatra icchakanivāsāḥ ca kecit atra vanaukasaḥ.

English Translation

They all bore strength as desired and were experts in war. They had lives similar to ten thousand snakes and wind-like speeds. They lived wherever they wished, and some lived in forests here.

०३ २६० ०१४

शास्त्र - *śāstra*

एवं विधाय तत्सर्वं भगवाल्ँलोकभावनः।
मन्थरां बोधयामास यद्यत्कार्यं यथा यथा॥

evaṃ vidhāya tatsarvaṃ bhagavālँlokabhāvanaḥ.
mantharāṃ bodhayāmāsa yadyatkāryaṃ yathā yathā..

अन्वय - *anvaya*

एवम् तद् सर्वम् यद् यद् कार्यम् यथा यथा विधाय भगवान् लोकभावनः मन्थराम् बोधयामास।

evam tad sarvam yad yad kāryam yathā yathā vidhāya bhagavān lokabhāvanaḥ mantharām bodhayāmāsa.

English Translation

In this manner, having distributed what to do to all of them, the world-creating lord advised Mantharā.

०३ २६० ०१५

शास्त्र - *śāstra*

सा तद्वचनमाज्ञाय तथा चक्रे मनोजवा।
इतश्चेतश्च गच्छन्ती वैरसंधुक्षणे रता॥

sā tadvacanamājñāya tathā cakre manojavā.
itaścetaśca gacchantī vairasaṃdhukṣaṇe ratā..

अन्वय - *anvaya*

तद् वचनम् आज्ञाय सा मनोजवा तथा चक्रे। इतश्चेतश्च गच्छन्ती वैरसंधुक्षणे रता।

tad vacanam ājñāya sā manojavā tathā cakre.
itaścetaśca gacchantī vairasaṃdhukṣaṇe ratā.

English Translation

Having understood those instructions, she, swift in thought, did in that manner. She who was going here and there was pleasured in exciting enmity.

— ०५ —

०३ २६१

असतो मा सद्गमय।
तमसो मा ज्योतिर्गमय।
मृत्योर्मामृतं गमय॥
ॐ शान्तिः शान्तिः शान्तिः॥

०३ २६१ ००१

शास्त्र - *śāstra*

युधिष्ठिर उवाच।
उक्तं भगवता जन्म रामादीनां पृथक्पृथक्।
प्रस्थानकारणं ब्रह्मञ्श्रोतुमिच्छामि कथ्यताम्॥

yudhiṣṭhira uvāca.
uktaṃ bhagavatā janma rāmādīnāṃ pṛthakpṛthak.
prasthānakāraṇaṃ brahmañśrotumicchāmi kathyatām..

अन्वय - *anvaya*

उक्तम् भगवता जन्मः रामादीनाम् पृथक् पृथक्। प्रस्थानकारणम् ब्रह्मन् श्रोतुम् इच्छामि। तद् कथ्यताम्।

uktam bhagavatā janmaḥ rāmādīnām pṛthak pṛthak. prasthānakāraṇam brahman śrotum icchāmi. tad kathyatām.

English Translation

Yudhiṣṭhira said: Having told about the birth of Rāma and others one by one by you, O Brāhman, I wish to hear the reason for the departure. May it be told.

०३ २६१ ००२

शास्त्र - *śāstra*

कथं दाशरथी वीरौ भ्रातरौ रामलक्ष्मणौ।
प्रस्थापितौ वनं ब्रह्म मैथिली च यशस्विनी॥

kathaṃ dāśarathī vīrau bhrātarau rāmalakṣmaṇau.
prasthāpitau vanaṃ brahma maithilī ca yaśasvinī..

अन्वय - *anvaya*

ब्रह्म कथम् दाशरथी वीरौ भ्रातरौ रामलक्ष्मणौ प्रस्थापितौ वनम्। मैथिली च यशस्विनी कथम् ताभ्याम् वनम् प्रस्थापिता।

brahma katham dāśarathī vīrau bhrātarau rāmalakṣmaṇau prasthāpitau vanam. maithilī ca yaśasvinī katham tābhyām vanam prasthāpitā.

English Translation

O Brāhman, How were the two warrior brothers, sons of Daśaratha, Rāma and Lakṣmaṇa, sent away to the forest with the illustrious princess of Mithilā Sītā?

०३ २६१ ००३

शास्त्र - *śāstra*

मार्कण्डेय उवाच।
जातपुत्रो दशरथः प्रीतिमानभवन्नृपः।
क्रियारतिर्धर्मपरः सततं वृद्धसेविता॥

mārkaṇḍeya uvāca.
jātaputro daśarathaḥ prītimānabhavannṛpaḥ.
kriyāratirdharmaparaḥ satataṃ vṛddhasevitā..

अन्वय - *anvaya*

जातपुत्रः दशरथः प्रीतिमान् नृपः क्रियारतिः धर्मपरः सततम् वृद्धसेविता अभवत्।

jātaputraḥ daśarathaḥ prītimān nṛpaḥ kriyāratiḥ dharmaparaḥ satatam vṛddhasevitā abhavat.

English Translation

Markaṇḍeya said: King Daśaratha, who was always involved in the service of elders, was pleased, found pleasure in his actions, and had a son.

०३ २६१ ००४

शास्त्र - *śāstra*

क्रमेण चास्य ते पुत्रा व्यवर्धन्त महौजसः।
वेदेषु सरहस्येषु धनुर्वेदे च पारगाः॥

krameṇa cāsya te putrā vyavardhanta mahaujasaḥ.
vedeṣu sarahasyeṣu dhanurvede ca pāragāḥ..

अन्वय - *anvaya*

क्रमेण दशरथस्य ते महौजसः पुत्राः व्यवर्धन्त। ते वेदेषु सरहस्येषु धनुर्वेदे च पारगाः अभवन्।

krameṇa daśarathasya te mahaujasaḥ putrāḥ vyavardhanta. te vedeṣu sarahasyeṣu dhanurvede ca pāragāḥ abhavan.

English Translation

And those warrior sons of him prospered with step. They were profoundly learned in Vedas, Upaniṣads, and Dhanurveda.

०३ २६१ ००५

शास्त्र - *śāstra*

चरितब्रह्मचर्यास्ते कृतदाराश्च पार्थिव।
यदा तदा दशरथः प्रीतिमानभवत्सुखी॥

caritabrahmacaryāste kṛtadārāśca pārthiva.
yadā tadā daśarathaḥ prītimānabhavatsukhī..

अन्वय - *anvaya*

पार्थिव यदा ते चरितब्रह्मचर्याः कृतदाराः च तदा दशरथः प्रीतिमान् सुखी अभवत्।

pārthiva yadā te caritabrahmacaryāḥ kṛtadārāḥ ca tadā daśarathaḥ prītimān sukhī abhavat.

English Translation

O King of the world! When they practised the study of Vedas and married, then Daśaratha was pleased.

०३ २६१ ००६

शास्त्र - *śāstra*

ज्येष्ठो रामोऽभवत्तेषां रमयामास हि प्रजाः।
मनोहरतया धीमान्पितुर्हृदयतोषणः॥

jyeṣṭho rāmo'bhavatteṣāṃ ramayāmāsa hi prajāḥ.
manoharatayā dhīmānpiturhṛdayatoṣaṇaḥ..

अन्वय - *anvaya*

तेषाम् ज्येष्ठः रामः अभवत्। सः रमयामास हि प्रजाः। सः धीमान् पितुः मनोहरतया हृदयतोषणः।

teṣām jyeṣṭhaḥ rāmaḥ abhavat. saḥ ramayāmāsa hi prajāḥ. saḥ dhīmān pituḥ manoharatayā hṛdayatoṣaṇaḥ.

English Translation

The eldest of them, Rāma, delighted the people. The intelligent Rāma satisfied their father's heart with his attractiveness.

०३ २६१ ००७

शास्त्र - *śāstra*

ततः स राजा मतिमान्मत्वात्मानं वयोऽधिकम्।
मन्त्रयामास सचिवैर्धर्मज्ञैश्च पुरोहितैः॥

tataḥ sa rājā matimānmatvātmānaṃ vayo'dhikam.
mantrayāmāsa sacivairdharmajñaiśca purohitaiḥ..

अन्वय - *anvaya*

ततः आत्मानम् वयः अधिकम् मत्वा सः मतिमान् राजा सचिवैः धर्मज्ञैः च पुरोहितैः मन्त्रयामास।

tataḥ ātmānam vayaḥ adhikam matvā saḥ matimān rājā sacivaiḥ dharmajñaiḥ ca purohitaiḥ mantrayāmaāsa.

English Translation

Thus, having thought of himself as more in age, that intelligent King consulted with ministers and dharma-knowing priests.

०३ २६१ ००८

शास्त्र - *śāstra*

अभिषेकाय रामस्य यौवराज्येन भारत।
प्राप्तकालं च ते सर्वे मेनिरे मन्त्रिसत्तमाः॥

abhiṣekāya rāmasya yauvarājyena bhārata.
prāptakālaṃ ca te sarve menire mantrisattamāḥ..

अन्वय - *anvaya*

भारत ते सर्वे मन्त्रिसत्तमाः अमन्यन्त रामस्य अभिषेकाय प्राप्तकालम् यौवराज्येन।

bhārata te sarve mantrisattamāḥ amanyanta rāmasya abhiṣekāya prāptakālam yauvarājyena.

English Translation

O descendant of Bharata! All those chief ministers believed it was time to anointment of Rāma by succession.

०३ २६१ ००९

शास्त्र - *śāstra*

लोहिताक्षं महाबाहुं मत्तमातङ्गगामिनम्।
दीर्घबाहुं महोरस्कं नीलकुञ्चितमूर्धजम्॥

lohitākṣaṃ mahābāhuṃ mattamātaṅgagāminam.
dīrghabāhuṃ mahoraskaṃ nīlakuñcitamūrdhajam..

अन्वय - *anvaya*

लोहिते अक्षिणी महन्तौ बाहू मत्तम् मातंगम् इव गामिनम् दीर्घे बाहू महम् उरः नीलाः कुञ्चिताः मूर्धजाः।

lohite akṣiṇī mahantau bāhū mattam mātaṃgam iva gāminam dīrghe bāhū maham uraḥ nīlāḥ kuñcitāḥ mūrdhajāḥ.

English Translation

Red-eyes, large arms, walking like a rutting elephant, long arms, broad-chested, nīla curled hair of the head.

०३ २६१ ०१०

शास्त्र - *śāstra*

दीप्यमानं श्रिया वीरं शक्रादनवमं बले।
पारगं सर्वधर्माणां बृहस्पतिसमं मतौ॥

dīpyamānaṃ śriyā vīraṃ śakrādanavamaṃ bale.
pāragaṃ sarvadharmāṇāṃ bṛhaspatisamaṃ matau..

अन्वय - *anvaya*

श्रिया दीप्यमानम् वीरम् शक्रात् बले अनवमम् सर्वानाम् धर्माणाम् पारगम् बृहस्पतिना समम् मतौ।

śriyā dīpyamānam vīram śakrāt bale anavamam sarvānām dharmāṇām pāragam bṛhaspatinā samam matau.

English Translation

Shining with happiness, brave, like Indra in strength, profoundly learned in righteousness, like Bṛhaspati in intellect.

०३ २६१ ०११

शास्त्र - *śāstra*

सर्वानुरक्तप्रकृतिं सर्वविद्याविशारदम्।
जितेन्द्रियममित्राणामपि दृष्टिमनोहरम्॥

sarvānuraktaprakṛtiṃ sarvavidyāviśāradam.
jitendriyamamitrāṇāmapi dṛṣṭimanoharam..

अन्वय - *anvaya*

सर्वेभ्यः प्रकृतिना अनुरक्तम् सर्वानाम् विद्यानाम् विशारदम् जितेन्द्रियम् अमित्राणाम् अपि दृष्टये मनोहरम्।

sarvebhyaḥ prakṛtinā anuraktam sarvānām vidyānām viśāradam jitendriyam amitrāṇām api dṛṣṭaye manoharam.

English Translation

Beloved to all by nature, an expert in all studies, one who wins over the senses, pleasing to sight even for enemies.

०३ २६१ ०१२

शास्त्र - *śāstra*

नियन्तारमसाधूनां गोप्तारं धर्मचारिणाम्।
धृतिमन्तमनाधृष्यं जेतारमपराजितम्॥

niyantāramasādhūnāṃ goptāraṃ dharmacāriṇām.
dhṛtimantamanādhṛṣyaṃ jetāramaparājitam..

अन्वय - *anvaya*

नियन्तारम् असाधूनाम् गोप्तारम् धर्मचारिणाम् धृतिमन्तम् अनाधृष्यम् जेतारम् अपराजितम्।

niyantāram asādhūnām goptāram dharmacāriṇām dhṛtimantam anādhṛṣyam jetāram aparājitam.

English Translation

Restrainer of those who are evil, protector of the virtuous, resolute, invincible, victorious, undefeated.

०३ २६१ ०१३

शास्त्र - *śāstra*

पुत्रं राजा दशरथः कौसल्यानन्दवर्धनम्।
संदृश्य परमां प्रीतिमगच्छत्कुरुनन्दन॥

putraṃ rājā daśarathaḥ kausalyānandavardhanam.
saṃdṛśya paramāṃ prītimagacchatkurunandana..

अन्वय - *anvaya*

कौसल्यायाः आनन्दस्य वर्धनम् पुत्रम् संदृश्य राजा दशरथः परमाम् प्रीतिम् अगच्छत् कुरुनन्दन।

kausalyāyāḥ ānandasya vardhanam putram saṃdṛśya rājā daśarathaḥ paramām prītim agacchat kurunandana.

English Translation

O son of the Kurus! Having seen son, the cause of thriving happiness of Kausalyā, Rāma, King Daśaratha went with utmost pleasure.

०३ २६१ ०१४

शास्त्र - *śāstra*

चिन्तयंश्च महातेजा गुणान्रामस्य वीर्यवान्।
अभ्यभाषत भद्रं ते प्रीयमाणः पुरोहितम्॥

cintayaṃśca mahātejā guṇānrāmasya vīryavān.
abhyabhāṣata bhadraṃ te prīyamāṇaḥ purohitam..

अन्वय - *anvaya*

रामस्य गुणान् चिन्तयित्वा भद्रम् ते इति वीर्यवान् राजा दशरथ पुरोहितम् अभ्यभाषत।

rāmasya guṇān cintayitvā bhadram te iti vīryavān rājā daśaratha purohitam abhyabhāṣata.

English Translation

The pleased, valorous King addressed the Purohita, "If you please.", thinking of the virtues of Rāma.

०३ २६१ ०१५

शास्त्र - *śāstra*

अद्य पुष्यो निशि ब्रह्मन्पुण्यं योगमुपैष्यति।
संभाराः संभ्रियन्तां मे रामश्चोपनिमन्त्र्यताम्॥

adya puṣyo niśi brahmanpuṇyaṃ yogamupaiṣyati.
saṃbhārāḥ saṃbhriyantāṃ me rāmaścopanimantryatām..

अन्वय - *anvaya*

ब्रह्मन् अद्य पुष्यः निशि पुण्यम् योगम् उपैष्यति। सम्भाराः सम्भ्रियन्ताम् मे। रामः च उपनिमन्त्र्यताम्।

brahman adya puṣyaḥ niśi puṇyam yogam upaiṣyati.
sambhārāḥ sambhriyantām me. rāmaḥ ca upanimantryatām.

English Translation

"O Brāhman! Tonight, the Puṣya will obtain auspicious arrangement. Prepare what is necessary for me and may Rāma be invited."

०३ २६१ ०१६

शास्त्र - *śāstra*

इति तद्राजवचनं प्रतिश्रुत्याथ मन्थरा।
कैकेयीमभिगम्येदं काले वचनमब्रवीत्॥

iti tadrājavacanaṃ pratiśrutyātha manthara.
kaikeyīmabhigamyedaṃ kāle vacanamabravīt..

अन्वय - *anvaya*

इति तद् राजवचनम् प्रतिश्रुत्य अथ मन्थरा कैकेयीम् अभिगम्य इदम् काले वचनम् अब्रवीत्।

iti tad rājavacanam pratiśrutya atha manthara kaikeyīm abhigamya idam kāle vacanam abravīt.

English Translation

Having heard these King's words, Mantharā approached Kaikeyī and said this.

०३ २६१ ०१७

शास्त्र - *śāstra*

अद्य कैकेयि दौर्भाग्यं राज्ञा ते ख्यापितं महत्।
आशीविषस्त्वां संक्रुद्धश्चण्डो दशति दुर्भगे॥

adya kaikeyi daurbhāgyaṃ rājñā te khyāpitaṃ mahat.
āśīviṣastvāṃ saṃkruddhaścaṇḍo daśati durbhage..

अन्वय - *anvaya*

कैकेयि अद्य महत् ख्यापितम् राज्ञा ते दौर्भाग्यम् आसीत्। दुर्भगे आशीविषः संक्रुद्धः चण्डः त्वाम् दशति।

kaikeyi adya mahat khyāpitam rājñā te daurbhāgyam āsīt. durbhage āśīviṣaḥ saṃkruddhaḥ caṇḍaḥ tvām daśati.

English Translation

"O Kaikeyī! Today, the big announcement by the King is your ill fortune. O, the unfortunate one! The fierce, angry snake venom is biting you."

०३ २६१ ०१८

शास्त्र - *śāstra*

सुभगा खलु कौसल्या यस्याः पुत्रोऽभिषेक्ष्यते।
कुतो हि तव सौभाग्यं यस्याः पुत्रो न राज्यभाक्॥

subhagā khalu kausalyā yasyāḥ putro'bhiṣekṣyate.
kuto hi tava saubhāgyaṃ yasyāḥ putro na rājyabhāk..

अन्वय - *anvaya*

सुभगा खलु कौसल्या यस्याः पुत्रः अभिषेक्ष्यते। कुतः हि तव सौभाग्यम् यस्याः पुत्रः न राज्यभाक्।

subhagā khalu kausalyā yasyāḥ putraḥ abhiṣekṣyate. kutaḥ hi tava saubhāgyam yasyāḥ putraḥ na rājyabhāk.

English Translation

"Kausalyā is indeed fortunate whose son will be consecrated. Where certainly is your fortune, of whose son is without a kingdom?"

०३ २६१ ०१९

शास्त्र - *śāstra*

सा तद्वचनमाज्ञाय सर्वाभरणभूषिता।
वेदीविलग्नमध्येव बिभ्रती रूपमुत्तमम्॥

sā tadvacanamājñāya sarvābharaṇabhūṣitā.
vedīvilagnamadhyeva bibhratī rūpamuttamam..

अन्वय - *anvaya*

सर्वाणि आभरणानि भूषिता कैकेयी। सा वेदीविलग्नमध्या इव बिभ्रती। सा रूपम् उत्तमम्। सा मन्थरायाः वचनम् आजानात्।

sarvāṇi ābharaṇāni bhūṣitā kaikeyī. sā vedīvilagnamadhyā iva bibhratī. sā rūpam uttamam. sā mantharāyāḥ vacanam ājānāt.

English Translation

Thin-waisted, most beautiful Kaikeyī, bearing all the ornaments, understood that words.

०३ २६१ ०२०

शास्त्र - *śāstra*

विविक्ते पतिमासाद्य हसन्तीव शुचिस्मिता।
प्रणयं व्यञ्जयन्तीव मधुरं वाक्यमब्रवीत्॥

vivikte patimāsādya hasantīva śucismitā.
praṇayaṃ vyañjayantīva madhuraṃ vākyamabravīt..

अन्वय - *anvaya*

विविक्ते प्रणयम् पतिम् आसाद्य शुचिस्मिता हसन्ती व्यञ्जयन्ती कैकेयी मधुरम् वाक्यम् अब्रवीत्।

vivikte praṇayam patim āsādya śucismitā hasantī vyañjayantī kaikeyī madhuram vākyam abravīt.

English Translation

Reaching her beloved husband in solitude, smiling, laughing, and thoroughly anointed, Kaikeyī said the sweet words.

०३ २६१ ०२१

शास्त्र - *śāstra*

सत्यप्रतिज्ञ यन्मे त्वं काममेकं निसृष्टवान्।
उपाकुरुष्व तद्राजंस्तस्मान्मुच्यस्व संकटात्॥

satyapratijña yanme tvaṃ kāmamekaṃ nisṛṣṭavān.
upākuruṣva tadrājaṃstasmānmucyasva saṃkaṭāt..

अन्वय - *anvaya*

सत्यप्रतिज्ञ यत् मे त्वम् निसृष्टवान् तद् एकम् कामम् उपाकुरुष्व। राजन् तस्मात् मुच्यस्व संकटात्।

satyapratijña yat me tvam nisṛṣṭavān tad ekam kāmam upākuruṣva. rājan tasmāt mucyasva saṃkaṭāt.

English Translation

“O one who is faithful to his promise! That which you had bestowed to me, may you grant that one wish. O King! From that, you may be freed from critical condition.”

०३ २६१ ०२२

शास्त्र - *śāstra*

राजोवाच
वरं ददानि ते हन्त तद्गृहाण यदिच्छसि।
अवध्यो वध्यतां कोऽद्य वध्यः कोऽद्य विमुच्यताम्॥

rājovāca
varaṃ dadāni te hanta tadgṛhāṇa yadicchasi.
avadhyo vadhyatāṃ ko'dya vadhyaḥ ko'dya vimucyatām..

अन्वय - *anvaya*

वरम् ददानि ते हन्त। यद् इच्छसि तद् गृहाण। कः अवध्यः वध्यताम् अद्य। कः वध्यः अद्य विमुच्यताम्।

varam dadāni te hanta. yad icchasi tad gṛhāṇa. kaḥ avadhyaḥ vadhyatām adya. kaḥ vadhyaḥ adya vimucyatām.

English Translation

King Daśaratha said: I grant the boon to you! Whatever you wish, you get that. Which unbounded one be bound today? Which bounded one be freed today?

०३ २६१ ०२३

शास्त्र - *śāstra*

धनं ददानि कस्याद्य ह्रियतां कस्य वा पुनः।
ब्राह्मणस्वादिहान्यत्र यत्किंचिद्वित्तमस्ति मे॥

dhanaṃ dadāni kasyādya hriyatāṃ kasya vā punaḥ.
brāhmaṇasvādihānyatra yatkiṃcidvittamasti me..

अन्वय - *anvaya*

कस्मै अद्य अहम् धनम् ददानि। इह ब्राह्मणस्वात् अन्यत्र यत् किंचित् वित्तम् मे अस्ति कस्य पुनः ह्रियताम्।

kasmai adya aham dhanam dadāni. iha brāhmaṇasvāt anyatra yat kiṃcit vittam me asti kasya punaḥ hriyatām.

English Translation

Of whose wealth I give today? Or except the Brāhmaṇas here, whatever is my possession, of whom shall it be taken back?

०३ २६१ ०२४

शास्त्र - *śāstra*

मार्कण्डेय उवाच।
सा तद्वचनमाज्ञाय परिगृह्य नराधिपम्।
आत्मनो बलमाज्ञाय तत एनमुवाच ह॥

mārkaṇḍeya uvāca.
sā tadvacanamājñāya parigṛhya narādhipam.
ātmano balamājñāya tata enamuvāca ha..

अन्वय - *anvaya*

कैकेयी राज्ञः वचनम् आजानात्। सा नराधिपम् दशरथम् परिगृह्य आत्मनः च बलम् आज्ञाय इदम् वचनम् अब्रवीत्।

kaikeyī rājñaḥ vacanam ājānāt. sā narādhipam daśaratham parigṛhya ātmanaḥ ca balam ājñāya idam vacanam abravīt.

English Translation

Mārkaṇḍeya said: She, having understood those words and having regarded the King, gathered her strength and said this.

०३ २६१ ०२५

शास्त्र - *śāstra*

आभिषेचनिकं यत्ते रामार्थमुपकल्पितम्।
भरतस्तदवाप्नोतु वनं गच्छतु राघवः॥

ābhiṣecanikaṃ yatte rāmārthamupakalpitam.
bharatastadavāpnotu vanaṃ gacchatu rāghavaḥ..

अन्वय - *anvaya*

यद् रामस्य राज्याभिषेकाय उपकल्पितम् तद् भरतः अवाप्नोतु राघवः च वनम् गच्छतु।

yad rāmasya rājyābhiṣekāya upakalpitam tad bharataḥ avāpnotu rāghavaḥ ca vanam gacchatu.

English Translation

“Let Bharata obtain what was arranged for Rāma’s coronation, and Rāghava go to the forest.”

०३ २६१ ०२६

शास्त्र - *śāstra*

स तद्राजा वचः श्रुत्वा विप्रियं दारुणोदयम्।
दुःखार्तो भरतश्रेष्ठ न किंचिद्व्याजहार ह॥

sa tadrājā vacaḥ śrutvā vipriyaṃ dāruṇodayam.
duḥkhārto bharataśreṣṭha na kiṃcidvyājahāra ha..

अन्वय - *anvaya*

भरतश्रेष्ठ युधिष्ठिर तद् विप्रियम् दारुणोदयम् वचः श्रुत्वा सः दुखार्तः राजा न किंचित् व्याजहार ह।

bharataśreṣṭha yudhiṣṭhira tad vipriyam dāruṇodayam vacaḥ śrutvā saḥ dukhārtaḥ rājā na kiṃcit vyājahāra ha.

English Translation

O, the best of Bharata! Having heard those unpleasant, harsh-arising words, that saddened King did not utter anything.

०३ २६१ ०२७

शास्त्र - *śāstra*

ततस्तथोक्तं पितरं रामो विज्ञाय वीर्यवान्।
वनं प्रतस्थे धर्मात्मा राजा सत्यो भवत्विति॥

tatastathoktaṃ pitaraṃ rāmo vijñāya vīryavān.
vanaṃ pratasthe dharmātmā rājā satyo bhavatviti..

अन्वय - *anvaya*

ततः तथा उक्तम् पितरम् विज्ञाय धर्मात्मा च राजा सत्यः भवतु इति चिन्तयित्वा वीर्यवान् रामः वनम् प्रतस्थे।

tataḥ tathā uktam pitaram vijñāya dharmātmā ca rājā satyaḥ bhavatu iti cintayitvā vīryavān rāmaḥ vanam pratasthe.

English Translation

Therefore, having understood that father was spoken this way and having thought, "May the King be truthful.", brave Rāma departed to the forest.

०३ २६१ ०२८

शास्त्र - *śāstra*

तमन्वगच्छल्लक्ष्मीवान्धनुष्मालॣ्लक्ष्मणस्तदा।
सीता च भार्या भद्रं ते वैदेही जनकात्मजा॥

tamanvagacchallakṣmīvāndhanuṣmālālakṣmaṇastadā.
sītā ca bhāryā bhadraṃ te vaidehī janakātmajā..

अन्वय - *anvaya*

तदा लक्ष्मीवान् धनुष्मान् लक्ष्मणः सीता च भार्या वैदेही जनकात्मजा तम् रामम् अन्वगच्छन्। भद्रम् ते।

tadā lakṣmīvān dhanuṣmān lakṣmaṇaḥ sītā ca bhāryā vaidehī janakātmajā tam rāmam anvagacchan. bhadram te.

English Translation

Then, the prosperous bow-bearing Lakṣmaṇa and wife Sītā followed him. Prosperity to them!

०३ २६१ ०२९

शास्त्र - *śāstra*

ततो वनं गते रामे राजा दशरथस्तदा।
समयुज्यत देहस्य कालपर्यायधर्मणा॥

tato vanaṃ gate rāme rājā daśarathastadā.
samayujyata dehasya kālaparyāyadharmaṇā..

अन्वय - *anvaya*

ततः वनम् गते रामे तदा राजा दशरथः देहस्य कालपर्यायेण धर्मणा समयुज्यत। तस्य आत्मा शरीरम् अत्यजत्।

tataḥ vanam gate rāme tadā rājā daśarathaḥ dehasya kālaparyāyeṇa dharmaṇā samayujyata. tasya ātmā śarīram atyajat.

English Translation

Therefore, when Rāma went to the forest, King Daśaratha was united with the time-expiring nature of the body.

०३ २६१ ०३०

शास्त्र - *śāstra*

रामं तु गतमाज्ञाय राजानं च तथागतम्।
आनाय्य भरतं देवी कैकेयी वाक्यमब्रवीत्॥

rāmaṃ tu gatamājñāya rājānaṃ ca tathāgatam.
ānāyya bharataṃ devī kaikeyī vākyamabravīt..

अन्वय - *anvaya*

रामम् गतम् राजानम् च तथागतम् आज्ञाय भरतम् च आनाय्य देवी कैकेयी तस्मै वाक्यम् अब्रवीत्।

rāmam gatam rājānam ca tathāgatam ājñāya bharatam ca ānāyya devī kaikeyī tasmai vākyam abravīt.

English Translation

Having noticed Rāma's departure and such a condition of the King, Kaikeyī bought together Bharata and said this statement.

०३ २६१ ०३१

शास्त्र - *śāstra*

गतो दशरथः स्वर्गं वनस्थौ रामलक्ष्मणौ।
गृहाण राज्यं विपुलं क्षेमं निहतकण्टकम्॥

gato daśarathaḥ svargaṃ vanasthau rāmalakṣmaṇau.
gṛhāṇa rājyaṃ vipulaṃ kṣemaṃ nihatakaṇṭakam..

अन्वय - *anvaya*

दशरथः स्वर्गम् गतः। रामलक्ष्मणौ वनस्थौ। राज्यम् विपुलम् क्षेमम् निहतकण्टकम् गृहाण।

daśarathaḥ svargam gataḥ. rāmalakṣmaṇau vanasthau. rājyam vipulam kṣemam nihatakaṇṭakam gṛhāṇa.

English Translation

"Daśaratha went to heaven. Rāma and Lakṣmaṇa are forest dwellers. Take the large and safe kingdom whose thorns have been struck down."

०३ २६१ ०३२

शास्त्र - *śāstra*

तामुवाच स धर्मात्मा नृशंसं बत ते कृतम्।
पतिं हत्वा कुलं चेदमुत्साद्य धनलुब्धया॥

tāmuvāca sa dharmātmā nṛśaṃsaṃ bata te kṛtam.
patiṃ hatvā kulaṃ cedamutsādya dhanalubdhayā..

अन्वय - *anvaya*

बत तव कृतम् नृशंसम्। धनम् लब्धुम् त्वया पतिम् हता इदम् च कुलम् अभिद्यत। इति सः धर्मात्मा भरतः ताम् कैकेयीम् उवाच।

bata tava kṛtam nṛśaṃsam. dhanam labdhum tvayā patim hatā idam ca kulam abhidyata. iti saḥ dharmātmā bharataḥ tām kaikeyīm uvāca.

English Translation

The virtuous Bharata told Kaikeyi - "Alas! What a cruel act! Your husband was killed, and this family was destroyed by your greed of wealth."

०३ २६१ ०३३

शास्त्र - *śāstra*

अयशः पातयित्वा मे मूर्ध्नि त्वं कुलपांसने।
सकामा भव मे मातरित्युक्त्वा प्ररुरोद ह॥

ayaśaḥ pātayitvā me mūrdhni tvaṃ kulapāṃsane.
sakāmā bhava me mātarityuktvā prararuroda ha..

अन्वय - *anvaya*

अयशः पातयित्वा मे त्वम् मूर्ध्नि कुलपांसने। सकामा भव मे मातर्। इति उक्त्वा प्ररुरोद ह।

ayaśaḥ pātayitvā me tvam mūrdhni kulapāṃsane. sakāmā bhava me mātar. iti uktvā prarurodа ha.

English Translation

"Having caused disgrace to fall to me, you are the foremost in breaking of family. O, my mother! Be content." Having said this, he indeed lamented.

०३ २६१ ०३४

शास्त्र - *śāstra*

स चारित्रं विशोध्याथ सर्वप्रकृतिसंनिधौ।
अन्वयाद्भ्रातरं रामं विनिवर्तनलालसः॥

sa cāritraṃ viśodhyātha sarvaprakṛtisaṃnidhau.
anvayādbhrātaraṃ rāmaṃ vinivartanalālasaḥ..

अन्वय - *anvaya*

अथ चारित्रम् विशोध्य सः भरतः विनिवर्तनलालसः सर्वप्रकृतिसंनिधौ भ्रातरम् रामम् अन्वयात्।

atha cāritram viśodhya saḥ bharataḥ vinivartanalālasaḥ sarvaprakṛtisaṃnidhau bhrātaram rāmam anvayāt.

English Translation

Then, having purified his reputation, he, ardently desirous of return, in the presence of all the subjects, went after Brother Rāma.

०३ २६१ ०३५

शास्त्र - *śāstra*

कौसल्यां च सुमित्रां च कैकेयीं च सुदुःखितः।
अग्रे प्रस्थाप्य यानैः स शत्रुघ्नसहितो ययौ॥

kausalyāṃ ca sumitrāṃ ca kaikeyīṃ ca suduḥkhitaḥ.
agre prasthāpya yānaiḥ sa śatrughnasahito yayau..

अन्वय - *anvaya*

कौसल्याम् च सुमित्राम् च कैकेयीम् च अग्रे प्रस्थाप्य यानैः सः सुदुःखितः शत्रुघ्नसहितः ययौ।

kausalyām ca sumitrām ca kaikeyīm ca agre prasthāpya yānaiḥ saḥ suduḥkhitaḥ śatrughnasahitaḥ yayau.

English Translation

Having sent Kausalyā, Sumitrā, and Kaikeyī in front, he, saddened and accompanied by Śatrughna, went with vehicles.

०३ २६१ ०३६

शास्त्र - *śāstra*

वसिष्ठवामदेवाभ्यां विप्रैश्चान्यैः सहस्रशः।
पौरजानपदैः सार्धं रामानयनकाङ्क्षया॥

vasiṣṭhavāmadevābhyāṃ vipraiścānyaiḥ sahasraśaḥ.
paurajānapadaiḥ sārdhaṃ rāmānayanakāṅkṣayā..

अन्वय - *anvaya*

वसिष्ठेन वामदेवेन विप्रैः च सहस्रशः अन्यैः पौरैः जानपदैः च सार्धम् रामानयनकाङ्क्षया।

vasiṣṭhena vāmadevena vipraiḥ ca sahasraśaḥ anyaiḥ pauraiḥ jānapadaiḥ ca sārdham rāmānayanakāṅkṣayā.

English Translation

Along with Vasiṣṭha, Vāmadeva, thousands of other sages, citizens, and countrymen desirous of return of Rāma.

०३ २६१ ०३७

शास्त्र - *śāstra*

ददर्श चित्रकूटस्थं स रामं सहलक्ष्मणम्।
तापसानामलंकारं धारयन्तं धनुर्धरम्॥

dadarśa citrakūṭastthaṃ sa rāmaṃ sahalakṣmaṇam.
tāpasānāmalaṃkāraṃ dhārayantaṃ dhanurdharam..

अन्वय - *anvaya*

सः अलंकारम् धारयन्तम् रामम् सहलक्ष्मणम् धनुर्धरम् चित्रकूटस्थम् तापसानाम् ददर्श।

saḥ alaṃkāram dhārayantam rāmam sahalakṣmaṇam dhanurdharam citrakūṭastham tāpasānām dadarśa.

English Translation

He saw ornament-bearing Rāma in Citrakūṭa amongst ones practising austerities with Lakṣmaṇa with bows.

०३ २६१ ०३८

शास्त्र - *śāstra*

विसर्जितः स रामेण पितुर्वचनकारिणा।
नन्दिग्रामेऽकरोद्राज्यं पुरस्कृत्यास्य पादुके॥

visarjitaḥ sa rāmeṇa piturvacanakāriṇā.
nandigrāme'karodrājyaṃ puraskṛtyāsya pāduke..

अन्वय - *anvaya*

सः विसर्जितः पितुः वचनकारिणा रामेण नन्दिग्रामे राज्यम् अकरोत् रामस्य पादुके पुरस्कृत्य।

saḥ visarjitaḥ pituḥ vacanakāriṇā rāmeṇa nandigrāme rājyam akarot rāmasya pāduke puraskṛtya.

English Translation

After being sent back by Rāma due to his father's promise, he ruled from Nandigrāma, putting Rāma's slippers in front.

०३ २६१ ०३९

शास्त्र - *śāstra*

रामस्तु पुनराशङ्क्य पौरजानपदागमम्।
प्रविवेश महारण्यं शरभङ्गाश्रमं प्रति॥

rāmastu punarāśaṅkya paurajānapadāgamam.
praviveśa mahāraṇyaṃ śarabhaṅgāśramaṃ prati..

अन्वय - *anvaya*

पौराणाम् जानपदानाम् च आगमम् पुनराशङ्क्य रामः महारण्यम् ऋषेः शरभङ्गस्य आश्रमम् प्रति प्रविवेश।

paurāṇām jānapadānām ca āgamam punarāśaṅkya rāmaḥ mahāraṇyam ṛṣeḥ śarabhaṅgasya āśramam prati praviveśa.

English Translation

Having suspected the coming of citizens and countrymen, Rāma entered the great forest towards the hermitage of Ṛṣi Śarabhaṅga.

०३ २६१ ०४०

शास्त्र - *śāstra*

सत्कृत्य शरभङ्गं स दण्डकारण्यमाश्रितः।
नदीं गोदावरीं रम्यामाश्रित्य न्यवसत्तदा॥

satkṛtya śarabhaṅgaṃ sa daṇḍakāraṇyamāśritaḥ.
nadīṃ godāvarīṃ ramyāmāśritya nyavasattadā..

अन्वय - *anvaya*

शरभङ्गम् सत्कृत्य सः दण्डकारण्यम् आश्रितः। नदीम् गोदावरीम् रम्याम् आश्रित्य तदा न्यवसत्।

śarabhaṅgam satkṛtya saḥ daṇḍakāraṇyam āśritaḥ.
nadīm godāvarīm ramyām āśritya tadā nyavasat.

English Translation

Having treated Śarabhaṅga with respect, he dwelled in Daṇḍaka forest. Having dwelled at the pleasant Godāvarī river, then he stayed.

०३ २६१ ०४१

शास्त्र - *śāstra*

वसतस्तस्य रामस्य ततः शूर्पणखाकृतम्।
खरेणासीन्महद्वैरं जनस्थाननिवासिना॥

vasatastasya rāmasya tataḥ śūrpaṇakhākṛtam.
khareṇāsīnmahadvairaṃ janasthānanivāsinā..

अन्वय - *anvaya*

ततः वसतः तस्य रामस्य शूर्पणख्या कृतम् महत् वैरम् जनस्थाननिवासिना खरेण आसीत्।

tataḥ vasataḥ tasya rāmasya śūrpaṇakhyā kṛtam mahat vairam janasthānanivāsinā khareṇa āsīt.

English Translation

Then, there was a great enmity of forest-dwelling Rāma with Khara, who lived in Janasthāna due to the actions of Śūrpaṇkhā.

०३ २६१ ०४२

शास्त्र - *śāstra*

रक्षार्थं तापसानां च राघवो धर्मवत्सलः।
चतुर्दश सहस्राणि जघान भुवि रक्षसाम्॥

rakṣārthaṃ tāpasānāṃ ca rāghavo dharmavatsalaḥ.
caturdaśa sahasrāṇi jaghāna bhuvi rakṣasām..

अन्वय - *anvaya*

तापसानाम् रक्षार्थम् च राघवः धर्मवत्सलः चतुर्दश सहस्राणि रक्षसाम् भुवि जघान।

tāpasānām rakṣārtham ca rāghavaḥ dharmavatsalaḥ
caturdaśa sahasrāṇi rakṣasām bhuvi jaghāna.

English Translation

And for the protection of the ones practising austerities, Rāghava, who was devoted to his duties, killed fourteen-thousand of Rākṣasas on earth.

०३ २६१ ०४३

शास्त्र - *śāstra*

दूषणं च खरं चैव निहत्य सुमहाबलौ।
चक्रे क्षेमं पुनर्धीमान्धर्मारण्यं स राघवः॥

dūṣaṇaṃ ca kharaṃ caiva nihatya sumahābalau.
cakre kṣemaṃ punardhīmāndharmāraṇyaṃ sa rāghavaḥ..

अन्वय - *anvaya*

सुमहाबलौ दूषणम् च खरम् च एव निहत्य सः धीमान् राघवः धर्मारण्यम् क्षेमम् पुनः चक्रे।

sumahābalau dūṣaṇam ca kharam ca eva nihatya saḥ dhīmān rāghavaḥ dharmāraṇyam kṣemam punaḥ cakre.

English Translation

Having killed very powerful Dūṣaṇa and Khara certainly, that intelligent Rāghava again made the forest safe and righteous.

०३ २६१ ०४४

शास्त्र - *śāstra*

हतेषु तेषु रक्षःसु ततः शूर्पणखा पुनः।
ययौ निकृत्तनासोष्ठी लङ्कां भ्रातुर्निवेशनम्॥

hateṣu teṣu rakṣaḥsu tataḥ śūrpaṇakhā punaḥ.
yayau nikṛttanāsoṣṭhī laṅkāṃ bhrāturniveśanam..

अन्वय - *anvaya*

ततः हतेषु तेषु रक्षःसु निकृत्तनासोष्ठी शूर्पणखा पुनः ययौ लङ्काम् भ्रातुः निवेशनम्।

tataḥ hateṣu teṣu rakṣaḥsu nikṛttanāsoṣṭhī śūrpaṇakhā punaḥ yayau laṅkām bhrātuḥ niveśanam.

English Translation

Then, when those demons were killed, Śūrpaṇakhā, with cut-off nose and lips, again went to the resting place of her brother, Laṅkā.

०३ २६१ ०४५

शास्त्र - *śāstra*

ततो रावणमभ्येत्य राक्षसी दुःखमूर्छिता।
पपात पादयोर्भ्रातुः संशुष्करुधिराननना॥

tato rāvaṇamabhyetya rākṣasī duḥkhamūrchitā.
papāta pādayorbhrātuḥ saṃśuṣkarudhirānanā..

अन्वय - *anvaya*

ततः रावणम् अभ्येत्य संशुष्केण रुधिरेण आनना राक्षसी दुःखेन मूर्छिता पपात पादयोः भ्रातुः।

tataḥ rāvaṇam abhyetya saṃśuṣkeṇa rudhireṇa ānanā rākṣasī duḥkhena mūrchitā papāta pādayoḥ bhrātuḥ.

English Translation

Then, having approached Rāvaṇa, the demoness, with their face completely dried with blood and filled with sadness, fell on the legs of their brother.

०३ २६१ ०४६

शास्त्र - *śāstra*

तां तथा विकृतां दृष्ट्वा रावणः क्रोधमूर्छितः।
उत्पपातासनात्क्रुद्धो दन्तैर्दन्तानुपस्पृशन्॥

tāṃ tathā vikṛtāṃ dṛṣṭvā rāvaṇaḥ krodhamūrchitaḥ.
utpapātāsanātkruddho dantairdantānupaspṛśan..

अन्वय - *anvaya*

ताम् तथा विकृताम् दृष्ट्वा क्रोधमूर्छितः क्रुद्धः दन्तैः दन्तान् उपस्पृशन् रावणः आसनात् उत्पपात।

tām tathā vikṛtām dṛṣṭvā krodhamūrchitaḥ kruddhaḥ dantaiḥ dantān upaspṛśan rāvaṇaḥ āsanāt utpapāta.

English Translation

Having seen her deformed in this way, angry and irritated, Rāvana jumped from his seat with his teeth touching each other.

०३ २६१ ०४७

शास्त्र - *śāstra*

स्वानमात्यान्विसृज्याथ विविक्ते तामुवाच सः।
केनास्येवं कृता भद्रे मामचिन्त्यावमन्य च॥

svānamātyānvisṛjyātha vivikte tāmuvāca saḥ.
kenāsyevaṃ kṛtā bhadre māmacintyāvamanya ca..

अन्वय - *anvaya*

स्वान् अमात्यान् विसृज्य अथ सः ताम् विविक्ते उवाच। केन असि एवम् कृता भद्रे माम् अचिन्त्य अवमन्य च इति।

svān amātyān visṛjya atha saḥ tām vivikte uvāca.
kena asi evam kṛtā bhadre mām acintya avamanya ca iti.

English Translation

Having sent out his own ministers, he spoke to her in isolation - "O lady! By whom are you done in this way without knowing and despising me?"

०३ २६१ ०४८

शास्त्र - *śāstra*

कः शूलं तीक्ष्णमासाद्य सर्वगात्रैर्निषेवते।
कः शिरस्यग्निमादाय विश्वस्तः स्वपते सुखम्॥

kaḥ śūlaṃ tīkṣṇamāsādya sarvagātrairniṣevate.
kaḥ śirasyagnimādāya viśvastaḥ svapate sukham..

अन्वय - *anvaya*

कः शूलम् तीक्ष्णम् आसाद्य सर्वगात्रैः निषेवते। कः शिरसि अग्निम् आदाय विश्वस्तः स्वपते सुखम्।

kaḥ śūlam tīkṣṇam āsādya sarvagātraiḥ niṣevate. kaḥ śirasi agnim ādāya viśvastaḥ svapate sukham.

English Translation

“Having put down a sharp spear, who worships with all the limbs? Having put fire on the head, who sleeps unbothered with peace?”

०३ २६१ ०४९

शास्त्र - *śāstra*

आशीविषं घोरतरं पादेन स्पृशतीह कः।
सिंहं केसरिणं कश्च दंष्ट्रासु स्पृश्य तिष्ठति॥

āśīviṣaṃ ghorataraṃ pādena spṛśatīha kaḥ.
siṃhaṃ kesariṇaṃ kaśca daṃṣṭrāsu spṛśya tiṣṭhati..

अन्वय - *anvaya*

आशीविषम् घोरतरम् पादेन स्पृशति इह कः। सिंहम् केसरिणम् दंष्ट्रासु स्पृश्य कः तिष्ठति।

āśīviṣam ghorataram pādena spṛśati iha kaḥ. siṃham kesariṇam daṃṣṭrāsu spṛśya kaḥ tiṣṭhati.

English Translation

“Who here touches very terrible snake venom with the foot? And who stands having touched the teeth of a lion?”

०३ २६१ ०५०

शास्त्र - *śāstra*

इत्येवं ब्रुवतस्तस्य स्रोतोभ्यस्तेजसोऽर्चिषः।
निश्चेरुर्दह्यतो रात्रौ वृक्षस्येव स्वरन्ध्रतः॥

ityevaṃ bruvatastasya srotobhyastejaso’rciṣaḥ.
niścerurdahyato rātrau vṛkṣasyeva svarandhrataḥ..

अन्वय - *anvaya*

इति एवम् उक्त्वा तस्य स्रोतोभ्यः तेजसः अर्चिंषि रात्रौ दह्यतः स्वरन्ध्रतः वृक्षः इव निश्चेरुः।

iti evam uktvā tasya srotobhyaḥ tejasaḥ arciṃṣi rātrau dahyataḥ svarandhrataḥ vṛkṣaḥ iva niśceruḥ.

English Translation

In this way, the lustre of the flame from sense-organs rose like that of from slits of a burning tree at night.

०३ २६१ ०५१

शास्त्र - *śāstra*

तस्य तत्सर्वमाचख्यौ भगिनी रामविक्रमम्।
खरदूषणसंयुक्तं राक्षसानां पराभवम्॥

tasya tatsarvamācakhyau bhaginī rāmavikramam.
kharadūṣaṇasaṃyuktaṃ rākṣasānāṃ parābhavam..

अन्वय - *anvaya*

तस्य भगिनी आचख्यौ तत्सर्वम् रामविक्रमम् खरदूषणसंयुक्तम् राक्षसानाम् पराभवम्।

tasya bhaginī ācakhyau tatsarvam rāmavikramam kharadūṣaṇasaṃyuktam rākṣasānām parābhavam.

English Translation

His sister told everything about the strength of Rāma and the defeat of the demons along with Khara and Dūṣaṇa.

०३ २६१ ०५२

शास्त्र - *śāstra*

स निश्चित्य ततः कृत्यं स्वसारमुपसान्त्व्य च।
ऊर्ध्वमाचक्रमे राजा विधाय नगरे विधिम्॥

sa niścitya tataḥ kṛtyaṃ svasāramupasāntvya ca.
ūrdhvamācakrame rājā vidhāya nagare vidhim..

अन्वय - *anvaya*

ततः सः निश्चित्य कृत्यम् स्वसारम् उपसान्त्व्य नगरे विधिम् विधाय राजा ऊर्ध्वम् आचक्रमे।

tataḥ saḥ niścitya kṛtyam svasāram upasāntvya nagare vidhim vidhāya rājā ūrdhvam ācakrame.

English Translation

Then, having decided what to do, consoling his sister and issuing an ordinance in the city, the King stepped upwards.

०३ २६१ ०५३

शास्त्र - *śāstra*

त्रिकूटं समतिक्रम्य कालपर्वतमेव च।
ददर्श मकरावासं गम्भीरोदं महोदधिम्॥

trikūṭaṃ samatikramya kālaparvatameva ca.
dadarśa makarāvāsaṃ gambhīrodaṃ mahodadhim..

अन्वय - *anvaya*

त्रिकूटम् कालपर्वतम् च समतिक्रम्य रावणः मकरावासम् गम्भीरोदम् महोदधिम् ददर्श।

trikūṭam kālaparvatam ca samatikramya rāvaṇaḥ makarāvāsam gambhīrodam mahodadhim dadarśa.

English Translation

He crossed the Trikūṭa and Kālaparvata mountains and saw the great, deep, and fishy ocean.

०३ २६१ ०५४

शास्त्र - *śāstra*

तमतीत्याथ गोकर्णमभ्यगच्छद्दशाननः।
दयितं स्थानमव्यग्रं शूलपाणेर्महात्मनः॥

tamatītyātha gokarṇamabhyagacchaddaśānanaḥ.
dayitaṃ sthānamavyagraṃ śūlapāṇermahātmanaḥ..

अन्वय - *anvaya*

अथ तम् अतीत्य दशाननः शूलपाणेः महात्मनः शिवस्य दयितम् स्थानम् अव्यग्रम् गोकर्णम् अभ्यगच्छत्।

atha tam atītya daśānanaḥ śūlapāṇeḥ mahātmanaḥ śivasya dayitam sthānam avyagram gokarṇam abhyagacchat.

English Translation

Then, having passed over that mountain, Daśānana reached Gokarṇa, the undisturbed beloved place of the great spear-bearer Lord Śiva.

०३ २६१ ०५५

शास्त्र - *śāstra*

तत्राभ्यगच्छन्मारीचं पूर्वामात्यं दशाननः।
पुरा रामभयादेव तापस्यं समुपाश्रितम्॥

tatrābhyagacchanmārīcaṃ pūrvāmātyaṃ daśānanaḥ.
purā rāmabhayādeva tāpasyaṃ samupāśritam..

अन्वय - *anvaya*

तत्र दशाननः रावणः पूर्वम् अमात्यम् पुरा रामभयात् एव तापस्यम् समुपाश्रितम् मारीचम् अभ्यगच्छत्।

tatra daśānanaḥ rāvaṇaḥ pūrvam amātyam purā rāmabhayāt eva tāpasyam samupāśritam mārīcam abhyagacchat.

English Translation

There, Daśānana approached his former minister, Mārīca, who had indeed resorted to asceticism earlier from the fear of Rāma.

— ०६ —

०३ २६२

असतो मा सद्गमय।
तमसो मा ज्योतिर्गमय।
मृत्योर्मामृतं गमय॥
ॐ शान्तिः शान्तिः शान्तिः॥

०३ २६२ ००१

शास्त्र - *śāstra*

मार्कण्डेय उवाच।
मारीचस्त्वथ संभ्रान्तो दृष्ट्वा रावणमागतम्।
पूजयामास सत्कारैः फलमूलादिभिस्तथा॥

mārkaṇḍeya uvāca.
mārīcastvatha saṃbhrānto dṛṣṭvā rāvaṇamāgatam.
pūjayāmāsa satkāraiḥ phalamūlādibhistathā..

अन्वय - *anvaya*

अथ रावणम् आगतम् दृष्ट्वा मारीचः सम्भ्रान्तः पूजयामास सत्कारैः फलमूलादिभिः तथा।

atha rāvaṇam āgatam dṛṣṭvā mārīcaḥ sambhrāntaḥ pūjayāmāsa satkāraiḥ phalamūlādibhiḥ tathā.

English Translation

Mārkaṇḍeya said: Thus, having watched the coming Rāvaṇa, confused Mārīca honored him with hospitability, fruits, and roots.

०३ २६२ ००२

शास्त्र - *śāstra*

विश्रान्तं चैनमासीनमन्वासीनः स राक्षसः।
उवाच प्रश्रितं वाक्यं वाक्यज्ञो वाक्यकोविदम्॥

viśrāntaṃ cainamāsīnamanvāsīnaḥ sa rākṣasaḥ.
uvāca praśritaṃ vākyaṃ vākyajño vākyakovidam..

अन्वय - *anvaya*

विश्रान्तम् च एनम् वाक्यकोविदम् आसीनम् सः अन्वासीनः राक्षसः मारीचः वाक्यज्ञः उवाच प्रश्रितम् वाक्यम्।

viśrāntam ca enam vākyakovidam āsīnam saḥ anvāsīnaḥ rākṣasaḥ mārīcaḥ vākyajñaḥ uvāca praśritam vākyam.

English Translation

The Rākṣasa, a knower of words, humbly said this statement after sitting down to that, who was seated and rested and skilled in words.

०३ २६२ ००३

शास्त्र - *śāstra*

न ते प्रकृतिमान्वर्णः कच्चित्क्षेमं पुरे तव।
कच्चित्प्रकृतयः सर्वा भजन्ते त्वां यथा पुरा॥

na te prakṛtimānvarṇaḥ kaccitkṣemaṃ pure tava.
kaccitprakṛtayaḥ sarvā bhajante tvāṃ yathā purā..

अन्वय - *anvaya*

न ते प्रकृतिमान् वर्णः। कच्चिद् क्षेमम् पुरे तव। कच्चिद् प्रकृतयः सर्वाः भजन्ते त्वाम् यथा पुरा।

na te prakṛtimān varṇaḥ. kaccid kṣemam pure tava.
kaccid prakṛtayaḥ sarvāḥ bhajante tvām yathā purā.

English Translation

"Your natural colour is not there. Is there security in your city? Do all the people honour you like earlier?"

०३ २६२ ००४

शास्त्र - *śāstra*

किमिहागमने चापि कार्यं ते राक्षसेश्वर।
कृतमित्येव तद्विद्धि यद्यपि स्यात्सुदुष्करम्॥

kimihāgamane cāpi kāryaṃ te rākṣaseśvara.
kṛtamityeva tadviddhi yadyapi syātsuduṣkaram..

अन्वय - *anvaya*

राक्षसेश्वर किम् इह आगमने ते कार्यम् कृतम् इति यदि अपि सुदुष्करम् स्यात् तद् विद्धि एव।

rākṣaseśvara kim iha āgamane te kāryam kṛtam iti yadi api suduṣkaram syāt tad viddhi eva.

English Translation

"O lord of the demons! What work should be done when you come here? Know it done even if it is tough."

०३ २६२ ००५

शास्त्र - *śāstra*

शशंस रावणस्तस्मै तत्सर्वं रामचेष्टितम्।
मारीचस्त्वब्रवीच्छ्रुत्वा समासेनैव रावणम्॥

śaśaṃsa rāvaṇastasmai tatsarvaṃ rāmaceṣṭitam.
mārīcastvabravīcchrutvā samāsenaiva rāvaṇam..

अन्वय - *anvaya*

शशंस रावणः तस्मै तत्सर्वम् रामचेष्टितम्। समासेन एव रावणम् श्रुत्वा मारीचः अब्रवीत्।

śaśaṃsa rāvaṇaḥ tasmai tatsarvam rāmaceṣṭitam.
samāsena eva rāvaṇam śrutvā mārīcaḥ abravīt.

English Translation

Rāvaṇa recited to him all that Rāma did. Having indeed heard Rāvaṇa in totality, Mārīca said.

०३ २६२ ००६

शास्त्र - *śāstra*

अलं ते राममासाद्य वीर्यज्ञो ह्यस्मि तस्य वै।
बाणवेगं हि कस्तस्य शक्तः सोढुं महात्मनः॥

alaṃ te rāmamāsādya vīryajño hyasmi tasya vai.
bāṇavegaṃ hi kastasya śaktaḥ soḍhuṃ mahātmanaḥ..

अन्वय - *anvaya*

अलम् त्वया रामम् आसाद्य। वीर्यज्ञः हि अस्मि तस्य वै। कः हि सोढुम् शक्तः तस्य महात्मनः बाणवेगम्।

alam tvayā rāmam āsādya. vīryajñaḥ hi asmi tasya vai. kaḥ hi soḍhum śaktaḥ tasya mahātmanaḥ bāṇavegam.

English Translation

“Enough with putting down Rāma by you! I certainly know of his bravery, but who can handle the force of the arrow of that great soul?”

०३ २६२ ००७

शास्त्र - *śāstra*

प्रव्रज्यायां हि मे हेतुः स एव पुरुषर्षभः।
विनाशमुखमेतत्ते केनाख्यातं दुरात्मना॥

pravrajyāyāṃ hi me hetuḥ sa eva puruṣarṣabhaḥ.
vināśamukhametatte kenākhyātaṃ durātmanā..

अन्वय - *anvaya*

प्रव्रज्यायाम् हि मे हेतुः सः एव पुरुषर्षभः। विनाशमुखम् एतद् ते केन दुरात्मना आख्यातम्।

pravrajyāyām hi me hetuḥ saḥ eva puruṣarṣabhaḥ.
vināśamukham etad te kena durātmanā ākhyātam.

English Translation

"That excellent man is indeed why I am in religious mendicancy. By telling of which evil person this turning of you towards destruction?"

०३ २६२ ००८

शास्त्र - *śāstra*

तमुवाचाथ सक्रोधो रावणः परिभर्त्सयन्।
अकुर्वतोऽस्मद्वचनं स्यान्मृत्युरपि ते ध्रुवम्॥

tamuvācātha sakrodho rāvaṇaḥ paribhartsayan.
akurvato'smadvacanaṃ syānmṛtyurapi te dhruvam..

अन्वय - *anvaya*

अथ सक्रोधः परिभर्त्सयन् रावणः तम् उवाच। अकुर्वतः अस्मद्वचनम् मृत्युः अपि ते ध्रुवम् स्यात्।

atha sakrodhaḥ paribhartsayan rāvaṇaḥ tam uvāca.
akurvataḥ asmadvacanam mṛtyuḥ api te dhruvam syāt.

English Translation

Then, angry threatening Rāvana told him - "There shall certainly be death of you from not following my command."

०३ २६२ ००९

शास्त्र - *śāstra*

मारीचश्चिन्तयामास विशिष्टान्मरणं वरम्।
अवश्यं मरणे प्राप्ते करिष्याम्यस्य यन्मतम्॥

mārīcaścintayāmāsa viśiṣṭānmaraṇaṃ varam.
avaśyaṃ maraṇe prāpte kariṣyāmyasya yanmatam..

अन्वय - *anvaya*

विशिष्टात् मरणम् वरम् अवश्यम् मरणे प्राप्ते करिष्यामि अस्य यत् मतम् इति मारीचः चिन्तयामास।

viśiṣṭāt maraṇam varam avaśyam maraṇe prāpte kariṣyāmi asya yat matam iti mārīcaḥ cintayāmāsa.

English Translation

Mārīca thought - "It is better to die from a distinguished one. Since I am surely attaining death, I will do whatever he desires."

०३ २६२ ०१०

शास्त्र - *śāstra*

ततस्तं प्रत्युवाचाथ मारीचो राक्षसेश्वरम्।
किं ते साह्यं मया कार्यं करिष्याम्यवशोऽपि तत्॥

tatastaṃ pratyuvācātha mārīco rākṣaseśvaram.
kiṃ te sāhyaṃ mayā kāryaṃ kariṣyāmyavaśo'pi tat..

अन्वय - *anvaya*

किम् ते साह्यम् मया कार्यम्। करिष्यामि अवशः अपि तत्। इति ततः अथ मारीचः प्रत्युवाच तम् राक्षसेश्वरम्।

kim te sāhyam mayā kāryam. kariṣyāmi avaśaḥ api tat. iti tataḥ atha mārīcaḥ pratyuvāca tam rākṣaseśvaram.

English Translation

Therefore, then Mārīca replied to the lord of demons - "What help shall be done by me to you? I will do that even unwillingly."

०३ २६२ ०११

शास्त्र - *śāstra*

तमब्रवीद्दशग्रीवो गच्छ सीतां प्रलोभय।
रत्नशृङ्गो मृगो भूत्वा रत्नचित्रतनूरुहः॥

tamabravīddaśagrīvo gaccha sītāṃ pralobhaya.
ratnaśṛṅgo mṛgo bhūtvā ratnacitratanūruhaḥ..

अन्वय - *anvaya*

यः रत्नैः चित्रम् तन्वाम् रोहति सः रत्नचित्रतनू रुहः । रत्नशृङ्गः मृगः रत्नचित्रतनूरुहः भूत्वा गच्छ सीताम् च प्रलोभय इति दशग्रीवः तम् अब्रवीत्।

yaḥ ratnaiḥ citram tanvām rohati saḥ ratnacitratanū ruhaḥ . ratnaśṛṅgaḥ mṛgaḥ ratnacitratanūruhaḥ bhūtvā gaccha sītām ca pralobhaya iti daśagrīvaḥ tam abravīt.

English Translation

Daśagrīva told him - "Being a deer with antlers and body speckled with jewels, go and allure Sītā!"

०३ २६२ ०१२

शास्त्र - *śāstra*

ध्रुवं सीता समालक्ष्य त्वां रामं चोदयिष्यति।
अपक्रान्ते च काकुत्स्थे सीता वश्या भविष्यति॥

dhruvaṃ sītā samālakṣya tvāṃ rāmaṃ codayiṣyati.
apakrānte ca kākutsthe sītā vaśyā bhaviṣyati..

अन्वय - *anvaya*

त्वाम् समालक्ष्य सीता ध्रुवम् रामम् चोदयिष्यति। अपक्रान्ते च काकुत्स्थे सीता वश्या भविष्यति।

tvām samālakṣya sītā dhruvam rāmam codayiṣyati.
apakrānte ca kākutsthe sītā vaśyā bhaviṣyati.

English Translation

"With you being visible, Sītā will certainly impel Rāma. With the descendant of Kakutstha having gone, Sītā will be under control."

०३ २६२ ०१३

शास्त्र - *śāstra*

तामादायापनेष्यामि ततः स न भविष्यति।
भार्यावियोगाद्दुर्बुद्धिरेतत्साह्यं कुरुष्व मे॥

tāmādāyāpaneṣyāmi tataḥ sa na bhaviṣyati.
bhāryāviyogāddurbuddhiretatsāhyaṃ kuruṣva me..

अन्वय - *anvaya*

ताम् आदाय अपनेष्यामि। ततः सः दुर्बुद्धिः न भविष्यति भार्यावियोगात्। एतद् साह्यम् कुरुष्व मे।

tām ādāya apaneṣyāmi. tataḥ saḥ durbuddhiḥ na bhaviṣyati bhāryāviyogāt. etad sāhyam kuruṣva me.

English Translation

"Having taken her, I will lead away. Therefore, the weak-minded one will not exist because of the abstention from the wife. Do this aid for me."

०३ २६२ ०१४

शास्त्र - *śāstra*

इत्येवमुक्तो मारीचः कृत्वोदकमथात्मनः।
रावणं पुरतो यान्तमन्वगच्छत्सुदुःखितः॥

ityevamukto mārīcaḥ kṛtvodakamathātmanaḥ.
rāvaṇaṃ purato yāntamanvagacchatsuduḥkhitaḥ..

अन्वय - *anvaya*

इति अथ आत्मनः उदकम् कृत्वा एवम् उक्तः सुदुःखितः मारीचः यान्तम् रावणम् पुरतः अन्वगच्छत्।

iti atha ātmanaḥ udakam kṛtvā evam uktaḥ suduḥkhitaḥ mārīcaḥ yāntam rāvaṇam purataḥ anvagacchat.

English Translation

Thus, having offered water to himself, sad Mārīca, who was spoken in this way, followed Rāvaṇa, who had left earlier.

०३ २६२ ०१५

शास्त्र - *śāstra*

ततस्तस्याश्रमं गत्वा रामस्याक्लिष्टकर्मणः।
चक्रतुस्तत्तथा सर्वमुभौ यत्पूर्वमन्त्रितम्॥

tatastasyāśramaṃ gatvā rāmasyākliṣṭakarmaṇaḥ.
cakratustattathā sarvamubhau yatpūrvamantritam..

अन्वय - *anvaya*

ततः तस्य रामस्य अक्लिष्टकर्मणः आश्रमम् गत्वा उभौ यद् पूर्वमन्त्रितम् तद् सर्वम् तथा चक्रतुः।

tataḥ tasya rāmasya akliṣṭakarmaṇaḥ āśramam gatvā ubhau yad pūrvamantritam tad sarvam tathā cakratuḥ.

English Translation

Then, having gone to the hermitage of Rāma's unparalleled actions, both did everything as discussed earlier.

०३ २६२ ०१६

शास्त्र - *śāstra*

रावणस्तु यतिर्भूत्वा मुण्डः कुण्डी त्रिदण्डधृक्।
मृगश्च भूत्वा मारीचस्तं देशमुपजग्मतुः॥

rāvaṇastu yatirbhūtvā muṇḍaḥ kuṇḍī tridaṇḍadhṛk.
mṛgaśca bhūtvā mārīcastaṃ deśamupajagmatuḥ..

अन्वय - *anvaya*

रावणः तु यतिः भूत्वा मुण्डः कुण्डी त्रिदण्डधृक् मृगः च भूत्वा मारीचः तम् देशम् उपजग्मतुः।

rāvaṇaḥ tu yatiḥ bhūtvā muṇḍaḥ kuṇḍī tridaṇḍadhṛk
mṛgaḥ ca bhūtvā mārīcaḥ tam deśam upajagmatuḥ.

English Translation

Rāvaṇa, having become a bald ascetic with a vessel and bearing a Tridaṇḍa and Mārīca, having become a deer, approached that place.

०३ २६२ ०१७

शास्त्र - *śāstra*

दर्शयामास वैदेहीं मारीचो मृगरूपधृक्।
चोदयामास तस्यार्थे सा रामं विधिचोदिता॥

darśayāmāsa vaidehīṃ mārīco mṛgarūpadhṛk.
codayāmāsa tasyārthe sā rāmaṃ vidhicoditā..

अन्वय - *anvaya*

दर्शयामास वैदेहीम् मारीचः मृगरूपधृक्। विधिना चोदिता सा रामम् तस्य अर्थे चोदयामास।

darśayāmāsa vaidehīm mārīcaḥ mṛgarūpadhṛk.
vidhinā coditā sā rāmam tasya arthe codayāmāsa.

English Translation

Mārīca showed his appearance as a deer to Vaidehī. Sītā, who was impelled by destiny, urged Rāma for him.

०३ २६२ ०१८

शास्त्र - *śāstra*

रामस्तस्याः प्रियं कुर्वन्धनुरादाय सत्वरः।
रक्षार्थे लक्ष्मणं न्यस्य प्रययौ मृगलिप्सया॥

rāmastasyāḥ priyaṃ kurvandhanurādāya satvaraḥ.
rakṣārthe lakṣmaṇaṃ nyasya prayayau mṛgalipsayā..

अन्वय - *anvaya*

रक्षार्थे लक्ष्मणम् न्यस्य धनुः आदाय कुर्वन् रामः सत्वरः मृगलिप्सया प्रययौ तस्याः प्रियम्।

rakṣārthe lakṣmaṇam nyasya dhanuḥ ādāya kurvan rāmaḥ satvaraḥ mṛgalipsayā prayayau tasyāḥ priyam.

English Translation

Having appointed Lakṣmaṇa for protection and having taken his bow, Rāma swiftly went towards and while doing what was beloved to her with desire to obtain the deer.

०३ २६२ ०१९

शास्त्र - *śāstra*

स धन्वी बद्धतूणीरः खड्गगोधाङ्गुलित्रवान्।
अन्वधावन्मृगं रामो रुद्रस्तारामृगं यथा॥

sa dhanvī baddhatūṇīraḥ khaḍgagodhāṅgulitravān.
anvadhāvanmṛgaṃ rāmo rudrastārāmṛgaṃ yathā..

अन्वय - *anvaya*

यथा रुद्रः तारामृगम् अन्वधावत् तथा सः धन्वी बद्धतूणीरः खड्गवान् गोधावान् अङ्गुलित्रवान् रामः मृगम् अन्वधावत्।

yathā rudraḥ tārāmṛgam anvadhāvat tathā saḥ dhanvī baddhatūṇīraḥ khaḍgavān godhāvān aṅgulitravān rāmaḥ mṛgam anvadhāvat.

English Translation

Rāma, armed with bow, quiver, sword, leathern fence to prevent bow-string injuries, and finger-protector followed the deer just like Rudra followed the Mṛgaśīrṣa Nakṣatra.

०३ २६२ ०२०

शास्त्र - *śāstra*

सोऽन्तर्हितः पुनस्तस्य दर्शनं राक्षसो व्रजन्।
चकर्ष महदध्वानं रामस्तं बुबुधे ततः॥

so'ntarhitaḥ punastasya darśanaṃ rākṣaso vrajan.
cakarṣa mahadadhvānaṃ rāmastaṃ bubudhe tataḥ..

अन्वय - *anvaya*

सः राक्षसः अन्तर्हितः। पुनः तस्य दर्शनम्। व्रजन् राक्षसः चकर्ष महदध्वानम्। ततः रामः तम् बुबुधौ।

saḥ rākṣasaḥ antarhitaḥ. punaḥ tasya darśanam. vrajan rākṣasaḥ cakarṣa mahadadhvānam. tataḥ rāmaḥ tam bubudhau.

English Translation

The Rākṣasa hid. Again, there was a sight of him. The walking demon attracted a long journey. Then, Rāma noticed him.

०३ २६२ ०२१

शास्त्र - *śāstra*

निशाचरं विदित्वा तं राघवः प्रतिभानवान्।
अमोघं शरमादाय जघान मृगरूपिणम्॥

niśācaraṃ viditvā taṃ rāghavaḥ pratibhānavān.
amoghaṃ śaramādāya jaghāna mṛgarūpiṇam..

अन्वय - *anvaya*

तम् निशाचरम् विदित्वा अमोघम् शरम् आदाय प्रतिभानवान् राघवः मृगरूपिणम् जघान।

tam niśācaram viditvā amogham śaram ādāya pratibhānavān rāghavaḥ mṛgarūpiṇam jaghāna.

English Translation

Having become conscious of that Rākṣasa, Rāghava put an unerring arrow and hunted the one with the appearance of a deer.

०३ २६२ ०२२

शास्त्र - *śāstra*

स रामबाणाभिहतः कृत्वा रामस्वरं तदा।
हा सीते लक्ष्मणेत्येवं चुक्रोशार्तस्वरेण ह॥

sa rāmabāṇābhihataḥ kṛtvā rāmasvaraṃ tadā.
hā sīte lakṣmaṇetyevaṃ cukrośārtasvareṇa ha..

अन्वय - *anvaya*

सः रामबाणेन अभिहतः। रामस्वरम् कृत्वा तदा हा सीते लक्ष्मण इति एवम् आर्तस्वरेण चुक्रोश।

saḥ rāmabāṇena abhihataḥ. rāmasvaram kṛtvā tadā hā sīte lakṣmaṇa iti evam ārtasvareṇa cukrośa.

English Translation

Rāma's arrow struck him. With the voice of Rāma, he cried out painfully - "Alas Sītā! Alas Lakṣmaṇa!"

०३ २६२ ०२३

शास्त्र - *śāstra*

शुश्राव तस्य वैदेही ततस्तां करुणां गिरम्।
सा प्राद्रवद्यतः शब्दस्तामुवाचाथ लक्ष्मणः॥

śuśrāva tasya vaidehī tatastāṃ karuṇāṃ giram.
sā prādravadyataḥ śabdastāmuvācātha lakṣmaṇaḥ..

अन्वय - *anvaya*

ततः वैदेही शुश्राव तस्य ताम् करुणाम् गिरम्। सा प्राद्रवत् यतः शब्दः। ताम् उवाच अथ लक्ष्मणः।

tataḥ vaidehī śuśrāva tasya tām karuṇām giram. sā prādravat yataḥ śabdaḥ. tām uvāca atha lakṣmaṇaḥ.

English Translation

Then, Vaidehī heard his woeful voice. She ran towards the word. Thus, Lakṣmaṇa said this to her.

०३ २६२ ०२४

शास्त्र - *śāstra*

अलं ते शङ्कया भीरु को रामं विषहिष्यति।
मुहूर्ताद्द्रक्ष्यसे राममागतं तं शुचिस्मिते॥

alaṃ te śaṅkayā bhīru ko rāmaṃ viṣahiṣyati.
muhūrtāddrakṣyase rāmamāgataṃ taṃ śucismite..

अन्वय - *anvaya*

अलम् ते शङ्कया भीरु। कः रामम् विषहिष्यति। शुचिस्मिते मुहूर्तात् द्रक्ष्यसे रामम् आगतम् तम्।

alam te śaṅkayā bhīru. kaḥ rāmam viṣahiṣyati.
śucismite muhūrtāt drakṣyase rāmam āgatam tam.

English Translation

“O fearful one! Enough with your doubts! Who will conquer Rāma? O one with a bright smile! You will see the coming Rāma within a while.”

०३ २६२ ०२५

शास्त्र - *śāstra*

इत्युक्त्वा सा प्ररुदती पर्यशङ्कत देवरम्।
हता वै स्त्रीस्वभावेन शुद्धचारित्रभूषणम्॥

ityuktvā sā prarudatī paryaśaṅkata devaram.
hatā vai strīsvabhāvena śuddhacāritrabhūṣaṇam..

अन्वय - *anvaya*

इति उक्त्वा सा प्ररुदती पर्यशङ्कत शुद्धचारित्रभूषणम् देवरम्। हता वै स्त्रीस्वभावेन।

iti uktvā sā prarudatī paryaśaṅkata śuddhacāritrabhūṣaṇam devaram. hatā vai strīsvabhāvena.

English Translation

Having been spoken to, She, who was lamenting suffering indeed from the nature of a woman, suspected her husband's brother, who was embellished with pure character.

०३ २६२ ०२६

शास्त्र - *śāstra*

सा तं परुषमारब्धा वक्तुं साध्वी पतिव्रता।
नैष कालो भवेन्मूढ यं त्वं प्रार्थयसे हृदा॥

sā taṃ paruṣamārabdhā vaktuṃ sādhvī pativratā.
naiṣa kālo bhavenmūḍha yaṃ tvaṃ prārthayase hṛdā..

अन्वय - *anvaya*

साध्वी पतिव्रता आरब्धा सा तम् परुषम् वक्तुम्। यम् त्वम् इच्छसि हृदा एषः कालः न भवेत् मूढ।

sādhvī pativratā ārabdhā sā tam paruṣam vaktum. yam tvam icchasi hṛdā eṣaḥ kālaḥ na bhavet mūḍha.

English Translation

The devoted, virtuous, and faithful wife began to speak unkindly to him. "O fool! That time you desire with your heart does not exist."

०३ २६२ ०२७

शास्त्र - *śāstra*

अप्यहं शस्त्रमादाय हन्यामात्मानमात्मना।
पतेयं गिरिशृङ्गाद्वा विशेयं वा हुताशनम्॥

apyahaṃ śastramādāya hanyāmātmānamātmanā.
pateyaṃ giriśṛṅgādvā viśeyaṃ vā hutāśanam..

अन्वय - *anvaya*

शस्त्रम् आदाय अहम् हन्याम् आत्मानम्। आत्मना वा पतेयम् गिरिशृङ्गात्। विशेयम् वा हुताशनम्।

śastram ādāya aham hanyām ātmānam. ātmanā vā pateyam giriśṛṅgāt. viśeyam vā hutāśanam.

English Translation

"Having taken a weapon, I shall kill myself, fall from the peak of a mountain or enter a fire."

०३ २६२ ०२८

शास्त्र - *śāstra*

रामं भर्तारमुत्सृज्य न त्वहं त्वां कथंचन।
निहीनमुपतिष्ठेयं शार्दूली क्रोष्टुकं यथा॥

rāmaṃ bhartāramutsṛjya na tvahaṃ tvāṃ kathaṃcana.
nihīnamupatiṣṭheyaṃ śārdūlī kroṣṭukaṃ yathā..

अन्वय - *anvaya*

रामम् तु भर्तारम् उत्सृज्य न कथंचन अहम् त्वाम् निहीनम् उपतिष्ठेयम् यथा शार्दूली क्रोष्टुकम्।

rāmam tu bhartāram utsṛjya na kathaṃcana aham tvām nihīnam upatiṣṭheyam yathā śārdūlī kroṣṭukam.

English Translation

"But having abandoned brother Rāma, by no way will I stand near you just like a tigress around jackal."

०३ २६२ ०२९

शास्त्र - *śāstra*

एतादृशं वचः श्रुत्वा लक्ष्मणः प्रियराघवः।
पिधाय कर्णौ सद्वृत्तः प्रस्थितो येन राघवः।
स रामस्य पदं गृह्य प्रससार धनुर्धरः॥

etādṛśaṃ vacaḥ śrutvā lakṣmaṇaḥ priyarāghavaḥ.
pidhāya karṇau sadvṛttaḥ prasthito yena rāghavaḥ.
sa rāmasya padaṃ gṛhya prasasāra dhanurdharaḥ..

अन्वय - *anvaya*

एतादृशम् वचः श्रुत्वा कर्णौ पिधाय लक्ष्मणः प्रियराघवः सद्वृत्तः प्रस्थितः येन राघवः। रामस्य पदम् गृह्य सः धनुर्धरः प्रससार।

etādṛśam vacaḥ śrutvā karṇau pidhāya lakṣmaṇaḥ priyarāghavaḥ sadvṛttaḥ prasthitaḥ yena rāghavaḥ. rāmasya padam gṛhya saḥ dhanurdharaḥ prasasāra.

English Translation

Having heard such words and shutting his ears, well-behaved Lakṣmaṇa, who is fond of Rāma, advanced by which Rāghava went. The archer Lakṣmaṇa advanced, seizing by the footsteps of Rāma.

०३ २६२ ०३०

शास्त्र - *śāstra*

एतस्मिन्नन्तरे रक्षो रावणः प्रत्यदृश्यत।
अभव्यो भव्यरूपेण भस्मच्छन्न इवानलः।
यतिवेषप्रतिच्छन्नो जिहीर्षुस्तामनिन्दिताम्॥

etasminnantare rakṣo rāvaṇaḥ pratyadṛśyata.
abhavyo bhavyarūpeṇa bhasmacchanna ivānalaḥ.
yativeṣapraticchanno jihīrṣustāmaninditām..

अन्वय - *anvaya*

एतस्मिन् अन्तरे अभव्यः भव्यरूपेण भस्मभिः छन्नः इव अनलः यतिवेषेण प्रतिच्छन्नः रक्षः रावणः ताम् अनिन्दिताम् जिहीर्षुः प्रत्यदृश्यत।

etasmin antare abhavyaḥ bhavyarūpeṇa bhasmabhiḥ channaḥ iva analaḥ yativeṣeṇa praticchannaḥ rakṣaḥ rāvaṇaḥ tām aninditām jihīrṣuḥ pratyadṛśyata.

English Translation

Amidst this, demonic and wicked but appearing good Rāvana, hidden as ascetic and covered with ashes like fire, desirous of taking away the virtuous Sītā, appeared.

०३ २६२ ०३१

शास्त्र - *śāstra*

सा तमालक्ष्य संप्राप्तं धर्मज्ञा जनकात्मजा।
निमन्त्रयामास तदा फलमूलाशनादिभिः॥

sā tamālakṣya saṃprāptaṃ dharmajñā janakātmajā.
nimantrayāmāsa tadā phalamūlāśanādibhiḥ..

अन्वय - *anvaya*

तदा तम् आलक्ष्य धर्मज्ञा जनकात्मजा सा फलमूलाशनादिभिः सम्प्राप्तम् निमन्त्रयामास।

tadā tam ālakṣya dharmajñā janakātmajā sā phalamūlāśanādibhiḥ samprāptam nimantrayāmāsa.

English Translation

Then, having observed him, She, the knower of righteousness and Janaka's daughter, obtained fruits and roots as food with other things and invited him.

०३ २६२ ०३२

शास्त्र - *śāstra*

अवमन्य स तत्सर्वं स्वरूपं प्रतिपद्य च।
सान्त्वयामास वैदेहीमिति राक्षसपुंगवः॥

avamanya sa tatsarvaṃ svarūpaṃ pratipadya ca.
sāntvayāmāsa vaidehīmiti rākṣasapuṃgavaḥ..

अन्वय - *anvaya*

तत्सर्वम् अवमन्य स्वरूपम् प्रतिपद्य च सः राक्षसपुंगवः वैदेहीम् सान्त्वयामास।

tatsarvam avamanya svarūpam pratipadya ca saḥ rākṣasapuṃgavaḥ vaidehīm sāntvayāmāsa.

English Translation

Having despised everything and entering into his form, the chief of demons addressed Vaidehī.

०३ २६२ ०३३

शास्त्र - *śāstra*

सीते राक्षसराजोऽहं रावणो नाम विश्रुतः।
मम लङ्का पुरी नाम्ना रम्या पारे महोदधेः॥

sīte rākṣasarājo'haṃ rāvaṇo nāma viśrutaḥ.
mama laṅkā purī nāmnā ramyā pāre mahodadheḥ..

अन्वय - *anvaya*

सीते राक्षसराजः अहम् विश्रुतः रावणः नाम। मम रम्या लङ्कानामपुरी महोदधेः पारे।

sīte rākṣasarājaḥ aham viśrutaḥ rāvaṇaḥ nāma.
mama ramyā laṅkānāmapurī mahodadheḥ pāre.

English Translation

"O Sītā! I am the King of demons, famously named Rāvaṇa. My pleasant city, named Laṅkā, is on the other side of the great ocean."

०३ २६२ ०३४

शास्त्र - *śāstra*

तत्र त्वं वरनारीषु शोभिष्यसि मया सह।
भार्या मे भव सुश्रोणि तापसं त्यज राघवम्॥

tatra tvaṃ varanārīṣu śobhiṣyasi mayā saha.
bhāryā me bhava suśroṇi tāpasaṃ tyaja rāghavam..

अन्वय - *anvaya*

तत्र त्वम् वरनारीषु शोभिष्यसि मया सह। सुश्रोणि भार्या मे भव त्यज च तापसम् राघवम्।

tatra tvam varanārīṣu śobhiṣyasi mayā saha. suśroṇi
bhāryā me bhava tyaja ca tāpasam rāghavam.

English Translation

"There, you will shine amongst the best women with me. O, one with beautiful hips! Be my wife and leave the ascetic Rāghava."

०३ २६२ ०३५

शास्त्र - *śāstra*

एवमादीनि वाक्यानि श्रुत्वा सीताथ जानकी।
पिधाय कर्णौ सुश्रोणी मैवमित्यब्रवीद्वचः॥

evamādīni vākyāni śrutvā sītātha jānakī.
pidhāya karṇau suśroṇī maivamityabravīdvacaḥ..

अन्वय - *anvaya*

एवमादीनि वाक्यानि अथ श्रुत्वा कर्णौ पिधाय सीता जानकी सुश्रोणी मा एवम् इति अब्रवीत् वचः।

evamādīni vākyāni atha śrutvā karṇau pidhāya sītā jānakī suśroṇī mā evam iti abravīt vacaḥ.

English Translation

Hearing such many things and shutting her ears, the daughter of Janaka, beautiful-hipped Sītā, said - "Do not in this way!"

०३ २६२ ०३६

शास्त्र - *śāstra*

प्रपतेद्द्यौः सनक्षत्रा पृथिवी शकलीभवेत्।
शैत्यमग्निरियान्नाहं त्यजेयं रघुनन्दनम्॥

prapateddyauḥ sanakṣatrā pṛthivī śakalībhavet.
śaityamagniriyānnāhaṃ tyajeyaṃ raghunandanam..

अन्वय - *anvaya*

प्रपतेत् द्यौः सनक्षत्रा पृथिवी शकलीभवेत् शैत्यम् अग्निः इयात् न अहम् त्यजेयम् रघुनन्दनम्।

prapatet dyauḥ sanakṣatrā pṛthivī śakalībhavet śaityam agniḥ iyāt na aham tyajeyam raghunandanam.

English Translation

“Even if heaven shall fall with constellations, the Earth shall break into pieces, or the fire shall go cold, I shall not abandon Rāma, the scion of Raghu.”

०३ २६२ ०३७

शास्त्र - *śāstra*

कथं हि भिन्नकरटं पद्मिनं वनगोचरम्।
उपस्थाय महानागं करेणुः सूकरं स्पृशेत्॥

kathaṃ hi bhinnakaraṭaṃ padminaṃ vanagocaram.
upasthāya mahānāgaṃ kareṇuḥ sūkaraṃ spṛśet..

अन्वय - *anvaya*

कथम् हि भिन्नकरटम् पद्मिनम् वनगोचरम् महानागम् उपस्थाय सूकरम् स्पृशेत् करेणुः।

katham hi bhinnakaraṭam padminam vanagocaram mahānāgam upasthāya sūkaram spṛśet kareṇuḥ.

English Translation

“How shall a female elephant touch a pig, having been with a great forest-roaming rutting elephant?”

०३ २६२ ०३८

शास्त्र - *śāstra*

कथं हि पीत्वा माध्वीकं पीत्वा च मधुमाधवीम्।
लोभं सौवीरके कुर्यान्नारी काचिदिति स्मरे॥

kathaṃ hi pītvā mādhvīkaṃ pītvā ca madhumādhavīm.
lobhaṃ sauvīrake kuryānnārī kāciditi smare..

अन्वय - *anvaya*

कथम् हि पीत्वा माध्वीकम् पीत्वा च मधुमाधवीम् लोभम् सौवीरके कुर्यात् नारी काचित् इति स्मरे।

katham hi pītvā mādhvīkam pītvā ca madhumādhavīm lobham sauvīrake kuryāt nārī kācit iti smare.

English Translation

“I think, having drunk Mādhvīka and Madhumādhavī, why would any lady do greed in sour gruel?”

०३ २६२ ०३९

शास्त्र - *śāstra*

इति सा तं समाभाष्य प्रविवेशाश्रमं पुनः।
तामनुद्रुत्य सुश्रोणीं रावणः प्रत्यषेधयत्॥

iti sā taṃ samābhāṣya praviveśāśramaṃ punaḥ.
tāmanudrutya suśroṇīṃ rāvaṇaḥ pratyaṣedhayat..

अन्वय - *anvaya*

इति तम् समाभाष्य सा पुनः प्रविवेश आश्रमम्। ताम् अनुद्रुत्य सुश्रोणीम् रावणः प्रत्यषेधयत्।

iti tam samābhāṣya sā punaḥ praviveśa āśramam.
tām anudrutya suśroṇīm rāvaṇaḥ pratyaṣedhayat.

English Translation

Having talked with him, she again entered the hermitage. Having run after her, Rāvaṇa caused to block the one with beautiful hips.

०३ २६२ ०४०

शास्त्र - *śāstra*

भर्त्सयित्वा तु रूक्षेण स्वरेण गतचेतनाम्।
मूर्धजेषु निजग्राह खमुपाचक्रमे ततः॥

bhartsayitvā tu rūkṣeṇa svareṇa gatacetanām.
mūrdhajeṣu nijagrāha khamupācakrame tataḥ..

अन्वय - *anvaya*

गतचेतनाम् तु रूक्षेण स्वरेण भर्त्सयित्वा मूर्धजेषु निजग्राह ततः खम् उपाचक्रमे।

gatacetanām tu rūkṣeṇa svareṇa bhartsayitvā mūrdhajeṣu nijagrāha tataḥ kham upācakrame.

English Translation

Having insulted she, whose consciousness was gone, with harsh words and holding her hair, he reached for the sky.

०३ २६२ ०४१

शास्त्र - *śāstra*

तां ददर्श तदा गृध्रो जटायुर्गिरिगोचरः।
रुदतीं राम रामेति ह्रियमाणां तपस्विनीम्॥

tāṃ dadarśa tadā gṛdhro jaṭāyurgirigocaraḥ.
rudatīṃ rāma rāmeti hriyamāṇāṃ tapasvinīm..

अन्वय - *anvaya*

रुदतीम् राम राम इति ह्रियमाणाम् तपस्विनीम् ताम् ददर्श तदा गृध्रः जटायुः गिरिगोचरः।

rudatīm rāma rāma iti hriyamāṇām tapasvinīm tām dadarśa tadā gṛdhraḥ jaṭāyuḥ girigocaraḥ.

English Translation

Then, a mountain-ranging vulture, Jaṭāyu, saw the abducted ascetic crying, "O Rāma! O Rāma!"

— ०७ —

०३ २६३

असतो मा सद्गमय।
तमसो मा ज्योतिर्गमय।
मृत्योर्मामृतं गमय॥
ॐ शान्तिः शान्तिः शान्तिः॥

०३ २६३ ००१

शास्त्र - *śāstra*

मार्कण्डेय उवाच।
सखा दशरथस्यासीज्जटायुररुणात्मजः।
गृध्रराजो महावीर्यः संपातिर्यस्य सोदरः॥

mārkaṇḍeya uvāca.
sakhā daśarathasyāsījjaṭāyurararuṇātmajaḥ.
gṛdhrarājo mahāvīryaḥ saṃpātiryasya sodaraḥ..

अन्वय - *anvaya*

जटायुः अरुणात्मजः गृध्रराजः महावीर्यः सखा दशरथस्य आसीत्। सम्पातिः यस्य सोदरः।

jaṭāyuḥ aruṇātmajaḥ gṛdhrarājaḥ mahāvīryaḥ sakhā daśarathasya āsīt. sampātiḥ yasya sodaraḥ.

English Translation

Mārkaṇḍeya said: The mighty King of vultures, Jaṭāyu, son of Aruṇa and brother of Sampāti, was a friend of Daśaratha.

०३ २६३ ००२

शास्त्र - *śāstra*

स ददर्श तदा सीतां रावणाङ्कगतां स्नुषाम्।
क्रोधादभ्यद्रवत्पक्षी रावणं राक्षसेश्वरम्॥

sa dadarśa tadā sītāṃ rāvaṇāṅkagatāṃ snuṣām.
krodhādabhyadravatpakṣī rāvaṇaṃ rākṣaseśvaram..

अन्वय - *anvaya*

सः ददर्श तदा सीताम् रावणाङ्कगताम् स्नुषाम्। क्रोधात् अभ्यद्रवत् पक्षी रावणम् राक्षसेश्वरम्।

saḥ dadarśa tadā sītām rāvaṇāṅkagatām snuṣām.
krodhāt abhyadravat pakṣī rāvaṇam rākṣaseśvaram.

English Translation

Then, he saw daughter-in-law Sītā being taken by Rāvaṇa in his lap. The bird angrily ran up to the King of demons, Rāvaṇa.

०३ २६३ ००३

शास्त्र - *śāstra*

अथैनमब्रवीद्गृध्रो मुञ्च मुञ्चेति मैथिलीम्।
ध्रियमाणे मयि कथं हरिष्यसि निशाचर।
न हि मे मोक्ष्यसे जीवन्यदि नोत्सृजसे वधूम्॥

athainamabravīdgṛdhro muñca muñceti maithilīm.
dhriyamāṇe mayi kathaṃ hariṣyasi niśācara.
na hi me mokṣyase jīvanyadi notsṛjase vadhūm..

अन्वय - *anvaya*

अथ एनम् अब्रवीत् गृध्रः। मुञ्च मुञ्च। निशाचर ध्रियमाणे मयि मैथिलीम् कथम् हरिष्यसि। न हि मे मोक्ष्यसे जीवन् यदि न उत्सृजसे वधूम्। इति।

atha enam abravīt gṛdhraḥ. muñca muñca. niśācara dhriyamāṇe mayi maithilīm katham hariṣyasi. na hi me mokṣyase jīvan yadi na utsṛjase vadhūm. iti.

English Translation

Thus, the vulture said this - "Let go! Let go! O Niśācara! While I am alive, how will you take away Maithilī? Your life will indeed not be free of me if you do not set free the daughter-in-law."

०३ २६३ ००४

शास्त्र - *śāstra*

उक्त्वैवं राक्षसेन्द्रं तं चकर्त नखरैर्भृशम्।
पक्षतुण्डप्रहारैश्च बहुशो जर्जरीकृतः।
चक्षार रुधिरं भूरि गिरिः प्रस्रवणैरिव॥

uktvaivaṃ rākṣasendraṃ taṃ cakarta nakharairbhṛśam.
pakṣatuṇḍaprahāraiśca bahuśo jarjarīkṛtaḥ.
cakṣāra rudhiraṃ bhūri giriḥ prasravaṇairiva..

अन्वय - *anvaya*

उक्त्वा एवम् राक्षसेन्द्रम् तम् चकर्त नखरैः भृशम् पक्षतुण्डप्रहारैः च बहुशः जर्जरीकृतः। चक्षार रुधिरम् भूरि गिरिः प्रस्रवणैः इव।

uktvā evam rākṣasendram tam cakarta nakharaiḥ bhṛśam pakṣatuṇḍaprahāraiḥ ca bahuśaḥ jarjarīkṛtaḥ. cakṣāra rudhiram bhūri giriḥ prasravaṇaiḥ iva.

English Translation

Having spoken this way, he violently attacked the King of demons with claws and beaks. Repeated attacks wore off him. Blood flowed abundantly like a mountain with streams.

०३ २६३ ००५

शास्त्र - *śāstra*

स वध्यमानो गृध्रेण रामप्रियहितैषिणा।
खड्गमादाय चिच्छेद भुजौ तस्य पतत्रिणः॥

sa vadhyamāno gṛdhreṇa rāmapriyahitaiṣiṇā.
khaḍgamādāya ciccheda bhujau tasya patatriṇaḥ..

अन्वय - *anvaya*

खड्गम् आदाय सः वध्यमानः गृध्रेण रामप्रियहितैषिणा चिच्छेद भुजौ तस्य पतत्रिणः।

khaḍgam ādāya saḥ vadhyamānaḥ gṛdhreṇa rāmapriyahitaiṣiṇā ciccheda bhujau tasya patatriṇaḥ.

English Translation

Having taken a sword, he, hurt by the vulture wishing well for the beloved of Rāma, cut off the arms of that bird.

०३ २६३ ००६

शास्त्र - *śāstra*

निहत्य गृध्रराजं स छिन्नाभ्रशिखरोपमम्।
ऊर्ध्वमाचक्रमे सीतां गृहीत्वाङ्केन राक्षसः॥

nihatya gṛdhrarājaṃ sa chinnābhraśikharopamam.
ūrdhvamācakrame sītāṃ gṛhītvāṅkena rākṣasaḥ..

अन्वय - *anvaya*

गृध्रराजम् निहत्य सः राक्षसः छिन्नाभ्रशिखरोपमम् ऊर्ध्वम् आचक्रमे अङ्केन सीताम् गृहीत्वा।

gṛdhrarājam nihatya saḥ rākṣasaḥ chinnābhraśikharopamam ūrdhvam ācakrame aṅkena sītām gṛhītvā.

English Translation

Having struck the King of vultures, that demon went upwards like clouds cutting the highest peaks, grabbing Sītā by the arm's bend.

०३ २६३ ००७

शास्त्र - *śāstra*

यत्र यत्र तु वैदेही पश्यत्याश्रममण्डलम्।
सरो वा सरितं वापि तत्र मुञ्चति भूषणम्॥

yatra yatra tu vaidehī paśyatyāśramamaṇḍalam.
saro vā saritaṃ vāpi tatra muñcati bhūṣaṇam..

अन्वय - *anvaya*

यत्र यत्र तु वैदेही पश्यति आश्रममण्डलम् सरः वा सरितम् वा अपि तत्र मुञ्चति भूषणम्।

yatra yatra tu vaidehī paśyati āśramamaṇḍalam saraḥ vā saritam vā api tatra muñcati bhūṣaṇam.

English Translation

But wherever Vaidehī saw a group of hermitage, lake, or river, she dropped an ornament there.

०३ २६३ ००८

शास्त्र - *śāstra*

सा ददर्श गिरिप्रस्थे पञ्च वानरपुंगवान्।
तत्र वासो महद्दिव्यमुत्ससर्ज मनस्विनी॥

sā dadarśa giriprasthe pañca vānarapuṃgavān.
tatra vāso mahaddivyamutsasarja manasvinī..

अन्वय - *anvaya*

सा ददर्श गिरिप्रस्थे पञ्च वानरपुंगवान्। तत्र मनस्विनी उत्ससर्ज वासः महद्दिव्यम्।

sā dadarśa giriprasthe pañca vānarapuṃgavān. tatra manasvinī utsasarja vāsaḥ mahaddivyam.

English Translation

She saw a group of five Vānara on the tableland of a mountain. There, the intelligent one dropped a large divine cloth.

०३ २६३ ००९

शास्त्र - *śāstra*

तत्तेषां वानरेन्द्राणां पपात पवनोद्धुतम्।
मध्ये सुपीतं पञ्चानां विद्युन्मेघान्तरे यथा॥

tatteṣāṃ vānarendrāṇāṃ papāta pavanoddhutam.
madhye supītaṃ pañcānāṃ vidyunmeghāntare yathā..

अन्वय - *anvaya*

तत् सुपीतम् पवनोउद्धुतम् तेषाम् पञ्चानाम् वानरेन्द्राणाम् मध्ये पपात विद्युन्मेघान्तरे यथा।

tat supītam pavanouddhutam teṣām pañcānām vānarendrāṇām madhye papāta vidyunmeghāntare yathā.

English Translation

That yellow thing moving by the wind fell in between the five lords of the Vānara just as lightning between the clouds.

०३ २६३ ०१०

शास्त्र - *śāstra*

एवं हृतायां वैदेह्यां रामो हत्वा महामृगम्।
निवृत्तो ददृशे धीमान्भ्रातरं लक्ष्मणं तदा॥

evaṃ hṛtāyāṃ vaidehyāṃ rāmo hatvā mahāmṛgam.
nivṛtto dadṛśe dhīmānbhrātaraṃ lakṣmaṇaṃ tadā..

अन्वय - *anvaya*

एवम् हृतायाम् वैदेह्याम् महामृगम् हत्वा धीमान् निवृत्तः रामः ददृशे भ्रातरम् लक्ष्मणम् तदा।

evam hṛtāyām vaidehyām mahāmṛgam hatvā dhīmān nivṛttaḥ rāmaḥ dadṛśe bhrātaram lakṣmaṇam tadā.

English Translation

While Vaidehī was abducted in this way, Rāma returned having hunted the big deer and then saw brother Lakṣmaṇa.

०३ २६३ ०११

शास्त्र - *śāstra*

कथमुत्सृज्य वैदेहीं वने राक्षससेविते।
इत्येवं भ्रातरं दृष्ट्वा प्राप्तोऽसीति व्यगर्हयत्॥

kathamutsṛjya vaidehīṃ vane rākṣasasevite.
ityevaṃ bhrātaraṃ dṛṣṭvā prāpto'sīti vyagarhayat..

अन्वय - *anvaya*

एवम् भ्रातरम् दृष्ट्वा उत्सृज्य वैदेहीम् वने राक्षससेविते कथम् प्राप्तः असि इति विजगर्ह।

evam bhrātaram dṛṣṭvā utsṛjya vaidehīm vane rākṣasasevite katham prāptaḥ asi iti vijagarha.

English Translation

Having seen brother in this way, he blamed - "How could you find leaving Vaidehī in the forest filled with demons?"

०३ २६३ ०१२

शास्त्र - *śāstra*

मृगरूपधरेणाथ रक्षसा सोऽपकर्षणम्।
भ्रातुरागमनं चैव चिन्तयन्पर्यतप्यत॥

mṛgarūpadhareṇātha rakṣasā so'pakarṣaṇam.
bhrāturāgamanaṃ caiva cintayanparyatapyata..

अन्वय - *anvaya*

अथ सः चिन्तयन् पर्यतप्यत अपकर्षणम् मृगरूपधरेण रक्षसा भ्रातुः आगमनम् च एव।

atha saḥ cintayan paryatapyata apakarṣaṇam mṛgarūpadhareṇa rakṣasā bhrātuḥ āgamanam ca eva.

English Translation

Thus, he, who is thinking, felt pain from getting distracted by the demon bearing the form of a deer and certainly from coming of his brother.

०३ २६३ ०१३

शास्त्र - *śāstra*

गर्हयन्नेव रामस्तु त्वरितस्तं समासदत्।
अपि जीवति वैदेही नेति पश्यामि लक्ष्मण॥

garhayanneva rāmastu tvaritastaṃ samāsadat.
api jīvati vaidehī neti paśyāmi lakṣmaṇa..

अन्वय - *anvaya*

अपि जीवति वैदेही। न पश्यामि लक्ष्मण। इति गर्हयन् एव रामः तु त्वरितः तम् समासदत्।

api jīvati vaidehī. na paśyāmi lakṣmaṇa. iti garhayan eva rāmaḥ tu tvaritaḥ tam samāsadat.

English Translation

Rāma, certainly repenting, swiftly approached him - "O Lakṣmaṇa! Is Vaidehī alive? I do not see her."

०३ २६३ ०१४

शास्त्र - *śāstra*

तस्य तत्सर्वमाचख्यौ सीताया लक्ष्मणो वचः।
यदुक्तवत्यसदृशं वैदेही पश्चिमं वचः॥

tasya tatsarvamācakhyau sītāyā lakṣmaṇo vacaḥ.
yaduktavatyasadṛśaṃ vaidehī paścimaṃ vacaḥ..

अन्वय - *anvaya*

लक्ष्मणः रामाय आचख्यौ सीतायाः तत्सर्वम् वचः। यद् उक्तवती असदृशम् वैदेही पश्चिमम् वचः तद् अपि लक्ष्मणः आचख्यौ।

lakṣmaṇaḥ rāmāya ācakhyau sītāyāḥ tatsarvam vacaḥ. yad uktavatī asadṛśam vaidehī paścimam vacaḥ tad api lakṣmaṇaḥ ācakhyau.

English Translation

Lakṣmaṇa told him everything Sītā told. He said all the improper last words spoken by Vaidehī.

०३ २६३ ०१५

शास्त्र - *śāstra*

दह्यमानेन तु हृदा रामोऽभ्यपतदाश्रमम्।
स ददर्श तदा गृध्रं निहतं पर्वतोपमम्॥

dahyamānena tu hṛdā rāmo'bhyapatadāśramam.
sa dadarśa tadā gṛdhraṃ nihataṃ parvatopamam..

अन्वय - *anvaya*

दह्यमानेन तु हृदा रामः अभ्यपतत् आश्रमम्। सः ददर्श तदा गृध्रम् निहतम् पर्वतोपमम्।

dahyamānena tu hṛdā rāmaḥ abhyapatat āśramam.
saḥ dadarśa tadā gṛdhram nihatam parvatopamam.

English Translation

But Rāma came into the hermitage with a burning heart. Then, he saw the mountain-resembling vulture that was hit.

०३ २६३ ०१६

शास्त्र - *śāstra*

राक्षसं शङ्कमानस्तु विकृष्य बलवद्धनुः।
अभ्यधावत काकुत्स्थस्ततस्तं सहलक्ष्मणः॥

rākṣasaṃ śaṅkamānastu vikṛṣya balavaddhanuḥ.
abhyadhāvata kākutsthastatastaṃ sahalakṣmaṇaḥ..

अन्वय - *anvaya*

राक्षसम् शङ्कमानः तु ततः बलवद्धनुः विकृष्य तम् सहलक्ष्मणः काकुत्स्थः अभ्यधावत।

rākṣasam śaṅkamānaḥ tu tataḥ balavaddhanuḥ vikṛṣya tam sahalakṣmaṇaḥ kākutsthaḥ abhyadhāvata.

English Translation

But then, having pulled out his mighty bow, the descendant of Kakustha rushed towards him with Lakṣmaṇa suspecting a demon.

०३ २६३ ०१७

शास्त्र - *śāstra*

स तावुवाच तेजस्वी सहितौ रामलक्ष्मणौ।
गृध्रराजोऽस्मि भद्रं वां सखा दशरथस्य ह॥

sa tāvuvāca tejasvī sahitau rāmalakṣmaṇau.
gṛdhrarājo'smi bhadraṃ vāṃ sakhā daśarathasya ha..

अन्वय - *anvaya*

सः तेजस्वी उवाच तौ सहितौ रामलक्ष्मणौ। भद्रम् वाम् गृध्रराजः अस्मि सखा दशरथस्य ह।

saḥ tejasvī uvāca tau sahitau rāmalakṣmaṇau. bhadram vām gṛdhrarājaḥ asmi sakhā daśarathasya ha.

English Translation

The brilliant one addressed Rāma and Lakṣmaṇa together - "Blessings to you! I am

the King of vultures and verily friend of Daśaratha."

०३ २६३ ०१८

शास्त्र - *śāstra*

तस्य तद्वचनं श्रुत्वा संगृह्य धनुषी शुभे।
कोऽयं पितरमस्माकं नाम्नाहेत्यूचतुश्च तौ॥

tasya tadvacanaṃ śrutvā saṃgṛhya dhanuṣī śubhe.
ko'yaṃ pitaramasmākaṃ nāmnāhetyūcatuśca tau..

अन्वय - *anvaya*

तस्य तद्वचनम् श्रुत्वा संगृह्य धनुषी शुभे। कः अयम् पितरम् अस्माकम् नाम्ना ब्रवीति इति ऊचतुः च तौ।

tasya tadvacanam śrutvā saṃgṛhya dhanuṣī śubhe.
kaḥ ayam pitaram asmākam nāmnā bravīti iti ūcatuḥ ca tau.

English Translation

Having heard these words of him and drawing down the splendid bows, they both said - "Who is this who calls our father by name?"

०३ २६३ ०१९

शास्त्र - *śāstra*

ततो ददृशतुस्तौ तं छिन्नपक्षद्वयं तथा।
तयोः शशंस गृध्रस्तु सीतार्थे रावणाद्वधम्॥

tato dadṛśatustau taṃ chinnapakṣadvayaṃ tathā.
tayoḥ śaśaṃsa gṛdhrastu sītārthe rāvaṇādvadham..

अन्वय - *anvaya*

ततः ददृशतुः तौ तम् छिन्नपक्षद्वयम् तथा। ताभ्याम् शशंस गृध्रः तु सीतार्थे रावणात् वधम्।

tataḥ dadṛśatuḥ tau tam chinnapakṣadvayam tathā. tābhyām śaśaṃsa gṛdhraḥ tu sītārthe rāvaṇāt vadham.

English Translation

Therefore, both saw him with his wings cut off in this way. But the vulture recited to the destruction from Rāvaṇa for Sītā.

०३ २६३ ०२०

शास्त्र - *śāstra*

अपृच्छद्राघवो गृध्रं रावणः कां दिशं गतः।
तस्य गृध्रः शिरःकम्पैराचचक्षे ममार च॥

apṛcchadrāghavo gṛdhraṃ rāvaṇaḥ kāṃ diśaṃ gataḥ. tasya gṛdhraḥ śiraḥkampairācacakṣe mamāra ca..

अन्वय - *anvaya*

अपृच्छत् राघवः गृध्रम् रावणः काम् दिशम् गतः इति। तस्मै गृध्रः शिरःकम्पैः आचचक्षे ममार च।

apṛcchat rāghavaḥ gṛdhram rāvaṇaḥ kām diśam gataḥ iti. tasmai gṛdhraḥ śiraḥkampaiḥ ācacakṣe mamāra ca.

English Translation

Rāghava asked the vulture - "In which direction did Rāvaṇa go?" The vulture communicated to him with movements of his head and passed away.

०३ २६३ ०२१

शास्त्र - *śāstra*

दक्षिणामिति काकुत्स्थो विदित्वास्य तदिङ्गितम्।
संस्कारं लम्भयामास सखायं पूजयन्पितुः॥

dakṣiṇāmiti kākutstho viditvāsya tadiṅgitam.
saṃskāraṃ lambhayāmāsa sakhāyaṃ pūjayanpituḥ..

अन्वय - *anvaya*

दक्षिणाम् इति काकुत्स्थः विदित्वा अस्य तद् इङ्गितम्। संस्कारम् लम्भयामास पितुः सखायम् पूजयन्।

dakṣiṇām iti kākutsthaḥ viditvā asya tad iṅgitam.
saṃskāram lambhayāmāsa pituḥ sakhāyam pūjayan.

English Translation

Having perceived the southern direction, the descendant of Kakustha pointed this. The one who is praying offered cremation to the friend of his father.

०३ २६३ ०२२

शास्त्र - *śāstra*

ततो दृष्ट्वाश्रमपदं व्यपविद्धबृसीघटम्।
विध्वस्तकलशं शून्यं गोमायुबलसेवितम्॥

tato dṛṣṭvāśramapadaṃ vyapaviddhabṛsīghaṭam.
vidhvastakalaśaṃ śūnyaṃ gomāyubalasevitam..

अन्वय - *anvaya*

ततः आश्रमपदम् व्यपविद्धबृसीघटम् विध्वस्तकलशम् शून्यम् गोमायुबलसेवितम् ददृशतुः।

tataḥ āśramapadam vyapaviddhabṛsīghaṭam vidhvastakalaśam śūnyam gomāyubalasevitam dadṛśatuḥ.

English Translation

Then, they saw the hermitage broken to pieces with abandoned seats and pots, broken

water pots, deserted, and filled with jackals and crows.

०३ २६३ ०२३

शास्त्र - *śāstra*

दुःखशोकसमाविष्टौ वैदेहीहरणार्दितौ।
जग्मतुर्दण्डकारण्यं दक्षिणेन परंतपौ॥

duḥkhaśokasamāviṣṭau vaidehīharaṇārditau.
jagmaturdaṇḍakāraṇyaṃ dakṣiṇena paraṃtapau..

अन्वय - *anvaya*

दुःखशोकसमाविष्टौ वैदेहीहरणार्दितौ जग्मतुः दण्डकारण्यम् दक्षिणेन परंतपौ।

duḥkhaśokasamāviṣṭau vaidehīharaṇārditau jagmatuḥ daṇḍakāraṇyam dakṣiṇena paraṃtapau.

English Translation

The heroes, filled with pain and sorrow and wounded by the abduction of Vaidehī, went southwards from Daṇḍaka forest.

०३ २६३ ०२४

शास्त्र - *śāstra*

वने महति तस्मिंस्तु रामः सौमित्रिणा सह।
ददर्श मृगयूथानि द्रवमाणानि सर्वशः।
शब्दं च घोरं सत्त्वानां दावाग्नेरिव वर्धतः॥

vane mahati tasmiṃstu rāmaḥ saumitriṇā saha.
dadarśa mṛgayūthāni dravamāṇāni sarvaśaḥ.
śabdaṃ ca ghoraṃ sattvānāṃ dāvāgneriva vardhataḥ..

अन्वय - *anvaya*

वने महति तस्मिन् तु रामः सौमित्रिणा लक्ष्मणेन सह ददर्श मृगयूथानि द्रवमाणानि सर्वशः। शब्दम् च घोरम् सत्त्वानाम् दावाग्नेः इव वर्धतः।

vane mahati tasmin tu rāmaḥ saumitriṇā lakṣmaṇena saha dadarśa mṛgayūthāni dravamāṇāni sarvaśaḥ. śabdam ca ghoram sattvānām dāvāgneḥ iva vardhataḥ.

English Translation

But in that large forest, Rāma, along with the son of Sumitrā Lakṣmaṇa, saw running herds of deer everywhere. The terrible noise of the living beings grew like a forest fire.

०३ २६३ ०२५

शास्त्र - *śāstra*

अपश्येतां मुहूर्ताच्च कबन्धं घोरदर्शनम्।
मेघपर्वतसंकाशं शालस्कन्धं महाभुजम्।
उरोगतविशालाक्षं महोदरमहामुखम्॥

apaśyetāṃ muhūrtācca kabandhaṃ ghoradarśanam.
meghaparvatasaṃkāśaṃ śālaskandhaṃ mahābhujam.
urogataviśālākṣaṃ mahodaramahāmukham..

अन्वय - *anvaya*

अपश्यताम् मुहूर्तात् च कबन्धनामराक्षसम्। घोरदर्शनम्। मेघपर्वतसंकाशम्। शालम् इव स्कन्धम्। महाभुजम्। उरोगतविशालाक्षम्। महोदरमहामुखम्।

apaśyatām muhūrtāt ca kabandhanāmarākṣasam. ghoradarśanam. meghaparvatasaṃkāśam. śālam iva skandham. mahābhujam. urogataviśālākṣam. mahodaramahāmukham.

English Translation

And at some point, they both saw a terrible-looking demon named Kabandha. He

resembled a mountain of clouds, with shoulders like a Śāl tree, long-armed, big eyes gone into his chest, and a big mouth in a big stomach.

०३ २६३ ०२६

शास्त्र - *śāstra*

यदृच्छयाथ तद्रक्षः करे जग्राह लक्ष्मणम्।
विषादमगमत्सद्यः सौमित्रिरथ भारत॥

yadṛcchayātha tadrakṣaḥ kare jagrāha lakṣmaṇam.
viṣādamagamatsadyaḥ saumitriratha bhārata..

अन्वय - *anvaya*

यदृच्छया अथ तद्रक्षः करे जग्राह लक्ष्मणम्। विषादम् अगमत् सद्यः सौमित्रिः अथ भारत।

yadṛcchayā atha tadrakṣaḥ kare jagrāha lakṣmaṇam.
viṣādam agamat sadyaḥ saumitriḥ atha bhārata.

English Translation

O descendant of Bharata! Unexpectedly, that Rākṣasa grabbed Lakṣmaṇa in hand. Immediately, the son of Sumitrā went into despair.

०३ २६३ ०२७

शास्त्र - *śāstra*

स राममभिसंप्रेक्ष्य कृष्यते येन तन्मुखम्।
विषण्णश्चाब्रवीद्रामं पश्यावस्थामिमां मम॥

sa rāmamabhisaṃprekṣya kṛṣyate yena tanmukham.
viṣaṇṇaścābravīdrāmaṃ paśyāvasthāmimāṃ mama..

अन्वय - *anvaya*

रामम् अभिसम्प्रेक्ष्य कृष्यते येन तन्मुखम् सः विषण्णः रामम् अब्रवीत् पश्य अवस्थाम् इमाम् मम इति।

rāmam abhisamprekṣya kṛṣyate yena tanmukham saḥ viṣaṇṇaḥ rāmam abravīt paśya avasthām imām mama iti.

English Translation

Having perceived Rāma, He, overpowered by his mouth, dejectedly told Rāma - "Look at this situation of me."

०३ २६३ ०२८

शास्त्र - *śāstra*

हरणं चैव वैदेह्या मम चायमुपप्लवः।
राज्यभ्रंशश्च भवतस्तातस्य मरणं तथा॥

haraṇaṃ caiva vaidehyā mama cāyamupaplavaḥ.
rājyabhraṃśaśca bhavatastātasya maraṇaṃ tathā..

अन्वय - *anvaya*

हरणम् च एव वैदेह्याः मम च अयम् उपप्लवः राज्यभ्रंशः च भवतः तातस्य मरणम् तथा।

haraṇam ca eva vaidehyāḥ mama ca ayam upaplavaḥ rājyabhraṃśaḥ ca bhavataḥ tātasya maraṇam tathā.

English Translation

"And certainly abduction of Vaidehī, that affliction of me, and dethronement, along with the death of our father."

०३ २६३ ०२९

शास्त्र - *śāstra*

नाहं त्वां सह वैदेह्या समेतं कोसलागतम्।
द्रक्ष्यामि पृथिवीराज्ये पितृपैतामहे स्थितम्॥

nāhaṃ tvāṃ saha vaidehyā sametaṃ kosalāgatam.
drakṣyāmi pṛthivīrājye pitṛpaitāmahe sthitam..

अन्वय - *anvaya*

न द्रक्ष्यामि अहम् त्वाम् वैदेह्या सह समेतम् कोसलागतम् पृथिवीराज्ये पितृपैतामहे स्थितम्।

na drakṣyāmi aham tvām vaidehyā saha sametam kosalāgatam pṛthivīrājye pitṛpaitāmahe sthitam.

English Translation

"I will not see you returning to Kosala united with Vaidehī, living in the earthly ancestral dominion."

०३ २६३ ०३०

शास्त्र - *śāstra*

द्रक्ष्यन्त्यार्यस्य धन्या ये कुशलाजशमीलवैः।
अभिषिक्तस्य वदनं सोमं साभ्रलवं यथा॥

drakṣyantyāryasya dhanyā ye kuśalājaśamīlavaiḥ.
abhiṣiktasya vadanaṃ somaṃ sābhralavaṃ yathā..

अन्वय - *anvaya*

द्रक्ष्यन्ति आर्यस्य धन्याः ये कुशलाजशमीलवैः अभिषिक्तस्य वदनम् यथा सोमम् साभ्रलवम्।

drakṣyanti āryasya dhanyāḥ ye kuśalājaśamīlavaiḥ abhiṣiktasya vadanam yathā somam sābhralavam.

English Translation

"The fortunate ones will see the face consecrated with grass, parched grains, and Śamī pieces like clouds seeing the moon."

०३ २६३ ०३१

शास्त्र - *śāstra*

एवं बहुविधं धीमान्विललाप स लक्ष्मणः।
तमुवाचाथ काकुत्स्थः संभ्रमेष्वप्यसंभ्रमः॥

evaṃ bahuvidhaṃ dhīmānvilalāpa sa lakṣmaṇaḥ.
tamuvācātha kākutsthaḥ
saṃbhrameṣvapyasaṃbhramaḥ..

अन्वय - *anvaya*

एवम् बहुविधम् सः लक्ष्मणः धीमान् विललाप। तम् उवाच अथ काकुत्स्थः संभ्रमेषु अपि असंभ्रमः।

evam bahuvidham saḥ lakṣmaṇaḥ dhīmān vilalāpa.
tam uvāca atha kākutsthaḥ saṃbhrameṣu api asaṃbhramaḥ.

English Translation

In this way, the intelligent Lakṣmaṇa talked in various ways. Then, the descendant of Kakustha, Rāma, who was unagitated even amid all agitations, told him.

०३ २६३ ०३२

शास्त्र - *śāstra*

मा विषीद नरव्याघ्र नैष कश्चिन्मयि स्थिते।
छिन्ध्यस्य दक्षिणं बाहुं छिन्नः सव्यो मया भुजः॥

mā viṣīda naravyāghra naiṣa kaścinmayi sthite.
chindhyasya dakṣiṇaṃ bāhuṃ chinnaḥ savyo mayā bhujaḥ..

अन्वय - *anvaya*

मा विषीद नरव्याघ्र न एषः कश्चित् मयि स्थिते। छिन्धि अस्य दक्षिणम् बाहुम् छिन्नः सव्यः मया भुजः।

mā viṣīda naravyāghra na eṣaḥ kaścit mayi sthite. chindhi asya dakṣiṇam bāhum chinnaḥ savyaḥ mayā bhujaḥ.

English Translation

"O tiger amongst men! Do not be dejected. While I am there, this is nothing. Cut off the southern arm of this. I have cut off the left arm."

०३ २६३ ०३३

शास्त्र - *śāstra*

इत्येवं वदता तस्य भुजो रामेण पातितः।
खड्गेन भृशतीक्ष्णेन निकृत्तस्तिलकाण्डवत्॥

ityevaṃ vadatā tasya bhujo rāmeṇa pātitaḥ.
khaḍgena bhṛśatīkṣṇena nikṛttastilakāṇḍavat..

अन्वय - *anvaya*

इति एवम् तस्य भुजः वदता रामेण पातितः खड्गेन भृशतीक्ष्णेन तिलकाण्डवत् निकृत्तः।

iti evam tasya bhujaḥ vadatā rāmeṇa pātitaḥ khaḍgena bhṛśatīkṣṇena tilakāṇḍavat nikṛttaḥ.

English Translation

This way, his hand was struck down and cut by speaking Rāma with an excessively sharp sword like a sesame stalk.

०३ २६३ ०३४

शास्त्र - *śāstra*

ततोऽस्य दक्षिणं बाहुं खड्गेनाजघ्निवान्बली।
सौमित्रिरपि संप्रेक्ष्य भ्रातरं राघवं स्थितम्॥

tato'sya dakṣiṇaṃ bāhuṃ khaḍgenājaghnivānbalī.
saumitrirapi saṃprekṣya bhrātaraṃ rāghavaṃ
sthitam..

अन्वय - *anvaya*

ततः अस्य दक्षिणम् बाहुम् खड्गेन आजघान बली सौमित्रिः अपि सम्प्रेक्ष्य भ्रातरम् राघवम् स्थितम्।

tataḥ asya dakṣiṇam bāhum khaḍgena ājaghāna balī
saumitriḥ api samprekṣya bhrātaram rāghavam
sthitam.

English Translation

Therefore, having perceived standing, Brother Rāghava, the strong son of Sumitrā, also struck the southern arm of this.

०३ २६३ ०३५

शास्त्र - *śāstra*

पुनरभ्याहनत्पार्श्वे तद्रक्षो लक्ष्मणो भृशम्।
गतासुरपतद्भूमौ कबन्धः सुमहांस्ततः॥

punarabhyāhanatpārśve tadrakṣo lakṣmaṇo bhṛśam.
gatāsurapatadbhūmau kabandhaḥ sumahāṃstataḥ..

अन्वय - *anvaya*

पुनर् अभ्याहनत् पार्श्वे तद्रक्षः लक्ष्मणः भृशम्। गतासुः अपतत् भूमौ कबन्धः सुमहान् ततः।

punar abhyāhanat pārśve tadrakṣaḥ lakṣmaṇaḥ
bhṛśam. gatāsuḥ apatat bhūmau kabandhaḥ sumahān
tataḥ.

English Translation

Lakṣmaṇa violently struck that demon on the side again. Then, the dead large Kabandha fell to the ground.

०३ २६३ ०३६

शास्त्र - *śāstra*

तस्य देहाद्विनिःसृत्य पुरुषो दिव्यदर्शनः।
ददृशे दिवमास्थाय दिवि सूर्य इव ज्वलन्॥

tasya dehādviniḥsṛtya puruṣo divyadarśanaḥ.
dadṛśe divamāsthāya divi sūrya iva jvalan..

अन्वय - *anvaya*

तस्य देहात् विनिःसृत्य पुरुषः दिव्यदर्शनः ददृशे दिवम् आस्थाय दिवि सूर्यः इव ज्वलन्॥

tasya dehāt viniḥsṛtya puruṣaḥ divyadarśanaḥ dadṛśe divam āsthāya divi sūryaḥ iva jvalan..

English Translation

A divine person was seen going from his body towards heaven, with brightness like the Sun in heaven.

०३ २६३ ०३७

शास्त्र - *śāstra*

पप्रच्छ रामस्तं वाग्मी कस्त्वं प्रब्रूहि पृच्छतः।
कामया किमिदं चित्रमाश्चर्यं प्रतिभाति मे॥

papraccha rāmastaṃ vāgmī kastvaṃ prabrūhi pṛcchataḥ.
kāmayā kimidaṃ citramāścaryaṃ pratibhāti me..

अन्वय - *anvaya*

कः त्वम्। प्रब्रूहि पृच्छतः कामया। किम् इदम् चित्रम्। आश्चर्यम् प्रतिभाति मे। इति पप्रच्छ वाग्मी रामः तम्।

kaḥ tvam. prabrūhi pṛcchataḥ kāmayā. kim idam citram. āścaryam pratibhāti me. iti papraccha vāgmī rāmaḥ tam.

English Translation

The eloquent Rāma asked - "Who are you? May you speak kindly with the desire of the one asking? What is this appearance? It appears marvellous to me."

०३ २६३ ०३८

शास्त्र - *śāstra*

तस्याचचक्षे गन्धर्वो विश्वावसुरहं नृप।
प्राप्तो ब्रह्मानुशापेन योनिं राक्षससेविताम्॥

tasyācacakṣe gandharvo viśvāvasuraham nṛpa.
prāpto brahmānuśāpena yoniṃ rākṣasasevitām..

अन्वय - *anvaya*

तम् आचचक्षे गन्धर्वः विश्वावसुः अहम् नृप। प्राप्तः ब्रह्मानुशापेन योनिम् राक्षससेविताम्।

tam ācacakṣe gandharvaḥ viśvāvasuḥ aham nṛpa.
prāptaḥ brahmānuśāpena yonim rākṣasasevitām.

English Translation

He told him - "O King! I am a Gandharva named Viśvāvasu. The demonic race was obtained methodically with the curse of a Brāhman."

०३ २६३ ०३९

शास्त्र - *śāstra*

रावणेन हृता सीता राज्ञा लङ्कानिवासिना।
सुग्रीवमभिगच्छस्व स ते साह्यं करिष्यति॥

rāvaṇena hṛtā sītā rājñā laṅkānivāsinā.
sugrīvamabhigacchasva sa te sāhyaṃ kariṣyati..

अन्वय - *anvaya*

रावणेन हृता सीता राज्ञा लङ्कानिवासिना। सुग्रीवम् अभिगच्छस्व। सः ते साह्यम् करिष्यति।

rāvaṇena hṛtā sītā rājñā laṅkānivāsinā. sugrīvam abhigacchasva. saḥ te sāhyam kariṣyati.

English Translation

"Sītā was abducted by the King of Laṅkā, Rāvaṇa. Approach Sugrīva. He will provide assistance to you."

०३ २६३ ०४०

शास्त्र - *śāstra*

एषा पम्पा शिवजला हंसकारण्डवायुता।
ऋश्यमूकस्य शैलस्य संनिकर्षे तटाकिनी॥

eṣā pampā śivajalā haṃsakāraṇḍavāyutā.
ṛśyamūkasya śailasya saṃnikarṣe taṭākinī..

अन्वय - *anvaya*

एषा शिवजला तटाकिनी पम्पा हंसकारण्डवायुता ऋश्यमूकस्य शैलस्य संनिकर्षे।

eṣā śivajalā taṭākinī pampā haṃsakāraṇḍavāyutā ṛśyamūkasya śailasya saṃnikarṣe.

English Translation

"This large lake Pampā, with auspicious waters and filled with swans and ducks, is in the vicinity of Ṛśyamūka mountains."

०३ २६३ ०४१

शास्त्र - *śāstra*

संवसत्यत्र सुग्रीवश्चतुर्भिः सचिवैः सह।
भ्राता वानरराजस्य वालिनो हेममालिनः॥

saṃvasatyatra sugrīvaścaturbhiḥ sacivaiḥ saha.
bhrātā vānararājasya vālino hemamālinaḥ..

अन्वय - *anvaya*

वानरराजस्य वालिनः हेममालिनः भ्राता सुग्रीवः चतुर्भिः सचिवैः सह संवसति अत्र।

vānararājasya vālinaḥ hemamālinaḥ bhrātā sugrīvaḥ caturbhiḥ sacivaiḥ saha saṃvasati atra.

English Translation

"Sugrīva, brother of the King of Vānaras and garlanded with gold Vālin, resides here with four associates."

०३ २६३ ०४२

शास्त्र - *śāstra*

एतावच्छक्यमस्माभिर्वक्तुं द्रष्टासि जानकीम्।
ध्रुवं वानरराजस्य विदितो रावणालयः॥

etāvacchakyamasmābhirvaktuṃ draṣṭāsi jānakīm.
dhruvaṃ vānararājasya vidito rāvaṇālayaḥ..

अन्वय - *anvaya*

एतावत् शक्यम् अस्माभिः वक्तुम् द्रष्टासि जानकीम् इति। वानरराजेन ध्रुवम् विदितः रावणालयः।

etāvat śakyam asmābhiḥ vaktum draṣṭāsi jānakīm iti.
vānararājena dhruvam viditaḥ rāvaṇālayaḥ.

English Translation

"Thus far, we have been able to tell you that you will see Janaka's daughter. The King of Vānaras certainly knows the abode of Rāvaṇa."

०३ २६३ ०४३

शास्त्र - *śāstra*

इत्युक्त्वान्तर्हितो दिव्यः पुरुषः स महाप्रभः।
विस्मयं जग्मतुश्चोभौ तौ वीरौ रामलक्ष्मणौ॥

ityuktvāntarhito divyaḥ puruṣaḥ sa mahāprabhaḥ.
vismayaṃ jagmatuścobhau tau vīrau rāmalakṣmaṇau..

अन्वय - *anvaya*

इति उक्त्वा अन्तर्हितः दिव्यः पुरुषः सः महाप्रभः। विस्मयम् जग्मतुः च उभौ तौ वीरौ रामलक्ष्मणौ।

iti uktvā antarhitaḥ divyaḥ puruṣaḥ saḥ mahāprabhaḥ. vismayam jagmatuḥ ca ubhau tau vīrau rāmalakṣmaṇau.

English Translation

Having spoken, that splendid divine person disappeared, and the warriors, Rāma and Lakṣmaṇa, were amazed.

— ०८ —

०३ २६४

असतो मा सद्गमय।
तमसो मा ज्योतिर्गमय।
मृत्योर्मामृतं गमय॥
ॐ शान्तिः शान्तिः शान्तिः॥

०३ २६४ ००१

शास्त्र - *śāstra*

मार्कण्डेय उवाच।
ततोऽविदूरे नलिनीं प्रभूतकमलोत्पलाम्।
सीताहरणदुःखार्तः पम्पां रामः समासदत्॥

mārkaṇḍeya uvāca.
tato'vidūre nalinīṃ prabhūtakamalotpalām.
sītāharaṇaduḥkhārtaḥ pampāṃ rāmaḥ samāsadat..

अन्वय - *anvaya*

ततः अविदूरे पम्पाम् नलिनीम् प्रभूतकमलोत्पलाम् सीताहरणदुःखार्तः रामः समासदत्।

tataḥ avidūre pampām nalinīm prabhūtakamalotpalām
sītāharaṇaduḥkhārtaḥ rāmaḥ samāsadat.

English Translation

Mārkaṇḍeya said: Then, Rāma, saddened by the abduction of Sītā, arrived near a large lake abounding with nīla and red lotuses near Pampā.

०३ २६४ ००२

शास्त्र - *śāstra*

मारुतेन सुशीतेन सुखेनामृतगन्धिना।
सेव्यमानो वने तस्मिञ्जगाम मनसा प्रियाम्॥

mārutena suśītena sukhenāmṛtagandhinā.
sevyamāno vane tasmiñjagāma manasā priyām..

अन्वय - *anvaya*

मारुतेन सुशीतेन सुखेन अमृतगन्धिना सेव्यमानः वने तस्मिन् जगाम मनसा प्रियाम्।

mārutena suśītena sukhena amṛtagandhinā sevyamānaḥ vane tasmin jagāma manasā priyām.

English Translation

He, being honoured with a cold wind, happiness, and the fragrance of ambrosia, went into that forest with the thought of his wife.

०३ २६४ ००३

शास्त्र - *śāstra*

विललाप स राजेन्द्रस्तत्र कान्तामनुस्मरन्।
कामबाणाभिसंतप्तः सौमित्रिस्तमथाब्रवीत्॥

vilalāpa sa rājendrastatra kāntāmanusmaran.
kāmabāṇābhisaṃtaptaḥ saumitristamathābravīt..

अन्वय - *anvaya*

विललाप सः। राजेन्द्रः तत्र कान्ताम् अनुस्मरन् कामबाणाभिसंतप्तः। सौमित्रिः तम् अथ अब्रवीत्।

vilalāpa saḥ. rājendraḥ tatra kāntām anusmaran kāmabāṇābhisaṃtaptaḥ. saumitriḥ tam atha abravīt.

English Translation

He was lamenting. There, the emperor remembered his beloved lady being tormented by the arrow of the god of love. Then, the son of Sumitrā told him.

०३ २६४ ००४

शास्त्र - *śāstra*

न त्वामेवंविधो भावः स्प्रष्टुमर्हति मानद।
आत्मवन्तमिव व्याधिः पुरुषं वृद्धशीलिनम्॥

na tvāmevaṃvidho bhāvaḥ spraṣṭumarhati mānada.
ātmavantamiva vyādhiḥ puruṣaṃ vṛddhaśīlinam..

अन्वय - *anvaya*

मानद न एवंविधः स्प्रष्टुम् अर्हति भावः त्वाम् आत्मवन्तम् इव व्याधिः पुरुषम् वृद्धशीलिनम्।

mānada na evaṃvidhaḥ spraṣṭum arhati bhāvaḥ tvām
ātmavantam iva vyādhiḥ puruṣam vṛddhaśīlinam.

English Translation

"O honour-giver! Emotion is not allowed to touch you in such a way as diseases touch an old man."

०३ २६४ ००५

शास्त्र - *śāstra*

प्रवृत्तिरुपलब्धा ते वैदेह्या रावणस्य च।
तां त्वं पुरुषकारेण बुद्ध्या चैवोपपादय॥

pravṛttirupalabdhā te vaidehyā rāvaṇasya ca.
tāṃ tvaṃ puruṣakāreṇa buddhyā caivopapādaya..

अन्वय - *anvaya*

प्रवृत्तिः उपलब्धा त्वया वैदेह्याः रावणस्य च। ताम् त्वम् पुरुषकारेण बुद्ध्या च एव उपपादय।

pravṛttiḥ upalabdhā tvayā vaidehyāḥ rāvaṇasya ca.
tām tvam puruṣakāreṇa buddhyā ca eva upapādaya.

English Translation

"You have received the news of Vaidehī and Rāvaṇa. You accomplish it with heroism and certainly intellect."

०३ २६४ ००६

शास्त्र - *śāstra*

अभिगच्छाव सुग्रीवं शैलस्थं हरिपुंगवम्।
मयि शिष्ये च भृत्ये च सहाये च समाश्वस॥

abhigacchāva sugrīvaṃ śailasthaṃ haripuṃgavam.
mayi śiṣye ca bhṛtye ca sahāye ca samāśvasa..

अन्वय - *anvaya*

अभिगच्छाव सुग्रीवम् शैलस्थम् हरिपुंगवम्। मयि शिष्ये च भृत्ये च सहाये च समाश्वसिहि।

abhigacchāva sugrīvam śailastham haripuṃgavam.
mayi śiṣye ca bhṛtye ca sahāye ca samāśvasihi.

English Translation

"Let us approach mountain-dwelling chief-of-monkeys Sugrīva. Have trust in me, your student, servant, and companion."

०३ २६४ ००७

शास्त्र - *śāstra*

एवं बहुविधैर्वाक्यैर्लक्ष्मणेन स राघवः।
उक्तः प्रकृतिमापेदे कार्ये चानन्तरोऽभवत्॥

evaṃ bahuvidhairvākyairlakṣmaṇena sa rāghavaḥ.
uktaḥ prakṛtimāpede kārye cānantaro'bhavat..

अन्वय - *anvaya*

एवम् बहुविधैः वाक्यैः लक्ष्मणेन सः राघवः उक्तः प्रकृतिम् आपेदे कार्ये च अनन्तरः अभवत्।

evam bahuvidhaiḥ vākyaiḥ lakṣmaṇena saḥ rāghavaḥ
uktaḥ prakṛtim āpede kārye ca anantaraḥ abhavat.

English Translation

Rāghava, who was spoken a multitude of things in this way by Lakṣmaṇa, returned to his original nature and was uninterrupted in what should be done.

०३ २६४ ००८

शास्त्र - *śāstra*

निषेव्य वारि पम्पायास्तर्पयित्वा पितॄनपि।
प्रतस्थतुरुभौ वीरौ भ्रातरौ रामलक्ष्मणौ॥

niṣevya vāri pampāyāstarpayitvā pitṝnapi.
pratasthaturubhau vīrau bhrātarau rāmalakṣmaṇau..

अन्वय - *anvaya*

निषेव्य वारि पम्पायाः पितॄन् अपि तर्पयित्वा प्रतस्थतुः उभौ वीरौ भ्रातरौ रामलक्ष्मणौ।

niṣevya vāri pampāyāḥ pitṝn api tarpayitvā pratasthatuḥ ubhau vīrau bhrātarau rāmalakṣmaṇau.

English Translation

Having honoured the water of Pampā and also satiating the fathers, the two warriors brothers Rāma and Lakṣmaṇa advanced.

०३ २६४ ००९

शास्त्र - *śāstra*

तावृश्यमूकमभ्येत्य बहुमूलफलं गिरिम्।
गिर्यग्रे वानरान्पञ्च वीरौ ददृशतुस्तदा॥

tāvṛśyamūkamabhyetya bahumūlaphalaṃ girim.
giryagre vānarānpañca vīrau dadṛśatustadā..

अन्वय - *anvaya*

तौ बहुमूलफलम् गिरिम् ऋश्यमूकम् अभ्येत्य। गिर्यग्रे वानरान् पञ्च वीरौ ददृशतुः तदा।

tau bahumūlaphalam girim ṛśyamūkam abhyetya. giryagre vānarān pañca vīrau dadṛśatuḥ tadā.

English Translation

Those two reached Ṛśyamūka mountain, which had lots of fruits and roots. Then, the two warriors saw five Vānaras in front of the hill.

०३ २६४ ०१०

शास्त्र - *śāstra*

सुग्रीवः प्रेषयामास सचिवं वानरं तयोः।
बुद्धिमन्तं हनूमन्तं हिमवन्तमिव स्थितम्॥

sugrīvaḥ preṣayāmāsa sacivaṃ vānaraṃ tayoḥ.
buddhimantaṃ hanūmantaṃ himavantamiva sthitam..

अन्वय - *anvaya*

सुग्रीवः प्रेषयामास तयोः सचिवम् वानरम् बुद्धिमन्तम् हनूमन्तम् हिमवन्तम् इव स्थितम्।

sugrīvaḥ preṣayāmāsa tayoḥ sacivam vānaram buddhimantam hanūmantam himavantam iva sthitam.

English Translation

Sugrīva sent them his minister Vānara intelligent, Hanūmat, standing there like a snowy mountain.

०३ २६४ ०११

शास्त्र - *śāstra*

तेन संभाष्य पूर्वं तौ सुग्रीवमभिजग्मतुः।
सख्यं वानरराजेन चक्रे रामस्ततो नृप॥

tena saṃbhāṣya pūrvaṃ tau sugrīvamabhijagmatuḥ.
sakhyaṃ vānararājena cakre rāmastato nṛpa..

अन्वय - *anvaya*

तेन पूर्वम् सम्भाष्य तौ सुग्रीवम् अभिजग्मतुः। ततः सख्यम् वानरराजेन चक्रे रामः नृप।

tena pūrvam sambhāṣya tau sugrīvam abhijagmatuḥ.
tataḥ sakhyam vānararājena cakre rāmaḥ nṛpa.

English Translation

Having conversed with him first, they approached Sugrīva. O King! Then, Rāma made a friendship with the King of Vānaras.

०३ २६४ ०१२

शास्त्र - *śāstra*

तद्वासो दर्शयामासुस्तस्य कार्ये निवेदिते।
वानराणां तु यत्सीता ह्रियमाणाभ्यवासृजत्॥

tadvāso darśayāmāsustasya kārye nivedite.
vānarāṇāṃ tu yatsītā hriyamāṇābhyavāsṛjat..

अन्वय - *anvaya*

तद् वासः दर्शयामासुः तस्य कार्ये निवेदिते वानराणाम् तु यद् ह्रियमाणा सीता अभ्यवासृजत्।

tad vāsaḥ darśayāmāsuḥ tasya kārye nivedite
vānarāṇām tu yad hriyamāṇā sītā abhyavāsṛjat.

English Translation

While telling him what was supposed to be done, they saw the cloth thrown amongst the Vānaras by the abducted Sītā.

०३ २६४ ०१३

शास्त्र - *śāstra*

तत्प्रत्ययकरं लब्ध्वा सुग्रीवं प्लवगाधिपम्।
पृथिव्यां वानरैश्वर्ये स्वयं रामोऽभ्यषेचयत्॥

tatpratyayakaraṃ labdhvā sugrīvaṃ plavagādhipam.
pṛthivyāṃ vānaraiśvarye svayaṃ rāmo'bhyaṣecayat..

अन्वय - *anvaya*

तत्प्रत्ययकरम् लब्ध्वा सुग्रीवम् प्लवगाधिपम् पृथिव्याम् वानरैश्वर्ये स्वयम् रामः अभ्यषेचयत्।

tatpratyayakaram labdhvā sugrīvam plavagādhipam pṛthivyām vānaraiśvarye svayam rāmaḥ abhyaṣecayat.

English Translation

Having obtained his confidence, Rāma himself anointed the commander of Vānaras Sugrīva to the sovereignty of Vānaras on the earth.

०३ २६४ ०१४

शास्त्र - *śāstra*

प्रतिजज्ञे च काकुत्स्थः समरे वालिनो वधम्।
सुग्रीवश्चापि वैदेह्याः पुनरानयनं नृप॥

pratijajñe ca kākutsthaḥ samare vālino vadham.
sugrīvaścāpi vaidehyāḥ punarānayanaṃ nṛpa..

अन्वय - *anvaya*

प्रतिजज्ञे च काकुत्स्थः समरे वालिनः वधम्। सुग्रीवः च अपि वैदेह्याः पुनरानयनम् नृप।

pratijajñe ca kākutsthaḥ samare vālinaḥ vadham.
sugrīvaḥ ca api vaidehyāḥ punarānayanam nṛpa.

English Translation

O King! The descendant of Kakustha promised the slaying of Vālin in a battle, and Sugrīva also promised the bringing back of Vaidehī.

०३ २६४ ०१५

शास्त्र - *śāstra*

इत्युक्त्वा समयं कृत्वा विश्वास्य च परस्परम्।
अभ्येत्य सर्वे किष्किन्धां तस्थुर्युद्धाभिकाङ्क्षिणः॥

ityuktvā samayaṃ kṛtvā viśvāsya ca parasparam.
abhyetya sarve kiṣkindhāṃ
tasthuryuddhābhikāṅkṣiṇaḥ..

अन्वय - *anvaya*

इति उक्त्वा समयम् कृत्वा परस्परम् विश्वास्य किष्किन्धाम् अभ्येत्य सर्वे तस्थुः युद्धाभिकाङ्क्षिणः।

iti uktvā samayam kṛtvā parasparam viśvāsya kiṣkindhām abhyetya sarve tasthuḥ yuddhābhikāṅkṣiṇaḥ.

English Translation

Thus, having spoken in this way, making a mutual treaty, and trusting one another, they all stood from the desire of war, having reached Kiṣkindhā.

०३ २६४ ०१६

शास्त्र - *śāstra*

सुग्रीवः प्राप्य किष्किन्धां ननादौघनिभस्वनः।
नास्य तन्ममृषे वाली तं तारा प्रत्यषेधयत्॥

sugrīvaḥ prāpya kiṣkindhāṃ nanādaughanibhasvanaḥ.
nāsya tanmamṛṣe vālī taṃ tārā pratyaṣedhayat..

अन्वय - *anvaya*

किष्किन्धाम् प्राप्य औघनिभस्वनः सुग्रीवः ननाद। न अस्य तद् ममृषे वाली। तम् तारा प्रत्यषेधयत्।

kiṣkindhām prāpya aughanibhasvanaḥ sugrīvaḥ nanāda. na asya tad mamṛṣe vālī. tam tārā pratyaṣedhayat.

English Translation

Having reached Kiṣkindhā, Sugrīva roared, sounding like a flood. Vālin did not neglect this of him. Tārā restrained him.

०३ २६४ ०१७

शास्त्र - *śāstra*

यथा नदति सुग्रीवो बलवानेष वानरः।
मन्ये चाश्रयवान्प्राप्तो न त्वं निर्गन्तुमर्हसि॥

yathā nadati sugrīvo balavāneṣa vānaraḥ.
manye cāśrayavānprāpto na tvaṃ nirgantumarhasi..

अन्वय - *anvaya*

यथा नदति सुग्रीवः बलवान् एषः वानरः। मन्ये च आश्रयवान् प्राप्तः न त्वम् निर्गन्तुम् अर्हसि।

yathā nadati sugrīvaḥ balavān eṣaḥ vānaraḥ. manye ca āśrayavān prāptaḥ na tvam nirgantum arhasi.

English Translation

“In the way this strong Vānara Sugrīva roars, I believe he has help. You should not go out.”

०३ २६४ ०१८

शास्त्र - *śāstra*

हेममाली ततो वाली तारां ताराधिपाननाम्।
प्रोवाच वचनं वाग्मी तां वानरपतिः पतिः॥

hemamālī tato vālī tārāṃ tārādhipānanām.
provāca vacanaṃ vāgmī tāṃ vānarapatiḥ patiḥ..

अन्वय - *anvaya*

ततः हेममाली वाग्मी वानरपतिः पतिः वाली ताम् ताराम् ताराधिपाननाम् प्रोवाच वचनम्।

tataḥ hemamālī vāgmī vānarapatiḥ patiḥ vālī tām tārām tārādhipānanām provāca vacanam.

English Translation

Therefore, the eloquent gold-garlanded commander of Vānaras husband, Vālin, told this to Tārā, whose face was like the queen of stars.

०३ २६४ ०१९

शास्त्र - *śāstra*

सर्वभूतरुतज्ञा त्वं पश्य बुद्ध्या समन्विता।
केनापाश्रयवान्प्राप्तो ममैष भ्रातृगन्धिकः॥

sarvabhūtarutajñā tvaṃ paśya buddhyā samanvitā.
kenāpāśrayavānprāpto mamaiṣa bhrātṛgandhikaḥ..

अन्वय - *anvaya*

सर्वभूतरुतज्ञा त्वम् पश्य बुद्ध्या समन्विता। केन अपाश्रयवान् प्राप्तः मम एषः भ्रातृगन्धिकः।

sarvabhūtarutajñā tvam paśya buddhyā samanvitā. kena apāśrayavān prāptaḥ mama eṣaḥ bhrātṛgandhikaḥ.

English Translation

"You, who understands cries of all the world and filled with intellect, look. Whose support has been obtained by this brother only by the name of it of me?"

०३ २६४ ०२०

शास्त्र - *śāstra*

चिन्तयित्वा मुहूर्तं तु तारा ताराधिपप्रभा।
पतिमित्यब्रवीत्प्राज्ञा शृणु सर्वं कपीश्वर॥

cintayitvā muhūrtaṃ tu tārā tārādhipaprabhā.
patimityabravītprājñā śṛṇu sarvaṃ kapīśvara..

अन्वय - *anvaya*

मुहूर्तम् चिन्तयित्वा तु प्राज्ञा तारा ताराधिपप्रभा पतिम् अब्रवीत् शृणु सर्वम् कपीश्वर इति।

muhūrtam cintayitvā tu prājñā tārā tārādhipaprabhā
patim abravīt śṛṇu sarvam kapīśvara iti.

English Translation

But having thought for some time, the intelligent Tārā, with the brightness of the queen of stars, told her husband - "O lord of the monkeys! Listen to everything."

०३ २६४ ०२१

शास्त्र - *śāstra*

हृतदारो महासत्त्वो रामो दशरथात्मजः।
तुल्यारिमित्रतां प्राप्तः सुग्रीवेण धनुर्धरः॥

hṛtadāro mahāsattvo rāmo daśarathātmajaḥ.
tulyārimitratāṃ prāptaḥ sugrīveṇa dhanurdharaḥ..

अन्वय - *anvaya*

हृतदारः महासत्त्वः रामः दशरथात्मजः धनुर्धरः तुल्यारिमित्रताम् प्राप्तः सुग्रीवेण।

hṛtadāraḥ mahāsattvaḥ rāmaḥ daśarathātmajaḥ dhanurdharaḥ tulyārimitratām prāptaḥ sugrīveṇa.

English Translation

"The noble archer, son of Daśaratha, Rāma, whose wife was abducted, has allied with Sugrīva."

०३ २६४ ०२२

शास्त्र - *śāstra*

भ्राता चास्य महाबाहुः सौमित्रिरपराजितः।
लक्ष्मणो नाम मेधावी स्थितः कार्यार्थसिद्धये॥

bhrātā cāsya mahābāhuḥ saumitriraparājitaḥ.
lakṣmaṇo nāma medhāvī sthitaḥ kāryārthasiddhaye..

अन्वय - *anvaya*

भ्राता च अस्य महाबाहुः सौमित्रिः अपराजितः लक्ष्मणः नाम मेधावी स्थितः कार्यार्थसिद्धये।

bhrātā ca asya mahābāhuḥ saumitriḥ aparājitaḥ lakṣmaṇaḥ nāma medhāvī sthitaḥ kāryārthasiddhaye.

English Translation

"And his brother, long-armed son-of-Sumitrā, undefeated, learned person Lakṣmaṇa, is present for success."

०३ २६४ ०२३

शास्त्र - *śāstra*

मैन्दश्च द्विविदश्चैव हनूमांश्चानिलात्मजः।
जाम्बवानृक्षराजश्च सुग्रीवसचिवाः स्थिताः॥

maindaśca dvividaścaiva hanūmāṃścānilātmajaḥ.
jāmbavānṛkṣarājaśca sugrīvasacivāḥ sthitāḥ..

अन्वय - *anvaya*

मैन्दः च द्विविदः च एव हनूमान् च अनिलात्मजः जाम्बवान् ऋक्षराजः च सुग्रीवसचिवाः स्थिताः।

maindaḥ ca dvividaḥ ca eva hanūmān ca anilātmajaḥ
jāmbavān ṛkṣarājaḥ ca sugrīvasacivāḥ sthitāḥ.

English Translation

"And certainly, the ministers of Sugrīva, Mainda, Dvivida, son of the god of wind Hanūmat, and the King of bears Jāmbavat are standing."

०३ २६४ ०२४

शास्त्र - *śāstra*

सर्व एते महात्मानो बुद्धिमन्तो महाबलाः।
अलं तव विनाशाय रामवीर्यव्यपाश्रयात्॥

sarva ete mahātmāno buddhimanto mahābalāḥ.
alaṃ tava vināśāya rāmavīryavyapāśrayāt..

अन्वय - *anvaya*

सर्वः एते महात्मानः बुद्धिमन्तः महाबलाः अलम् तव विनाशाय रामवीर्यव्यपाश्रयात्।

sarvaḥ ete mahātmānaḥ buddhimantaḥ mahābalāḥ
alam tava vināśāya rāmavīryavyapāśrayāt.

English Translation

"All these noble, intelligent, mighty are enough for the destruction of you from having recourse in the bravery of Rāma."

०३ २६४ ०२५

शास्त्र - *śāstra*

तस्यास्तदाक्षिप्य वचो हितमुक्तं कपीश्वरः।
पर्यशङ्कत तामीर्षुः सुग्रीवगतमानसाम्॥

tasyāstadākṣipya vaco hitamuktaṃ kapīśvaraḥ.
paryaśaṅkata tāmīrṣuḥ sugrīvagatamānasām..

अन्वय - *anvaya*

तदा वचः हितम् उक्तम् तस्याः अक्षिप्य कपीश्वरः ईर्षुः सुग्रीवगतमानसाम् पर्यशङ्कत ताम्।

tadā vacaḥ hitam uktam tasyāḥ akṣipya kapīśvaraḥ īrṣuḥ sugrīvagatamānasām paryaśaṅkata tām.

English Translation

Then, the lord of monkeys suspected her beneficial words, jealous of her thoughts of Sugrīva.

०३ २६४ ०२६

शास्त्र - *śāstra*

तारां परुषमुक्त्वा स निर्जगाम गुहामुखात्।
स्थितं माल्यवतोऽभ्याशे सुग्रीवं सोऽभ्यभाषत॥

tārāṃ paruṣamuktvā sa nirjagāma guhāmukhāt.
sthitaṃ mālyavato'bhyāśe sugrīvaṃ so'bhyabhāṣata..

अन्वय - *anvaya*

ताराम् परुषम् उक्त्वा सः निर्जगाम गुहामुखात्। स्थितम् माल्यवतः अभ्याशे सुग्रीवम् सः अभ्यभाषत।

tārām paruṣam uktvā saḥ nirjagāma guhāmukhāt. sthitam mālyavataḥ abhyāśe sugrīvam saḥ abhyabhāṣata.

English Translation

Having said harsh words to Tārā, he went out from the mouth of the cave. He addressed Sugrīva, who was situated in the vicinity of Mālyavat.

०३ २६४ ०२७

शास्त्र - *śāstra*

असकृत्त्वं मया मूढ निर्जितो जीवितप्रियः।
मुक्तो ज्ञातिरिति ज्ञात्वा का त्वरा मरणे पुनः॥

asakṛttvaṃ mayā mūḍha nirjito jīvitapriyaḥ.
mukto jñātiriti jñātvā kā tvarā maraṇe punaḥ..

अन्वय - *anvaya*

असकृत् त्वम् मया मूढ निर्जितः। जीवितप्रियः मुक्तः ज्ञातिः इति ज्ञात्वा। का त्वरा मरणे पुनः।

asakṛt tvam mayā mūḍha nirjitaḥ. jīvitapriyaḥ muktaḥ jñātiḥ iti jñātvā. kā tvarā maraṇe punaḥ.

English Translation

"O fool! I have repeatedly conquered you. You were liberated knowing that you are a kinsman as dear as life. What is your haste to die again?"

०३ २६४ ०२८

शास्त्र - *śāstra*

इत्युक्तः प्राह सुग्रीवो भ्रातरं हेतुमद्वचः।
प्राप्तकालममित्रघ्नो रामं संबोधयन्निव॥

ityuktaḥ prāha sugrīvo bhrātaraṃ hetumadvacaḥ.
prāptakālamamitraghno rāmaṃ saṃbodhayanniva..

अन्वय - *anvaya*

इति उक्तः प्राह सुग्रीवः अमित्रघ्नः भ्रातरम् हेतुमद्वचः प्राप्तकालम् रामम् संबोधयन् इव।

iti uktaḥ prāha sugrīvaḥ amitraghnaḥ bhrātaram hetumadvacaḥ prāptakālam rāmam saṃbodhayan iva.

English Translation

The slayer of enemies, Sugrīva, who was spoken to in this way, said words with a cause to his brother as if causing Rāma to know that the time had arrived.

०३ २६४ ०२९

शास्त्र - *śāstra*

हृतदारस्य मे राजन्हृतराज्यस्य च त्वया।
किं नु जीवितसामर्थ्यमिति विद्धि समागतम्॥

hṛtadārasya me rājanhṛtarājyasya ca tvayā.
kiṃ nu jīvitasāmarthyamiti viddhi samāgatam..

अन्वय - *anvaya*

राजन् हृतदारस्य मे हृतराज्यस्य च त्वया किम् नु जीवितसामर्थ्यम् इति विद्धि माम् समागतम्।

rājan hṛtadārasya me hṛtarājyasya ca tvayā kim nu jīvitasāmarthyam iti viddhi mām samāgatam.

English Translation

“O King! You think on my arrival - What is the aim of my life, whose wife and kingdom have been taken away by you?”

०३ २६४ ०३०

शास्त्र - *śāstra*

एवमुक्त्वा बहुविधं ततस्तौ संनिपेततुः।
समरे वालिसुग्रीवौ शालतालशिलायुधौ॥

evamuktvā bahuvidhaṃ tatastau saṃnipetatuḥ.
samare vālisugrīvau śālatālaśilāyudhau..

अन्वय - *anvaya*

एवम् उक्त्वा बहुविधम् ततः तौ वालिसुग्रीवौ शालतालशिलायुधौ समरे संनिपेततुः।

evam uktvā bahuvidham tataḥ tau vālisugrīvau śālatālaśilāyudhau samare saṃnipetatuḥ.

English Translation

Thus, having spoken a multitude of things in this way, Vālin and Sugrīva, fighting with stones, Palm, and Śāl, descended into a battle.

०३ २६४ ०३१

शास्त्र - *śāstra*

उभौ जघ्नतुरन्योन्यमुभौ भूमौ निपेततुः।
उभौ ववल्गतुश्चित्रं मुष्टिभिश्च निजघ्नतुः॥

ubhau jaghnaturanyonyamubhau bhūmau nipetatuḥ.
ubhau vavalgatuścitraṃ muṣṭibhiśca nijaghnatuḥ..

अन्वय - *anvaya*

उभौ जघ्नतुः अन्योन्यम्। उभौ भूमौ निपेततुः। उभौ ववल्गतुः चित्रम्। मुष्टिभिः च निजघ्नतुः।

ubhau jaghnatuḥ anyonyam. ubhau bhūmau nipetatuḥ. ubhau vavalgatuḥ citram. muṣṭibhiḥ ca nijaghnatuḥ.

English Translation

Both hit mutually, fell to the ground, leapt brilliantly, and struck with fists.

०३ २६४ ०३२

शास्त्र - *śāstra*

उभौ रुधिरसंसिक्तौ नखदन्तपरिक्षतौ।
शुशुभाते तदा वीरौ पुष्पिताविव किंशुकौ॥

ubhau rudhirasaṃsiktau nakhadantaparikṣatau.
śuśubhāte tadā vīrau puṣpitāviva kiṃśukau..

अन्वय - *anvaya*

उभौ रुधिरसंसिक्तौ नखदन्तपरिक्षतौ शुशुभाते तदा वीरौ पुष्पितौ इव किंशुकौ।

ubhau rudhirasaṃsiktau nakhadantaparikṣatau śuśubhāte tadā vīrau puṣpitau iva kiṃśukau.

English Translation

Both were moistened with blood and hurt with nails and teeth, and the warriors blossomed like Kiṃśuka trees.

०३ २६४ ०३३

शास्त्र - *śāstra*

न विशेषस्तयोर्युद्धे तदा कश्चन दृश्यते।
सुग्रीवस्य तदा मालां हनूमान्कण्ठ आसजत्॥

na viśeṣastayoryuddhe tadā kaścana dṛśyate.
sugrīvasya tadā mālāṃ hanūmānkaṇṭha āsajat..

अन्वय - *anvaya*

विशेषः तयोः युद्धे तदा कश्चन न दृश्यते। तदा हनूमान् सुग्रीवस्य कण्ठे मालाम् आसजत्।

viśeṣaḥ tayoḥ yuddhe tadā kaścana na dṛśyate. tadā hanūmān sugrīvasya kaṇṭhae mālām āsajat.

English Translation

No distinction was visible in the battle. Then Hanūmat fastened a garland on the neck of Sugrīva.

०३ २६४ ०३४

शास्त्र - *śāstra*

स मालया तदा वीरः शुशुभे कण्ठसक्तया।
श्रीमानिव महाशैलो मलयो मेघमालया॥

sa mālayā tadā vīraḥ śuśubhe kaṇṭhasaktayā.
śrīmāniva mahāśailo malayo meghamālayā..

अन्वय - *anvaya*

सः मालया तदा वीरः शुशुभे कण्ठसक्तया श्रीमान् इव मलयः महाशैलः मेघमालया।

saḥ mālayā tadā vīraḥ śuśubhe kaṇṭhasaktayā śrīmān iva malayaḥ mahāśailaḥ meghamālayā.

English Translation

Then, the illustrious warrior was embellished with the garland sticking in the neck like Malaya mountain with a garland of clouds.

०३ २६४ ०३५

शास्त्र - *śāstra*

कृतचिह्नं तु सुग्रीवं रामो दृष्ट्वा महाधनुः।
विचकर्ष धनुःश्रेष्ठं वालिमुद्दिश्य लक्ष्यवत्॥

kṛtacihnaṃ tu sugrīvaṃ rāmo dṛṣṭvā mahādhanuḥ.
vicakarṣa dhanuḥśreṣṭhaṃ vālimuddiśya lakṣyavat..

अन्वय - *anvaya*

कृतचिह्नम् तु सुग्रीवम् दृष्ट्वा रामः महाधनुः विचकर्ष धनुःश्रेष्ठम् वालिम् उद्दिश्य लक्ष्यवत्।

kṛtacihnam tu sugrīvam dṛṣṭvā rāmaḥ mahādhanuḥ vicakarṣa dhanuḥśreṣṭham vālim uddiśya lakṣyavat.

English Translation

Having seen marked Sugrīva, the mighty archer Rāma drew the best arrow aiming at Vālin as an aim.

०३ २६४ ०३६

शास्त्र - *śāstra*

विस्फारस्तस्य धनुषो यन्त्रस्येव तदा बभौ।
वितत्रास तदा वाली शरेणाभिहतो हृदि॥

visphārastasya dhanuṣo yantrasyeva tadā babhau.
vitatrāsa tadā vālī śareṇābhihato hṛdi..

अन्वय - *anvaya*

तदा विस्फारः तस्य धनुषः यन्त्रस्य इव बभौ। वितत्रास तदा वाली शरेण अभिहतः हृदि।

tadā visphāraḥ tasya dhanuṣaḥ yantrasya iva babhau.
vitatrāsa tadā vālī śareṇa abhihataḥ hṛdi.

English Translation

Then, the discharging of his arrow appeared like a machine. Then, Vālin, hit by an arrow in his heart, trembled.

०३ २६४ ०३७

शास्त्र - *śāstra*

स भिन्नमर्माभिहतो वक्त्राच्छोणितमुद्वमन्।
ददर्शावस्थितं राममारात्सौमित्रिणा सह॥

sa bhinnamarmābhihato vaktrācchoṇitamudvaman.
dadarśāvasthitaṃ rāmamārātsaumitriṇā saha..

अन्वय - *anvaya*

सः भिन्नमर्माभिहतः वक्त्रात् शोणितम् उद्वमन् ददर्श अवस्थितम् रामम् आरात् सौमित्रिणा सह।

saḥ bhinnamarmābhihataḥ vaktrāt śoṇitam udvaman dadarśa avasthitam rāmam ārāt saumitriṇā saha.

English Translation

He, who was destroyed in various parts of his body, vomiting blood from his mouth, saw Rāma standing from a distant place with Lakṣmaṇa.

०३ २६४ ०३८

शास्त्र - *śāstra*

गर्हयित्वा स काकुत्स्थं पपात भुवि मूर्छितः।
तारा ददर्श तं भूमौ तारापतिमिव च्युतम्॥

garhayitvā sa kākutsthaṃ papāta bhuvi mūrchitaḥ.
tārā dadarśa taṃ bhūmau tārāpatimiva cyutam..

अन्वय - *anvaya*

काकुत्स्थम् गर्हयित्वा सः पपात भुवि मूर्छितः। तारा ददर्श तम् भूमौ तारापतिम् बृहस्पतिम् इव च्युतम्।

kākutstham garhayitvā saḥ papāta bhuvi mūrchitaḥ.
tārā dadarśa tam bhūmau tārāpatim bṛhaspatim iva cyutam.

English Translation

Having blamed Rāma, he fainted and fell to the ground. Tārā saw him on the ground, fallen like Bṛhaspati.

०३ २६४ ०३९

शास्त्र - *śāstra*

हते वालिनि सुग्रीवः किष्किन्धां प्रत्यपद्यत।
तां च तारापतिमुखीं तारां निपतितेश्वराम्॥

hate vālini sugrīvaḥ kiṣkindhāṃ pratyapadyata.
tāṃ ca tārāpatimukhīṃ tārāṃ nipatiteśvarām..

अन्वय - *anvaya*

हते वालिनि सुग्रीवः किष्किन्धाम् ताम् च तारापतिमुखीम् ताराम् निपतितेश्वराम् प्रत्यपद्यत।

hate vālini sugrīvaḥ kiṣkindhām tām ca tārāpatimukhīm tārām nipatiteśvarām pratyapadyata.

English Translation

Having killed Vālin, Sugrīva returned to Kiṣkindhā and Tārā, whose husband was defeated and whose face was like the lord of stars.

०३ २६४ ०४०

शास्त्र - *śāstra*

रामस्तु चतुरो मासान्पृष्ठे माल्यवतः शुभे।
निवासमकरोद्धीमान्सुग्रीवेणाभ्युपस्थितः॥

rāmastu caturo māsānpṛṣṭhe mālyavataḥ śubhe.
nivāsamakaroddhīmānsugrīveṇābhyupasthitaḥ..

अन्वय - *anvaya*

रामः धीमान् तु चतुरः मासान् माल्यवतः पृष्ठे शुभे निवासम् अकरोत् सुग्रीवेण अभ्युपस्थितः।

rāmaḥ dhīmān tu caturaḥ māsān mālyavataḥ pṛṣṭhe śubhe nivāsam akarot sugrīveṇa abhyupasthitaḥ.

English Translation

The intelligent Rāma stayed for four months on the auspicious top of Mālyavat accompanied by Sugrīva.

०३ २६४ ०४१

शास्त्र - *śāstra*

रावणोऽपि पुरीं गत्वा लङ्कां कामबलात्कृतः।
सीतां निवेशयामास भवने नन्दनोपमे।
अशोकवनिकाभ्याशे तापसाश्रमसंनिभे॥

rāvaṇo'pi purīṃ gatvā laṅkāṃ kāmabalātkṛtaḥ.
sītāṃ niveśayāmāsa bhavane nandanopame.
aśokavanikābhyāśe tāpasāśramasaṃnibhe..

अन्वय - *anvaya*

लङ्काम् पुरीम् गत्वा कामात् बलात् कृतः रावणः अपि सीताम् निवेशयामास भवने नन्दनोपमे अशोकवनिकाभ्याशे तापसाश्रमसंनिभे।

laṅkām purīm gatvā kāmāt balāt kṛtaḥ rāvaṇaḥ api sītām niveśayāmāsa bhavane nandanopame aśokavanikābhyāśe tāpasāśramasaṃnibhe.

English Translation

Having gone to Laṅkā, Rāvaṇa, from the force of desire, caused Sītā to settle in a mansion like Nandana in the proximity of a grove of Aśoka trees resembling a hermitage of ascetics.

०३ २६४ ०४२

शास्त्र - *śāstra*

भर्तृस्मरणतन्वङ्गी तापसीवेषधारिणी।
उपवासतपःशीला तत्र सा पृथुलेक्षणा।
उवास दुःखवसतीः फलमूलकृताशना॥

bhartṛsmaraṇatanvaṅgī tāpasīveṣadhāriṇī.
upavāsatapaḥśīlā tatra sā pṛthulekṣaṇā.
uvāsa duḥkhavasatīḥ phalamūlakṛtāśanā..

अन्वय - *anvaya*

भर्तृस्मरणतन्वङ्गी तापसीवेषधारिणी उपवासतपःशीला तत्र सा पृथुलेक्षणा फलमूलकृताशना उवास दुःखवसतीः।

bhartṛsmaraṇatanvaṅgī tāpasīveṣadhāriṇī upavāsatapaḥśīlā tatra sā pṛthulekṣaṇā phalamūlakṛtāśanā uvāsa duḥkhavasatīḥ.

English Translation

There, she, with a delicate body thinking of her husband, acquired the appearance of an ascetic, practising fast and penance, was wide-eyed, ate fruits and roots, and lived while dwelling in pain.

०३ २६४ ०४३

शास्त्र - *śāstra*

दिदेश राक्षसीस्तत्र रक्षणे राक्षसाधिपः।
प्रासासिशूलपरशुमुद्गरालातधारिणीः॥

dideśa rākṣasīstatra rakṣaṇe rākṣasādhipaḥ.
prāsāsiśūlaparaśumudgarālātadhāriṇīḥ..

अन्वय - *anvaya*

राक्षसाधिपः दिदेश रक्षणे राक्षसीः तत्र प्रासासिशूलपरशुमुद्गरालातधारिणीः।

rākṣasādhipaḥ dideśa rakṣaṇe rākṣasīḥ tatra prāsāsiśūlaparaśumudgarālātadhāriṇīḥ.

English Translation

The lord of Rākṣasas left there Rākṣasīs with missiles, swords, spears, axes, hammers, and coals for protection.

०३ २६४ ०४४

शास्त्र - *śāstra*

द्व्यक्षीं त्र्यक्षीं ललाटाक्षीं दीर्घजिह्वामजिह्विकाम्।
त्रिस्तनीमेकपादां च त्रिजटामेकलोचनाम्॥

dvyakṣīṃ tryakṣīṃ lalāṭākṣīṃ dīrghajihvāmajihvikām.
tristanīmekapādāṃ ca trijaṭāmekalocanām..

अन्वय - *anvaya*

द्व्यक्षीम् त्र्यक्षीम् ललाटाक्षीम् दीर्घजिह्वाम् अजिह्विकाम् त्रिस्तनीम् एकपादाम् च त्रिजटाम् एकलोचनाम् आसन्।

dvyakṣīm tryakṣīm lalāṭākṣīm dīrghajihvām ajihvikām tristanīm ekapādām ca trijaṭām ekalocanām āsan.

English Translation

There were named Dvyakṣī, Tryakṣī, Lalāṭākṣī, Dīrghajihvā, Ajihvikā, Tristanī, Ekapādā, Trijaṭā, and Ekalocanā.

०३ २६४ ०४५

शास्त्र - *śāstra*

एताश्चान्याश्च दीप्ताक्ष्यः करभोत्कटमूर्धजाः।
परिवार्यासते सीतां दिवारात्रमतन्द्रिताः॥

etāścānyāśca dīptākṣyaḥ karabhotkaṭamūrdhajāḥ.
parivāryāsate sītāṃ divārātramatandritāḥ..

अन्वय - *anvaya*

एताः च अन्याः च दीप्ताक्ष्यः करभोत्कटमूर्धजाः सीताम् परिवार्य दिवारात्रम् अतन्द्रिताः आसते।

etāḥ ca anyāḥ ca dīptākṣyaḥ karabhotkaṭamūrdhajāḥ sītām parivārya divārātram atandritāḥ āsate.

English Translation

These and other flaming-eyed Rākṣasī with hair as giant as an elephant covered Sītā and sat unexhausted day and night.

०३ २६४ ०४६

शास्त्र - *śāstra*

तास्तु तामायतापाङ्गीं पिशाच्यो दारुणस्वनाः।
तर्जयन्ति सदा रौद्राः परुषव्यञ्जनाक्षराः॥

tāstu tāmāyatāpāṅgīṃ piśācyo dāruṇasvanāḥ.
tarjayanti sadā raudrāḥ paruṣavyañjanākṣarāḥ..

अन्वय - *anvaya*

ताम् आयतापाङ्गीम् तु ताः पिशाच्यः दारुणस्वनाः सदा रौद्राः परुषव्यञ्जनाक्षराः तर्जयन्ति।

tām āyatāpāṅgīm tu tāḥ piśācyaḥ dāruṇasvanāḥ sadā raudrāḥ paruṣavyañjanākṣarāḥ tarjayanti.

English Translation

But those fierce demonesses with hard sounds always threatened the long-eyed Sītā with harsh vowels and consonants.

०३ २६४ ०४७

शास्त्र - *śāstra*

खादाम पाटयामैनां तिलशः प्रविभज्य ताम्।
येयं भर्तारमस्माकमवमन्येह जीवति॥

khādāma pāṭayāmaināṃ tilaśaḥ pravibhajya tām.
yeyaṃ bhartāramasmākamavamanyeha jīvati..

अन्वय - *anvaya*

या इयम् इह जीवति एनाम् तिलशः प्रविभज्य भर्तारम् अस्माकम् अवमन्य ताम् खादाम पाटयाम।

yā iyam iha jīvati enām tilaśaḥ pravibhajya bhartāram asmākam avamanya tām khādāma pāṭayāma.

English Translation

"Let us all eat and split into small pieces after dividing into parts as small as sesame seeds, as she despises our master."

०३ २६४ ०४८

शास्त्र - *śāstra*

इत्येवं परिभर्त्सन्तीस्त्रास्यमाना पुनः पुनः।
भर्तृशोकसमाविष्टा निःश्वस्येदमुवाच ताः॥

ityevaṃ paribhartsantīstrāsyamānā punaḥ punaḥ.
bhartṛśokasamāviṣṭā niḥśvasyedamuvāca tāḥ..

अन्वय - *anvaya*

इति एवम् परिभर्त्सन्तीः त्रास्यमाना पुनः पुनः। निःश्वस्य भर्तृशोकसमाविष्टा इदम् उवाच ताः।

iti evam paribhartsantīḥ trāsyamānā punaḥ punaḥ.
niḥśvasya bhartṛśokasamāviṣṭā idam uvāca tāḥ.

English Translation

Thus, the threatening ones terrified her again and again in this way. Sighing out and filled with grief for her husband, she said this to them.

०३ २६४ ०४९

शास्त्र - *śāstra*

आर्याः खादत मां शीघ्रं न मे लोभोऽस्ति जीविते।
विना तं पुण्डरीकाक्षं नीलकुञ्चितमूर्धजम्॥

āryāḥ khādata māṃ śīghraṃ na me lobho'sti jīvite.
vinā taṃ puṇḍarīkākṣaṃ nīlakuñcitamūrdhajam..

अन्वय - *anvaya*

आर्याः खादत माम् शीघ्रम्। न मे लोभः अस्ति जीविते विना तम् पुण्डरीकाक्षम् नीलकुञ्चितमूर्धजम्।

āryāḥ khādata mām śīghram. na me lobhaḥ asti jīvite
vinā tam puṇḍarīkākṣam nīlakuñcitamūrdhajam.

English Translation

"O noble ladies! Eat me fast. I do not want to live without the lotus-eyed, curly-nīla-haired him."

०३ २६४ ०५०

शास्त्र - *śāstra*

अप्येवाहं निराहारा जीवितप्रियवर्जिता।
शोषयिष्यामि गात्राणि व्याली तालगता यथा॥

apyevāhaṃ nirāhārā jīvitapriyavarjitā.
śoṣayiṣyāmi gātrāṇi vyālī tālagatā yathā..

अन्वय - *anvaya*

अपि एव अहम् निराहारा जीवितप्रियवर्जिता शोषयिष्यामि गात्राणि व्याली तालगता यथा।

api eva aham nirāhārā jīvitapriyavarjitā śoṣayiṣyāmi
gātrāṇi vyālī tālagatā yathā.

English Translation

"Also, I will surely dry up my body like a female snake going to a palm tree, as living without my husband is like living without food."

०३ २६४ ०५१

शास्त्र - *śāstra*

न त्वन्यमभिगच्छेयं पुमांसं राघवादृते।
इति जानीत सत्यं मे क्रियतां यदनन्तरम्॥

na tvanyamabhigaccheyaṃ pumāṃsaṃ rāghavādṛte.
iti jānīta satyaṃ me kriyatāṃ yadanantaram..

अन्वय - *anvaya*

न तु अन्यम् अभिगच्छेयम् पुमांसम् राघवात् ऋते। इति जानीत सत्यम् मे। क्रियताम् यद् अनन्तरम्।

na tu anyam abhigaccheyam pumāṃsam rāghavāt ṛte.
iti jānīta satyam me. kriyatām yad anantaram.

English Translation

"I shall not approach any man except Rāghava. Know this truth of me. Let it be done what happens next."

०३ २६४ ०५२

शास्त्र - *śāstra*

तस्यास्तद्वचनं श्रुत्वा राक्षस्यस्ताः खरस्वनाः।
आख्यातुं राक्षसेन्द्राय जग्मुस्तत्सर्वमादितः॥

tasyāstadvacanaṃ śrutvā rākṣasyastāḥ kharasvanāḥ.
ākhyātuṃ rākṣasendrāya jagmustatsarvamāditaḥ..

अन्वय - *anvaya*

तस्याः तद्वचनम् श्रुत्वा राक्षस्यः ताः खरस्वनाः जग्मुः आख्यातुम् राक्षसेन्द्राय तत्सर्वम् आदितः।

tasyāḥ tadvacanam śrutvā rākṣasyaḥ tāḥ kharasvanāḥ
jagmuḥ ākhyātum rākṣasendrāya tatsarvam āditaḥ.

English Translation

Having heard these words from her, those harsh-sounding Rākṣasīs went to the King of demons to describe everything from the beginning.

०३ २६४ ०५३

शास्त्र - *śāstra*

गतासु तासु सर्वासु त्रिजटा नाम राक्षसी।
सान्त्वयामास वैदेहीं धर्मज्ञा प्रियवादिनी॥

gatāsu tāsu sarvāsu trijaṭā nāma rākṣasī.
sāntvayāmāsa vaidehīṃ dharmajñā priyavādinī..

अन्वय - *anvaya*

गतासु तासु सर्वासु त्रिजटा नाम राक्षसी धर्मज्ञा प्रियवादिनी सान्त्वयामास वैदेहीम्।

gatāsu tāsu sarvāsu trijaṭā nāma rākṣasī dharmajñā priyavādinī sāntvayāmāsa vaidehīm.

English Translation

When all those were gone, the dharma-knowing, kindly-speaking Rākṣasī Trijaṭā consoled Vaidehī.

०३ २६४ ०५४

शास्त्र - *śāstra*

सीते वक्ष्यामि ते किंचिद्विश्वासं कुरु मे सखि।
भयं ते व्येतु वामोरु शृणु चेदं वचो मम॥

sīte vakṣyāmi te kiṃcidviśvāsaṃ kuru me sakhi.
bhayaṃ te vyetu vāmoru śṛṇu cedaṃ vaco mama..

अन्वय - *anvaya*

सीते वक्ष्यामि ते किंचित्। विश्वासम् कुरु मे सखि। भयम् ते व्येतु वामोरु। शृणु च इदम् वचः मम।

sīte vakṣyāmi te kiṃcit. viśvāsam kuru me sakhi. bhayam te vyetu vāmoru. śṛṇu ca idam vacaḥ mama.

English Translation

"O Sītā! I will tell you something. O friend! Trust me. O, one with beautiful thighs! Let your fear go away, and listen to these words of mine."

०३ २६४ ०५५

शास्त्र - *śāstra*

अविन्ध्यो नाम मेधावी वृद्धो राक्षसपुंगवः।
स रामस्य हितान्वेषी त्वदर्थे हि स मावदत्॥

avindhyo nāma medhāvī vṛddho rākṣasapuṃgavaḥ.
sa rāmasya hitānveṣī tvadarthe hi sa māvadat..

अन्वय - *anvaya*

अविन्ध्यः नाम मेधावी वृद्धः राक्षसपुंगवः सः रामस्य हितान्वेषी त्वदर्थे हि सः माम् अवदत्।

avindhyaḥ nāma medhāvī vṛddhaḥ rākṣasapuṃgavaḥ saḥ rāmasya hitānveṣī tvadarthe hi saḥ mām avadat.

English Translation

"There is an old, wise Rākṣasa named Avindhya who desires the welfare of Rāma. He told me for you."

०३ २६४ ०५६

शास्त्र - *śāstra*

सीता मद्वचनाद्वाच्या समाश्वास्य प्रसाद्य च।
भर्ता ते कुशली रामो लक्ष्मणानुगतो बली॥

sītā madvacanādvācyā samāśvāsya prasādya ca.
bhartā te kuśalī rāmo lakṣmaṇānugato balī..

अन्वय - *anvaya*

समाश्वास्य प्रसाद्य च सीता मद्वचनात् वाच्या। भर्ता ते कुशली रामः लक्ष्मणानुगतः बली।

samāśvāsya prasādya ca sītā madvacanāt vācyā.
bhartā te kuśalī rāmaḥ lakṣmaṇānugataḥ balī.

English Translation

"Having pleased and comforted her, follow my advice. Sītā should be told - Rāma, your husband, along with mighty Lakṣmaṇa, are healthy."

०३ २६४ ०५७

शास्त्र - *śāstra*

सख्यं वानरराजेन शक्रप्रतिमतेजसा।
कृतवान्राघवः श्रीमांस्त्वदर्थे च समुद्यतः॥

sakhyaṃ vānararājena śakrapratimatejasā.
kṛtavānrāghavaḥ śrīmāṃstvadarthe ca samudyataḥ..

अन्वय - *anvaya*

सख्यम् वानरराजेन शक्रप्रतिमतेजसा कृतवान् राघवः श्रीमान् त्वदर्थे च समुद्यतः।

sakhyam vānararājena śakrapratimatejasā kṛtavān rāghavaḥ śrīmān tvadarthe ca samudyataḥ.

English Translation

"The opulent Rāghava, making friendship with the King of Vānaras, who has swiftness like Indra, is rising for you."

०३ २६४ ०५८

शास्त्र - *śāstra*

मा च तेऽस्तु भयं भीरु रावणाल्लोकगर्हितात्।
नलकूबरशापेन रक्षिता ह्यस्यनिन्दिते॥

mā ca te'stu bhayaṃ bhīru rāvaṇāllokagarhitāt.
nalakūbaraśāpena rakṣitā hyasyanindite..

अन्वय - *anvaya*

मा च ते अस्तु भयम् भीरु रावणात् लोकगर्हितात्। नलकूबरशापेन रक्षिता हि असि अनिन्दिते।

mā ca te astu bhayam bhīru rāvaṇāt lokagarhitāt.
nalakūbaraśāpena rakṣitā hi asi anindite.

English Translation

"O fearful lady! And do not be afraid of Rāvaṇa, the one the world criticises. You are certainly protected in virtuosity by the curse of Nalakūbara."

०३ २६४ ०५९

शास्त्र - *śāstra*

शप्तो ह्येष पुरा पापो वधूं रम्भां परामृशन्।
न शक्तो विवशां नारीमुपैतुमजितेन्द्रियः॥

śapto hyeṣa purā pāpo vadhūṃ rambhāṃ parāmṛśan.
na śakto vivaśāṃ nārīmupaitumajitendriyaḥ..

अन्वय - *anvaya*

शप्तः हि एषः पुरा पापः परामृशन् वधूम् रम्भाम्। न शक्तः विवशाम् नारीम् उपैतुम् अजितेन्द्रियः।

śaptaḥ hi eṣaḥ purā pāpaḥ parāmṛśan vadhūm rambhām. na śaktaḥ vivaśām nārīm upaitum ajitendriyaḥ.

English Translation

"This evil man was earlier cursed that he, whose passions are unsubdued, would be incapable of touching an unwilling woman for touching wife Rambhā."

०३ २६४ ०६०

शास्त्र - *śāstra*

क्षिप्रमेष्यति ते भर्ता सुग्रीवेणाभिरक्षितः।
सौमित्रिसहितो धीमांस्त्वां चेतो मोक्षयिष्यति॥

kṣiprameṣyati te bhartā sugrīveṇābhirakṣitaḥ.
saumitrisahito dhīmāṃstvāṃ ceto mokṣayiṣyati..

अन्वय - *anvaya*

क्षिप्रम् ते भर्ता सौमित्रिसहितः धीमान् सुग्रीवेण अभिरक्षितः एष्यति त्वाम् च एतः मोक्षयिष्यति।

kṣipram te bhartā saumitrisahitaḥ dhīmān sugrīveṇa abhirakṣitaḥ eṣyati tvām ca etaḥ mokṣayiṣyati.

English Translation

"Your intelligent husband, accompanied by the son of Sumitrā and guarded by Sugrīva, will come quickly and free you from here."

०३ २६४ ०६१

शास्त्र - *śāstra*

स्वप्ना हि सुमहाघोरा दृष्टा मेऽनिष्टदर्शनाः।
विनाशायास्य दुर्बुद्धेः पौलस्त्यकुलघातिनः॥

svapnā hi sumahāghorā dṛṣṭā me'niṣṭadarśanāḥ.
vināśāyāsya durbuddheḥ paulastyakulaghātinaḥ..

अन्वय - *anvaya*

अनिष्टदर्शनाः स्वप्नाः हि सुमहाघोराः दृष्टाः मया विनाशाय अस्य दुर्बुद्धेः पौलस्त्यकुलघातिनः।

aniṣṭadarśanāḥ svapnāḥ hi sumahāghorāḥ dṛṣṭāḥ mayā vināśāya asya durbuddheḥ paulastyakulaghātinaḥ.

English Translation

"I saw undesired horrible dreams for the destruction of this wicked murderer from the family of Pulastya."

०३ २६४ ०६२

शास्त्र - *śāstra*

दारुणो ह्येष दुष्टात्मा क्षुद्रकर्मा निशाचरः।
स्वभावाच्छीलदोषेण सर्वेषां भयवर्धनः॥

dāruṇo hyeṣa duṣṭātmā kṣudrakarmā niśācaraḥ.
svabhāvācchīladoṣeṇa sarveṣāṃ bhayavardhanaḥ..

अन्वय - *anvaya*

दारुणः हि एषः दुष्टात्मा क्षुद्रकर्मा निशाचरः स्वभावात् शीलदोषेण सर्वेषाम् भयवर्धनः।

dāruṇaḥ hi eṣaḥ duṣṭātmā kṣudrakarmā niśācaraḥ svabhāvāt śīladoṣeṇa sarveṣām bhayavardhanaḥ.

English Translation

"This harsh, wicked, vile-acting person fiend is causing increased fear in everyone from his nature with the faults of his character."

०३ २६४ ०६३

शास्त्र - *śāstra*

स्पर्धते सर्वदेवैर्यः कालोपहतचेतनः।
मया विनाशलिङ्गानि स्वप्ने दृष्टानि तस्य वै॥

spardhate sarvadevairyaḥ kālopahatacetanaḥ.
mayā vināśaliṅgāni svapne dṛṣṭāni tasya vai..

अन्वय - *anvaya*

यः कालोपहतचेतनः सर्वदेवैः स्पर्धते तस्य वै मया विनाशलिङ्गानि स्वप्ने दृष्टानि।

yaḥ kālopahatacetanaḥ sarvadevaiḥ spardhate tasya vai mayā vināśaliṅgāni svapne dṛṣṭāni.

English Translation

"He, whose soul has weakened with time and who vies with all gods, definitely has the destruction characteristics seen in my dreams."

०३ २६४ ०६४

शास्त्र - *śāstra*

तैलाभिषिक्तो विकचो मज्जन्पङ्के दशाननः।
असकृत्खरयुक्ते तु रथे नृत्यन्निव स्थितः॥

tailābhiṣikto vikaco majjanpaṅke daśānanaḥ.
asakṛtkharayukte tu rathe nṛtyanniva sthitaḥ..

अन्वय - *anvaya*

तैलाभिषिक्तः विकचः मज्जन् पङ्के दशाननः असकृत्खरयुक्ते तु रथे नृत्यन् इव स्थितः।

tailābhiṣiktaḥ vikacaḥ majjan paṅke daśānanaḥ asakṛtkharayukte tu rathe nṛtyan iva sthitaḥ.

English Translation

"Repeatedly, Rāvaṇa, anointed with oil, bald, and sinking in mud, is standing like dancing on a chariot possessed of donkeys."

०३ २६४ ०६५

शास्त्र - *śāstra*

कुम्भकर्णादयश्चेमे नग्नाः पतितमूर्धजाः।
कृष्यन्ते दक्षिणामाशां रक्तमाल्यानुलेपनाः॥

kumbhakarṇādayaśceme nagnāḥ patitamūrdhajāḥ.
kṛṣyante dakṣiṇāmāśāṃ raktamālyānulepanāḥ..

अन्वय - *anvaya*

कुम्भकर्णादयः च इमे नग्नाः पतितमूर्धजाः रक्तमाल्यानुलेपनाः कृष्यन्ते दक्षिणाम् आशाम्।

kumbhakarṇādayaḥ ca ime nagnāḥ patitamūrdhajāḥ raktamālyānulepanāḥ kṛṣyante dakṣiṇām āśām.

English Translation

"And Kumbhakarṇa and others, bald, naked, and anointed with a garland of blood, are drawn to the southern region."

०३ २६४ ०६६

शास्त्र - *śāstra*

श्वेतातपत्रः सोष्णीषः शुक्लमाल्यविभूषणः।
श्वेतपर्वतमारूढ एक एव विभीषणः॥

śvetātapatraḥ soṣṇīṣaḥ śuklamālyavibhūṣaṇaḥ.
śvetaparvatamārūḍha eka eva vibhīṣaṇaḥ..

अन्वय - *anvaya*

श्वेतातपत्रः सोष्णीषः शुक्लमाल्यविभूषणः श्वेतपर्वतम् आरूढः एकः एव विभीषणः।

śvetātapatraḥ soṣṇīṣaḥ śuklamālyavibhūṣaṇaḥ śvetaparvatam ārūḍhaḥ ekaḥ eva vibhīṣaṇaḥ.

English Translation

“Vibhīṣaṇa alone climbs the white mountain with a white umbrella, turban, garlands, and ornaments.”

०३ २६४ ०६७

शास्त्र - *śāstra*

सचिवाश्चास्य चत्वारः शुक्लमाल्यानुलेपनाः।
श्वेतपर्वतमारूढा मोक्ष्यन्तेऽस्मान्महाभयात्॥

sacivāścāsya catvāraḥ śuklamālyānulepanāḥ.
śvetaparvatamārūḍhā mokṣyante’smānmahābhayāt..

अन्वय - *anvaya*

सचिवाः च अस्य चत्वारः शुक्लमाल्यानुलेपनाः श्वेतपर्वतम् आरूढाः मोक्ष्यन्ते अस्मात् महाभयात्।

sacivāḥ ca asya catvāraḥ śuklamālyānulepanāḥ śvetaparvatam ārūḍhāḥ mokṣyante asmāt mahābhayāt.

English Translation

“And the four ministers of him, anointed with white garland and ornaments, climbing the white mountain, are freed from this great peril.”

०३ २६४ ०६८

शास्त्र - *śāstra*

रामस्यास्त्रेण पृथिवी परिक्षिप्ता ससागरा।
यशसा पृथिवीं कृत्स्नां पूरयिष्यति ते पतिः॥

rāmasyāstreṇa pṛthivī parikṣiptā sasāgarā.
yaśasā pṛthivīṃ kṛtsnāṃ pūrayiṣyati te patiḥ..

अन्वय - *anvaya*

रामस्य अस्त्रेण पृथिवी परिक्षिप्ता ससागरा। यशसा पृथिवीम् कृत्स्नाम् पूरयिष्यति ते पतिः।

rāmasya astreṇa pṛthivī parikṣiptā sasāgarā. yaśasā pṛthivīm kṛtsnām pūrayiṣyati te patiḥ.

English Translation

"The missile of Rāma surrounds the earth together with oceans. Your husband will fill the world with his glory."

०३ २६४ ०६९

शास्त्र - *śāstra*

अस्थिसंचयमारूढो भुञ्जानो मधुपायसम्।
लक्ष्मणश्च मया दृष्टो निरीक्षन्सर्वतोदिशः॥

asthisaṃcayamārūḍho bhuñjāno madhupāyasam.
lakṣmaṇaśca mayā dṛṣṭo nirīkṣansarvatodiśaḥ..

अन्वय - *anvaya*

अस्थिसंचयम् च आरूढः भुञ्जानः मधुपायसम् लक्ष्मणः मया दृष्टः निरीक्षन् सर्वतोदिशः।

asthisaṃcayam ca ārūḍhaḥ bhuñjānaḥ madhupāyasam lakṣmaṇaḥ mayā dṛṣṭaḥ nirīkṣan sarvatodiśaḥ.

English Translation

"Lakṣmaṇa is seen by me guarding in all directions, climbing a mountain of ashes, and enjoying the sweet oblation of milk."

०३ २६४ ०७०

शास्त्र - *śāstra*

रुदती रुधिरार्द्राङ्गी व्याघ्रेण परिरक्षिता।
असकृत्त्वं मया दृष्टा गच्छन्ती दिशमुत्तराम्॥

rudatī rudhirārdrāṅgī vyāghreṇa parirakṣitā.
asakṛttvaṃ mayā dṛṣṭā gacchantī diśamuttarām..

अन्वय - *anvaya*

रुदती रुधिरार्द्राङ्गी व्याघ्रेण परिरक्षिता। असकृत् त्वम् मया दृष्टा गच्छन्ती दिशम् उत्तराम्।

rudatī rudhirārdrāṅgī vyāghreṇa parirakṣitā. asakṛt tvam mayā dṛṣṭā gacchantī diśam uttarām.

English Translation

"The one with a body moist with blood, protected by a tiger, cries. You are repeatedly seen by me going in the northern direction."

०३ २६४ ०७१

शास्त्र - *śāstra*

हर्षमेष्यसि वैदेहि क्षिप्रं भर्तृसमन्विता।
राघवेण सह भ्रात्रा सीते त्वमचिरादिव॥

harṣameṣyasi vaidehi kṣipraṃ bhartṛsamanvitā.
rāghaveṇa saha bhrātrā sīte tvamacirādiva..

अन्वय - *anvaya*

हर्षम् एष्यसि वैदेहि क्षिप्रम्। राघवेण सह भ्रात्रा सीते त्वम् भर्तृसमन्विता अचिरात् इव।

harṣam eṣyasi vaidehi kṣipram. rāghaveṇa saha bhrātrā sīte tvam bhartṛsamanvitā acirāt iva.

English Translation

"O Vaidehī! You will quickly attain happiness as you will soon be united with your husband, Rāghava and his brother."

०३ २६४ ०७२

शास्त्र - *śāstra*

इति सा मृगशावाक्षी तच्छ्रुत्वा त्रिजटावचः।
बभूवाशावती बाला पुनर्भर्तृसमागमे॥

iti sā mṛgaśāvākṣī tacchrutvā trijaṭāvacaḥ.
babhūvāśāvatī bālā punarbhartṛsamāgame..

अन्वय - *anvaya*

इति तद् श्रुत्वा त्रिजटावचः सा मृगशावाक्षी आशावती बभूव बाला पुनर्भर्तृसमागमे।

iti tad śrutvā trijaṭāvacaḥ sā mṛgaśāvākṣī āśāvatī babhūva bālā punarbhartṛsamāgame.

English Translation

Having heard these words by Trijaṭā, that girl, who had eyes like a young deer, became hopeful of reuniting with her husband.

०३ २६४ ०७३

शास्त्र - *śāstra*

यावदभ्यागता रौद्राः पिशाच्यस्ताः सुदारुणाः।
ददृशुस्तां त्रिजटया सहासीनां यथा पुरा॥

yāvadabhyāgatā raudrāḥ piśācyastāḥ sudāruṇāḥ.
dadṛśustāṃ trijaṭayā sahāsīnāṃ yathā purā..

अन्वय - *anvaya*

यावत् अभ्यागता रौद्राः पिशाच्यः ताः सुदारुणाः ददृशुः ताम् त्रिजटया सह आसीनाम् यथा पुरा।

yāvat abhyāgatā raudrāḥ piśācyaḥ tāḥ sudāruṇāḥ dadṛśuḥ tām trijaṭayā saha āsīnām yathā purā.

English Translation

As soon as those fierce and harsh demonesses arrived, they saw her sitting with Trijaṭā as earlier.

— ०९ —

०३ २६५

असतो मा सद्गमय।
तमसो मा ज्योतिर्गमय।
मृत्योर्मामृतं गमय॥
ॐ शान्तिः शान्तिः शान्तिः॥

०३ २६५ ००१

शास्त्र - *śāstra*

मार्कण्डेय उवाच।
ततस्तां भर्तृशोकार्तां दीनां मलिनवाससम्।
मणिशेषाभ्यलंकारां रुदतीं च पतिव्रताम्॥

mārkaṇḍeya uvāca.
tatastāṃ bhartṛśokārtāṃ dīnāṃ malinavāsasam.
maṇiśeṣābhyalaṃkārāṃ rudatīṃ ca pativratām..

अन्वय - *anvaya*

ततः ताम् भर्तृशोकार्ताम् दीनाम् मलिनवाससम् मणिशेषाभ्यलंकाराम् रुदतीम् च पतिव्रताम्।

tataḥ tām bhartṛśokārtām dīnām malinavāsasam maṇiśeṣābhyalaṃkārām rudatīm ca pativratām.

English Translation

Mārkaṇḍeya said: Then, she, who was crying, wearing dirty clothes, whose ornament was just a left out jewel, faithful to her husband, was miserable.

०३ २६५ ००२

शास्त्र - *śāstra*

राक्षसीभिरुपास्यन्तीं समासीनां शिलातले।
रावणः कामबाणार्तो ददर्शोपससर्प च॥

rākṣasībhirupāsyantīṃ samāsīnāṃ śilātale.
rāvaṇaḥ kāmabāṇārto dadarśopasasarpa ca..

अन्वय - *anvaya*

राक्षसीभिः उपास्यन्तीम् समासीनाम् शिलातले रावणः कामबाणार्तः ददर्श उपससर्प च।

rākṣasībhiḥ upāsyantīm samāsīnām śilātale rāvaṇaḥ kāmabāṇārtaḥ dadarśa upasasarpa ca.

English Translation

Rāvaṇa, afflicted by the arrow of desire, saw and approached her, who was sitting on a stone-slab near the Rākṣasīs.

०३ २६५ ००३

शास्त्र - *śāstra*

देवदानवगन्धर्वयक्षकिंपुरुषैर्युधि।
अजितोऽशोकवनिकां ययौ कन्दर्पमोहितः॥

devadānavagandharvayakṣakiṃpuruṣairyudhi.
ajito'śokavanikāṃ yayau kandarpamohitaḥ..

अन्वय - *anvaya*

देवदानवगन्धर्वयक्षकिम्पुरुषैः युधि अजितः अशोकवनिकाम् ययौ कन्दर्पमोहितः रावणः।

devadānavagandharvayakṣakimpuruṣaiḥ yudhi ajitaḥ aśokavanikām yayau kandarpamohitaḥ rāvaṇaḥ.

English Translation

He who was deluded by lust and undefeated in war with Devas, Dānavas, Gandharvas, Yakṣas, and Kimpuruṣas went to Aśoka grove.

०३ २६५ ००४

शास्त्र - *śāstra*

दिव्याम्बरधरः श्रीमान्सुमृष्टमणिकुण्डलः।
विचित्रमाल्यमुकुटो वसन्त इव मूर्तिमान्॥

divyāmbaradharaḥ śrīmānsumṛṣṭamaṇikuṇḍalaḥ.
vicitramālyamukuṭo vasanta iva mūrtimān..

अन्वय - *anvaya*

दिव्याम्बरधरः श्रीमान् सुमृष्टमणिकुण्डलः विचित्रमाल्यमुकुटः वसन्तः इव मूर्तिमान्।

divyāmbaradharaḥ śrīmān sumṛṣṭamaṇikuṇḍalaḥ vicitramālyamukuṭaḥ vasantaḥ iva mūrtimān.

English Translation

He was bearing divine clothes, looked opulent, with earrings studded with bright jewels, and was wearing a crown variously garlanded as if Spring personified.

०३ २६५ ००५

शास्त्र - *śāstra*

स कल्पवृक्षसदृशो यत्नादपि विभूषितः।
श्मशानचैत्यद्रुमवद्भूषितोऽपि भयंकरः॥

sa kalpavṛkṣasadṛśo yatnādapi vibhūṣitaḥ.
śmaśānacaityadrumavadbhūṣito'pi bhayaṃkaraḥ..

अन्वय - *anvaya*

यद्यपि सः कल्पवृक्षसदृशः यत्नात् अपि विभूषितः तथापि श्मशानचैत्यद्रुमवद्भूषितः अपि भयंकरः।

yadyapi saḥ kalpavṛkṣasadṛśaḥ yatnāt api vibhūṣitaḥ tathāpi śmaśānacaityadrumavadbhūṣitaḥ api bhayaṃkaraḥ.

English Translation

Even if he was decorated with efforts like a Kalpa tree, he looked even more dangerous than a Caitya tree in a cemetery.

०३ २६५ ००६

शास्त्र - *śāstra*

स तस्यास्तनुमध्यायाः समीपे रजनीचरः।
ददृशे रोहिणीमेत्य शनैश्चर इव ग्रहः॥

sa tasyāstanumadhyāyāḥ samīpe rajanīcaraḥ.
dadṛśe rohiṇīmetya śanaiścara iva grahaḥ..

अन्वय - *anvaya*

सः तस्याः तनुमध्यायाः समीपे रजनीचरः ददृशे रोहिणीम् एत्य शनैः चरः इव ग्रहः॥

saḥ tasyāḥ tanumadhyāyāḥ samīpe rajanīcaraḥ dadṛśe rohiṇīm etya śanaiḥ caraḥ iva grahaḥ..

English Translation

That nightwalker near her with a thin waist was seen as a slow-moving planet going near Rohiṇī.

०३ २६५ ००७

शास्त्र - *śāstra*

स तामामन्त्र्य सुश्रोणीं पुष्पकेतुशराहतः।
इदमित्यब्रवीद्बालां त्रस्तां रौहीमिवाबलाम्॥

sa tāmāmantrya suśroṇīṃ puṣpaketuśarāhataḥ.
idamityabravīdbālāṃ trastāṃ rauhīmivābalām..

अन्वय - *anvaya*

ताम् सुश्रोणीम् आमन्त्र्य सः पुष्पकेतुशराहतः इदम् इति अब्रवीत् बालाम् त्रस्ताम् रौहीम् इव अबलाम्।

tām suśroṇīm āmantrya saḥ puṣpaketuśarāhataḥ idam iti abravīt bālām trastām rauhīm iva abalām.

English Translation

He addressed the one with beautiful hips, wounded by the arrow of the God of love and said this to the girl, frightened like a powerless female deer.

०३ २६५ ००८

शास्त्र - *śāstra*

सीते पर्याप्तमेतावत्कृतो भर्तुरनुग्रहः।
प्रसादं कुरु तन्वङ्गि क्रियतां परिकर्म ते॥

sīte paryāptametāvatkṛto bharturanugrahaḥ.
prasādaṃ kuru tanvaṅgi kriyatāṃ parikarma te..

अन्वय - *anvaya*

सीते पर्याप्तम् एतावत् कृतः भर्तुः अनुग्रहः। प्रसादम् कुरु तन्वङ्गि। क्रियताम् परिकर्म ते।

sīte paryāptam etāvat kṛtaḥ bhartuḥ anugrahaḥ.
prasādam kuru tanvaṅgi. kriyatām parikarma te.

English Translation

"O Sītā! Too much favour has been done sufficient for your husband. O one with thin limbs! Be gracious. Let your dressing be done."

०३ २६५ ००९

शास्त्र - *śāstra*

भजस्व मां वरारोहे महार्हाभरणाम्बरा।
भव मे सर्वनारीणामुत्तमा वरवर्णिनि॥

bhajasva māṃ varārohe mahārhābharaṇāmbarā.
bhava me sarvanārīṇāmuttamā varavarṇini..

अन्वय - *anvaya*

भजस्व माम् वरारोहे। वरवर्णिनि महार्हाभरणाम्बरा भव मे सर्वनारीणाम् उत्तमा।

bhajasva mām varārohe. varavarṇini mahārhābharaṇāmbarā bhava me sarvanārīṇām uttamā.

English Translation

"O beautiful woman! Serve me. O woman with a beautiful complexion! Be the best amongst all my women with deserving ornaments and clothes."

०३ २६५ ०१०

शास्त्र - *śāstra*

सन्ति मे देवकन्याश्च राजर्षीणां तथाङ्गनाः।
सन्ति दानवकन्याश्च दैत्यानां चापि योषितः॥

santi me devakanyāśca rājarṣīṇāṃ tathāṅganāḥ.
santi dānavakanyāśca daityānāṃ cāpi yoṣitaḥ..

अन्वय - *anvaya*

सन्ति मे देवकन्याः च राजर्षीणाम् तथा अङ्गनाः। सन्ति दानवकन्याः च दैत्यानाम् च अपि योषितः।

santi me devakanyāḥ ca rājarṣīṇām tathā aṅganāḥ.
santi dānavakanyāḥ ca daityānām ca api yoṣitaḥ.

English Translation

There are daughters of Gods and women of the royal sages of me. There are daughters of Dānavas and girls of Daityas of me.

०३ २६५ ०११

शास्त्र - *śāstra*

चतुर्दश पिशाचानां कोट्यो मे वचने स्थिताः।
द्विस्तावत्पुरुषादानां रक्षसां भीमकर्मणाम्॥

caturdaśa piśācānāṃ koṭyo me vacane sthitāḥ.
dvistāvatpuruṣādānāṃ rakṣasāṃ bhīmakarmaṇām..

अन्वय - *anvaya*

चतुर्दश कोट्यः पिशाचानाम् मे वचने स्थिताः द्विः तावत् पुरुषादानाम् रक्षसाम् भीमकर्मणाम्।

caturdaśa koṭyaḥ piśācānām me vacane sthitāḥ dviḥ tāvat puruṣādānām rakṣasām bhīmakarmaṇām.

English Translation

"One hundred and forty million demons are in my command, twice as much as dreadful man-eater Rākṣasas."

०३ २६५ ०१२

शास्त्र - *śāstra*

ततो मे त्रिगुणा यक्षा ये मद्वचनकारिणः।
केचिदेव धनाध्यक्षं भ्रातरं मे समाश्रिताः॥

tato me triguṇā yakṣā ye madvacanakāriṇaḥ.
kecideva dhanādhyakṣaṃ bhrātaraṃ me samāśritāḥ..

अन्वय - *anvaya*

ततः मे त्रिगुणाः यक्षाः ये मद्वचनकारिणः। केचित् एव धनाध्यक्षम् भ्रातरम् मे समाश्रिताः।

tataḥ me triguṇāḥ yakṣāḥ ye madvacanakāriṇaḥ. kecit eva dhanādhyakṣam bhrātaram me samāśritāḥ.

English Translation

"Then there are thrice the Yakṣas which obey my command. Only some of them are dwelling with my treasurer brother."

०३ २६५ ०१३

शास्त्र - *śāstra*

गन्धर्वाप्सरसो भद्रे मामापानगतं सदा।
उपतिष्ठन्ति वामोरु यथैव भ्रातरं मम॥

gandharvāpsaraso bhadre māmāpānagataṃ sadā.
upatiṣṭhanti vāmoru yathaiva bhrātaraṃ mama..

अन्वय - *anvaya*

गन्धर्वाप्सरसः भद्रे माम् आपानगतम् सदा उपतिष्ठन्ति वामोरु यथैव भ्रातरम् मम।

gandharvāpsarasaḥ bhadre mām āpānagatam sadā
upatiṣṭhanti vāmoru yathaiva bhrātaram mama.

English Translation

"O good lady! O, one with good thighs! Gandharvas and Apsarases are always present, contained in drinking, just as for my brother."

०३ २६५ ०१४

शास्त्र - *śāstra*

पुत्रोऽहमपि विप्रर्षेः साक्षाद्विश्रवसो मुनेः।
पञ्चमो लोकपालानामिति मे प्रथितं यशः॥

putro'hamapi viprarṣeḥ sākṣādviśravaso muneḥ.
pañcamo lokapālānāmiti me prathitaṃ yaśaḥ..

अन्वय - *anvaya*

पुत्रः अहम् अपि विप्रर्षेः साक्षात् विश्रवसः मुनेः। पञ्चमः लोकपालानाम् इति मे प्रथितम् यशः।

putraḥ aham api viprarṣeḥ sākṣāt viśravasaḥ muneḥ.
pañcamaḥ lokapālānām iti me prathitam yaśaḥ.

English Translation

"Also, I am the son of the Brāhman Ṛṣi Viśravas directly. I am the fifth amongst the guardians of the world. This is my celebrated glory."

०३ २६५ ०१५

शास्त्र - *śāstra*

दिव्यानि भक्ष्यभोज्यानि पानानि विविधानि च।
यथैव त्रिदशेशस्य तथैव मम भामिनि॥

divyāni bhakṣyabhojyāni pānāni vividhāni ca.
yathaiva tridaśeśasya tathaiva mama bhāmini..

अन्वय - *anvaya*

दिव्यानि भक्ष्यभोज्यानि पानानि विविधानि च यथैव त्रिदशेशस्य इन्द्रस्य तथैव मम भामिनि।

divyāni bhakṣyabhojyāni pānāni vividhāni ca yathaiva tridaśeśasya indrasya tathaiva mama bhāmini.

English Translation

"O angry woman! I have various divine, enjoyable foods and drinks just like Indra."

०३ २६५ ०१६

शास्त्र - *śāstra*

क्षीयतां दुष्कृतं कर्म वनवासकृतं तव।
भार्या मे भव सुश्रोणि यथा मन्दोदरी तथा॥

kṣīyatāṃ duṣkṛtaṃ karma vanavāsakṛtaṃ tava.
bhāryā me bhava suśroṇi yathā mandodarī tathā..

अन्वय - *anvaya*

क्षीयताम् दुष्कृतम् कर्म वनवासकृतम् तव। भार्या मे भव सुश्रोणि यथा मन्दोदरी तथा।

kṣīyatām duṣkṛtam karma vanavāsakṛtam tava. bhāryā me bhava suśroṇi yathā mandodarī tathā.

English Translation

"Let your evil actions while you dwell in the forest be destroyed. O, one with beautiful hips! Be my wife just like Mandodarī."

०३ २६५ ०१७

शास्त्र - *śāstra*

इत्युक्ता तेन वैदेही परिवृत्य शुभानना।
तृणमन्तरतः कृत्वा तमुवाच निशाचरम्॥

ityuktā tena vaidehī parivṛtya śubhānanā.
tṛṇamantarataḥ kṛtvā tamuvāca niśācaram..

अन्वय - *anvaya*

इति तेन उक्ता परिवृत्य तृणम् अन्तरतः कृत्वा तम् उवाच निशाचरम् वैदेही शुभानना।

iti tena uktā parivṛtya tṛṇam antarataḥ kṛtvā tam uvāca niśācaram vaidehī śubhānanā.

English Translation

Thus, having been spoken by him, turning around and putting a blade of grass between them, Vaidehī, one with a beautiful face, said this to the Niśācara.

०३ २६५ ०१८

शास्त्र - *śāstra*

अशिवेनातिवामोरूरजस्रं नेत्रवारिणा।
स्तनावपतितौ बाला सहितावभिवर्षती।
उवाच वाक्यं तं क्षुद्रं वैदेही पतिदेवता॥

aśivenātivāmorūrajasraṃ netravāriṇā.
stanāvapatitau bālā sahitāvabhivarṣatī.
uvāca vākyaṃ taṃ kṣudraṃ vaidehī patidevatā..

अन्वय - *anvaya*

अतिवामोरूः अजस्रम् अशिवेन नेत्रवारिणा स्तनौ अपतितौ सहितौ अभिवर्षती बाला वैदेही पतिदेवता उवाच वाक्यम् तम् क्षुद्रम्।

ativāmorūḥ ajasram aśivena netravāriṇā stanau apatitau sahitau abhivarṣatī bālā vaidehī patidevatā uvāca vākyam tam kṣudram.

English Translation

The girl with wonderful thighs, who considered her husband as divinity, with unfallen breasts covered with inauspicious tears in her eyes, said these words to the vile person.

०३ २६५ ०१९

शास्त्र - *śāstra*

असकृद्वदतो वाक्यमीदृशं राक्षसेश्वर।
विषादयुक्तमेतत्ते मया श्रुतमभाग्यया॥

asakṛdvadato vākyamīdṛśaṃ rākṣaseśvara.
viṣādayuktametatte mayā śrutamabhāgyayā..

अन्वय - *anvaya*

राक्षसेश्वर असकृत् वदतः वाक्यम् ईदृशम् विषादयुक्तम् एतद् ते मया अभाग्यया श्रुतम्।

rākṣaseśvara asakṛt vadataḥ vākyam īdṛśam viṣādayuktam etad te mayā abhāgyayā śrutam.

English Translation

“O lord of the demons! The unfortunate me repeatedly heard such words from you, the speaking one.”

०३ २६५ ०२०

शास्त्र - *śāstra*

तद्भद्रसुख भद्रं ते मानसं विनिवर्त्यताम्।
परदारास्म्यलभ्या च सततं च पतिव्रता॥

tadbhadrasukha bhadraṃ te mānasaṃ vinivartyatām.
paradārāsmyalabhyā ca satataṃ ca pativratā..

अन्वय - *anvaya*

भद्रसुख भद्रम् ते तद् मानसम् विनिवर्त्यताम्। परदारा अस्मि अलभ्या च सततम् च पतिव्रता।

bhadrasukha bhadram te tad mānasam vinivartyatām.
paradārā asmi alabhyā ca satatam ca pativratā.

English Translation

“O one with auspicious happiness! Blessing to you. Let your mind be desisted. I am unattainable, a wife of another man, and continuously devoted to my husband.”

०३ २६५ ०२१

शास्त्र - *śāstra*

न चैवोपयिकी भार्या मानुषी कृपणा तव।
विवशां धर्षयित्वा च कां त्वं प्रीतिमवाप्स्यसि॥

na caivopayikī bhāryā mānuṣī kṛpaṇā tava.
vivaśāṃ dharṣayitvā ca kāṃ tvaṃ prītimavāpsyasi..

अन्वय - *anvaya*

न च एव भार्या मानुषी कृपणा औपयिकी तव। विवशाम् धर्षयित्वा च काम् त्वम् प्रीतिम् अवाप्स्यसि।

na ca eva bhāryā mānuṣī kṛpaṇā aupayikī tava. vivaśām dharṣayitvā ca kām tvam prītim avāpsyasi.

English Translation

"And certainly, a miserable human wife is not suitable for you. And what pleasure will you obtain from mistreating an unwilling wife?"

०३ २६५ ०२२

शास्त्र - *śāstra*

प्रजापतिसमो विप्रो ब्रह्मयोनिः पिता तव।
न च पालयसे धर्मं लोकपालसमः कथम्॥

prajāpatisamo vipro brahmayoniḥ pitā tava.
na ca pālayase dharmaṃ lokapālasamaḥ katham..

अन्वय - *anvaya*

प्रजापतिसमः विप्रः ब्रह्मयोनिः पिता तव। न च पालयसे धर्मम् लोकपालसमः कथम्।

prajāpatisamaḥ vipraḥ brahmayoniḥ pitā tava. na ca pālayase dharmam lokapālasamaḥ katham.

English Translation

"Your father is a learned son of Lord Brahmā, equal to a Prajāpati. How are you equal to a guardian of the world when you do not follow righteousness?"

०३ २६५ ०२३

शास्त्र - *śāstra*

भ्रातरं राजराजानं महेश्वरसखं प्रभुम्।
धनेश्वरं व्यपदिशन्कथं त्विह न लज्जसे॥

bhrātaraṃ rājarājānaṃ maheśvarasakhaṃ prabhum.
dhaneśvaraṃ vyapadiśankathaṃ tviha na lajjase..

अन्वय - *anvaya*

भ्रातरम् राजराजानम् महेश्वरसखम् प्रभुम् धनेश्वरम् व्यपदिशन् कथम् तु इह न लज्जसे।

bhrātaram rājarājānam maheśvarasakham prabhum
dhaneśvaram vyapadiśan katham tu iha na lajjase.

English Translation

“But now here, are you not ashamed standing in place of your brother, the lord of wealth, the King of Kings, a mighty friend of Maheśvara?”

०३ २६५ ०२४

शास्त्र - *śāstra*

इत्युक्त्वा प्रारुदत्सीता कम्पयन्ती पयोधरौ।
शिरोधरां च तन्वङ्गी मुखं प्रच्छाद्य वाससा॥

ityuktvā prārudatsītā kampayantī payodharau.
śirodharāṃ ca tanvaṅgī mukhaṃ pracchādya vāsasā..

अन्वय - *anvaya*

इति उक्त्वा पयोधरौ शिरोधराम् मुखम् च वाससा प्रच्छाद्य तन्वङ्गी कम्पयन्ती सीता प्रारुदत्।

iti uktvā payodharau śirodharām mukham ca vāsasā
pracchādya tanvaṅgī kampayantī sītā prārudat.

English Translation

Having said this, thin-limbed shaking Sītā began to cry, having hidden her face, breasts, and neck.

०३ २६५ ०२५

शास्त्र - *śāstra*

तस्या रुदत्या भामिन्या दीर्घा वेणी सुसंयता।
ददृशे स्वसिता स्निग्धा काली व्यालीव मूर्धनि॥

tasyā rudatyā bhāminyā dīrghā veṇī susaṃyatā.
dadṛśe svasitā snigdhā kālī vyālīva mūrdhani..

अन्वय - *anvaya*

तस्याः रुदत्याः भामिन्याः दीर्घा वेणी सुसंयता ददृशे स्वसिता स्निग्धा काली व्याली इव मूर्धनि।

tasyāḥ rudatyāḥ bhāminyāḥ dīrghā veṇī susaṃyatā
dadṛśe svasitā snigdhā kālī vyālī iva mūrdhani.

English Translation

A dark, well-composed hair braid on the head of the crying, angry Sītā was seen like a dark black snake.

०३ २६५ ०२६

शास्त्र - *śāstra*

तच्छ्रुत्वा रावणो वाक्यं सीतयोक्तं सुनिष्ठुरम्।
प्रत्याख्यातोऽपि दुर्मेधाः पुनरेवाब्रवीद्वचः॥

tacchrutvā rāvaṇo vākyaṃ sītayoktaṃ suniṣṭhuram.
pratyākhyāto'pi durmedhāḥ punarevābravīdvacaḥ..

अन्वय - *anvaya*

तद् वाक्यम् सीतया श्रुत्वा रावणः प्रत्याख्यातः अपि दुर्मेधाः पुनरेव अब्रवीत् वचः उक्तम् सुनिष्ठुरम्।

tad vākyam sītayā śrutvā rāvaṇaḥ pratyākhyātaḥ api durmedhāḥ punareva abravīt vacaḥ uktam suniṣṭhuram.

English Translation

Having heard those words by Sītā, even though she refused, stupid Rāvaṇa again spoke these harsh words.

०३ २६५ ०२७

शास्त्र - *śāstra*

काममङ्गानि मे सीते दुनोतु मकरध्वजः।
न त्वामकामां सुश्रोणीं समेष्ये चारुहासिनीम्॥

kāmamaṅgāni me sīte dunotu makaradhvajaḥ.
na tvāmakāmāṃ suśroṇīṃ sameṣye cāruhāsinīm..

अन्वय - *anvaya*

कामम् अङ्गानि मे सीते दुनोतु मकरध्वजः कामदेवः। न त्वाम् अकामाम् सुश्रोणीम् समेष्ये चारुहासिनीम्।

kāmam aṅgāni me sīte dunotu makaradhvajaḥ kāmadevaḥ. na tvām akāmām suśroṇīm sameṣye cāruhāsinīm.

English Translation

“O Sītā! The God of love may burn my limbs as desired. O, one with beautiful hips! Without your wish, I will not approach you, who is smiling sweetly.”

०३ २६५ ०२८

शास्त्र - *śāstra*

किं नु शक्यं मया कर्तुं यत्त्वमद्यापि मानुषम्।
आहारभूतमस्माकं राममेवानुरुध्यसे॥

kiṃ nu śakyaṃ mayā kartuṃ yattvamadyāpi mānuṣam.
āhārabhūtamasmākaṃ rāmamevānurudhyase..

अन्वय - *anvaya*

किम् नु शक्यम् मया कर्तुम् यद् त्वम् अद्य अपि मानुषम् आहारभूतम् अस्माकम् रामम् एव अनुरुध्यसे।

kim nu śakyam mayā kartum yad tvam adya api mānuṣam āhārabhūtam asmākam rāmam eva anurudhyase.

English Translation

"What indeed can be done by me that today also you are fond of human Rāma, our food."

०३ २६५ ०२९

शास्त्र - *śāstra*

इत्युक्त्वा तामनिन्द्याङ्गीं स राक्षसगणेश्वरः।
तत्रैवान्तर्हितो भूत्वा जगामाभिमतां दिशम्॥

ityuktvā tāmanindyāṅgīṃ sa rākṣasagaṇeśvaraḥ.
tatraivāntarhito bhūtvā jagāmābhimatāṃ diśam..

अन्वय - *anvaya*

इति उक्त्वा ताम् अनिन्द्याङ्गीम् सः राक्षसगणेश्वरः तत्र एव अन्तर्हितः भूत्वा जगाम अभिमताम् दिशम्।

iti uktvā tām anindyāṅgīm saḥ rākṣasagaṇeśvaraḥ tatra eva antarhitaḥ bhūtvā jagāma abhimatām diśam.

English Translation

Thus, having said this to the one with the virtuous body, the lord of the Rākṣasa clan, having concealed himself, went in the desired direction.

०३ २६५ ०३०

शास्त्र - *śāstra*

राक्षसीभिः परिवृता वैदेही शोककर्शिता।
सेव्यमाना त्रिजटया तत्रैव न्यवसत्तदा॥

rākṣasībhiḥ parivṛtā vaidehī śokakarśitā.
sevyamānā trijaṭayā tatraiva nyavasattadā..

अन्वय - *anvaya*

राक्षसीभिः परिवृता शोककर्शिता सेव्यमाना त्रिजटया वैदेही तत्र एव न्यवसत् तदा।

rākṣasībhiḥ parivṛtā śokakarśitā sevyamānā trijaṭayā vaidehī tatra eva nyavasat tadā.

English Translation

Being surrounded by Rākṣasīs, emanciated with grief, and being served by Trijaṭā, Vaidehī lived there only.

— १० —

०३ २६६

असतो मा सद्गमय।
तमसो मा ज्योतिर्गमय।
मृत्योर्मामृतं गमय॥
ॐ शान्तिः शान्तिः शान्तिः॥

०३ २६६ ००१

शास्त्र - *śāstra*

मार्कण्डेय उवाच।
राघवस्तु ससौमित्रिः सुग्रीवेणाभिपालितः।
वसन्माल्यवतः पृष्ठे ददर्श विमलं नभः॥

mārkaṇḍeya uvāca.
rāghavastu sasaumitriḥ sugrīveṇābhipālitaḥ.
vasanmālyavataḥ pṛṣṭhe dadarśa vimalaṃ nabhaḥ..

अन्वय - *anvaya*

राघवः तु ससौमित्रिः सुग्रीवेण अभिपालितः वसन् माल्यवतः पृष्ठे ददर्श विमलम् नभः।

rāghavaḥ tu sasaumitriḥ sugrīveṇa abhipālitaḥ vasan mālyavataḥ pṛṣṭhe dadarśa vimalam nabhaḥ.

English Translation

Mārkaṇḍeya said: Rāghava, with the son of Sumitrā, and guarded by Sugrīva living on the top of Mālyavat, saw a clear sky.

०३ २६६ ००२

शास्त्र - *śāstra*

स दृष्ट्वा विमले व्योम्नि निर्मलं शशलक्षणम्।
ग्रहनक्षत्रताराभिरनुयातममित्रहा॥

sa dṛṣṭvā vimale vyomni nirmalaṃ śaśalakṣaṇam.
grahanakṣatratārābhiranuyātamamitrahā..

अन्वय - *anvaya*

सः अमित्रहा निर्मलम् शशलक्षणम् विमले व्योम्नि दृष्ट्वा ग्रहनक्षत्रताराभिः अनुयातः।

saḥ amitrahā nirmalam śaśalakṣaṇam vimale vyomni dṛṣṭvā grahanakṣatratārābhiḥ anuyātaḥ.

English Translation

Seeing the bright moon in the clear sky, planets, constellations, and stars followed the slayer of enemies.

०३ २६६ ००३

शास्त्र - *śāstra*

कुमुदोत्पलपद्मानां गन्धमादाय वायुना।
महीधरस्थः शीतेन सहसा प्रतिबोधितः॥

kumudotpalapadmānāṃ gandhamādāya vāyunā.
mahīdharasthaḥ śītena sahasā pratibodhitaḥ..

अन्वय - *anvaya*

कुमुदोत्पलपद्मानाम् गन्धम् आदाय वायुना शीतेन सहसा महीधरस्थः प्रतिबोधितः।

kumudotpalapadmānām gandham ādāya vāyunā śītena sahasā mahīdharasthaḥ pratibodhitaḥ.

English Translation

Having taken the scent of water lilies, nīla lotuses, and red lotuses, he, who dwelled on the mountain, was awakened suddenly by the cold wind.

०३ २६६ ००४

शास्त्र - *śāstra*

प्रभाते लक्ष्मणं वीरमभ्यभाषत दुर्मनाः।
सीतां संस्मृत्य धर्मात्मा रुद्धां राक्षसवेश्मनि॥

prabhāte lakṣmaṇaṃ vīramabhyabhāṣata durmanāḥ.
sītāṃ saṃsmṛtya dharmātmā ruddhāṃ rākṣasaveśmani..

अन्वय - *anvaya*

दुर्मनाः धर्मात्मा प्रभाते लक्ष्मणम् वीरम् अभ्यभाषत सीताम् रुद्धाम् राक्षसवेश्मनि संस्मृत्य।

durmanāḥ dharmātmā prabhāte lakṣmaṇam vīram abhyabhāṣata sītām ruddhām rākṣasaveśmani saṃsmṛtya.

English Translation

The sad and virtuous conversed with the warrior Lakṣmaṇa in the morning, having remembered the captured Sītā in the house of a Rākṣasa.

०३ २६६ ००५

शास्त्र - *śāstra*

गच्छ लक्ष्मण जानीहि किष्किन्धायां कपीश्वरम्।
प्रमत्तं ग्राम्यधर्मेषु कृतघ्नं स्वार्थपण्डितम्॥

gaccha lakṣmaṇa jānīhi kiṣkindhāyāṃ kapīśvaram.
pramattaṃ grāmyadharmeṣu kṛtaghnaṃ svārthapaṇḍitam..

अन्वय - *anvaya*

गच्छ लक्ष्मण जानीहि किष्किन्धायाम् कपीश्वरम् प्रमत्तम् ग्राम्यधर्मेषु कृतघ्नम् स्वार्थपण्डितम्।

gaccha lakṣmaṇa jānīhi kiṣkindhāyām kapīśvaram pramattam grāmyadharmeṣu kṛtaghnam svārthapaṇḍitam.

English Translation

“O Lakṣmaṇa! Go. Know that the chief of the monkeys in Kiṣkindhā is ungrateful, distracted in local affairs, and clever in his affairs.”

०३ २६६ ००६

शास्त्र - *śāstra*

योऽसौ कुलाधमो मूढो मया राज्येऽभिषेचितः।
सर्ववानरगोपुच्छा यमृक्षाश्च भजन्ति वै॥

yo'sau kulādhamo mūḍho mayā rājye'bhiṣecitaḥ.
sarvavānaragopucchā yamṛkṣāśca bhajanti vai..

अन्वय - *anvaya*

यः असौ कुलाधमः मूढः मया राज्ये अभिषेचितः यम् सर्ववानरगोपुच्छाः ऋक्षाः च भजन्ति वै।

yaḥ asau kulādhamaḥ mūḍhaḥ mayā rājye abhiṣecitaḥ
yam sarvavānaragopucchāḥ ṛkṣāḥ ca bhajanti vai.

English Translation

"That worst of his family and a fool, who all cow-tailed monkeys and bears indeed pray, was consecrated by me in his Kingdom."

०३ २६६ ००७

शास्त्र - *śāstra*

यदर्थं निहतो वाली मया रघुकुलोद्वह।
त्वया सह महाबाहो किष्किन्धोपवने तदा॥

yadarthaṃ nihato vālī mayā raghukulodvaha.
tvayā saha mahābāho kiṣkindhopavane tadā..

अन्वय - *anvaya*

रघुकुलोद्वह महाबाहो यदर्थम् निहतः वाली मया त्वया सह किष्किन्धोपवने तदा।

raghukulodvaha mahābāho yadartham nihataḥ vālī
mayā tvayā saha kiṣkindhopavane tadā.

English Translation

"O long-armed propagator of the Raghu! Why was Vālin slay by me with you then in the grove in Kiṣkindhā?"

०३ २६६ ००८

शास्त्र - *śāstra*

कृतघ्नं तमहं मन्ये वानरापसदं भुवि।
यो मामेवंगतो मूढो न जानीतेऽद्य लक्ष्मण॥

kṛtaghnaṃ tamahaṃ manye vānarāpasadaṃ bhuvi.
yo māmevaṃgato mūḍho na jānīte'dya lakṣmaṇa..

अन्वय - *anvaya*

कृतघ्नम् तम् वानरापसदम् अहम् मन्ये भुवि यः एवंगतः मूढः माम् न जानीते अद्य लक्ष्मण।

kṛtaghnam tam vānarāpasadam aham manye bhuvi yaḥ evaṃgataḥ mūḍhaḥ mām na jānīte adya lakṣmaṇa.

English Translation

"O Lakṣmaṇa! Such a fool who does not know me today, I believe that ungrateful one to be an outcast amongst monkeys on earth."

०३ २६६ ००९

शास्त्र - *śāstra*

असौ मन्ये न जानीते समयप्रतिपादनम्।
कृतोपकारं मां नूनमवमन्याल्पया धिया॥

asau manye na jānīte samayapratipādanam.
kṛtopakāraṃ māṃ nūnamavamanyālpayā dhiyā..

अन्वय - *anvaya*

असौ मन्ये न जानीते समयप्रतिपादनम् कृतोपकारम् माम् नूनम् अवमन्य अल्पया धिया।

asau manye na jānīte samayapratipādanam kṛtopakāram mām nūnam avamanya alpayā dhiyā.

English Translation

"I believe he does not understand the agreement and the assistance, now despising me with his small brain."

०३ २६६ ०१०

शास्त्र - *śāstra*

यदि तावदनुद्युक्तः शेते कामसुखात्मकः।
नेतव्यो वालिमार्गेण सर्वभूतगतिं त्वया॥

yadi tāvadanudyuktaḥ śete kāmasukhātmakaḥ.
netavyo vālimārgeṇa sarvabhūtagatiṃ tvayā..

अन्वय - *anvaya*

यदि तावत् अनुद्युक्तः शेते कामसुखात्मकः नेतव्यः वालिमार्गेण सर्वभूतगतिम् त्वया।

yadi tāvat anudyuktaḥ śete kāmasukhātmakaḥ netavyaḥ vālimārgeṇa sarvabhūtagatim tvayā.

English Translation

"Meanwhile, if he sleeps inactively, the one who lives with the pleasure of desire should be led by you to the destination of all the world, the path of Vālin."

०३ २६६ ०११

शास्त्र - *śāstra*

अथापि घटतेऽस्माकमर्थे वानरपुंगवः।
तमादायैहि काकुत्स्थ त्वरावान्भव मा चिरम्॥

athāpi ghaṭate'smākamarthe vānarapuṃgavaḥ.
tamādāyaihi kākutstha tvarāvānbhava mā ciram..

अन्वय - *anvaya*

अथापि यदि घटते अस्माकम् अर्थे वानरपुंगवः तर्हि तम् आदाय एहि काकुत्स्थ। त्वरावान् भव। मा चिरम्।

athāpi yadi ghaṭate asmākam arthe vānarapuṃgavaḥ tarhi tam ādāya ehi kākutstha. tvarāvān bhava. mā ciram.

English Translation

"O descendant of Kakustha! Moreover, if the lord of the monkeys strives for our purpose, then take him and come fast. Be speedy. Do not be late."

०३ २६६ ०१२

शास्त्र - *śāstra*

इत्युक्तो लक्ष्मणो भ्रात्रा गुरुवाक्यहिते रतः।
प्रतस्थे रुचिरं गृह्य समार्गणगुणं धनुः।
किष्किन्धाद्वारमासाद्य प्रविवेशानिवारितः॥

ityukto lakṣmaṇo bhrātrā guruvākyahite rataḥ.
pratasthe ruciraṃ gṛhya samārgaṇaguṇaṃ dhanuḥ.
kiṣkindhādvāramāsādya praviveśānivāritaḥ..

अन्वय - *anvaya*

इति उक्तः लक्ष्मणः भ्रात्रा गुरुवाक्ये हिते रतः प्रतस्थे रुचिरम् गृह्य समार्गणगुणम् धनुः। किष्किन्धाद्वारम् आसाद्य प्रविवेश अनिवारितः।

iti uktaḥ lakṣmaṇaḥ bhrātrā guruvākye hite rataḥ pratasthe ruciram gṛhya samārgaṇaguṇam dhanuḥ. kiṣkindhādvāram āsādya praviveśa anivāritaḥ.

English Translation

Lakṣmaṇa, who was thus spoken and who was devoted to setting in motion the words by the elder brother, went having grabbed a brilliant bow furnished with bowstring and arrows. He unobstructedly entered, having reached the gate of Kiṣkindhā.

०३ २६६ ०१३

शास्त्र - *śāstra*

सक्रोध इति तं मत्वा राजा प्रत्युद्ययौ हरिः।
तं सदारो विनीतात्मा सुग्रीवः प्लवगाधिपः।
पूजया प्रतिजग्राह प्रीयमाणस्तदर्हया॥

sakrodha iti taṃ matvā rājā pratyudyayau hariḥ.
taṃ sadāro vinītātmā sugrīvaḥ plavagādhipaḥ.
pūjayā pratijagrāha prīyamāṇastadarhayā..

अन्वय - *anvaya*

सक्रोधः इति तम् मत्वा राजा हरिः विनीतात्मा सुग्रीवः प्लवगाधिपः सदारः तम् प्रत्युद्ययौ। पूजया तदर्हया प्रतिजग्राह प्रीयमाणः।

sakrodhaḥ iti tam matvā rājā hariḥ vinītātmā sugrīvaḥ plavagādhipaḥ sadāraḥ tam pratyudyayau.
pūjayā tadarhayā pratijagrāha prīyamāṇaḥ.

English Translation

Having thought of him being angry, the modest King of the Monkeys, Sugrīva, approached him with his wife. He, who was pleased, received him with merit and respect.

०३ २६६ ०१४

शास्त्र - *śāstra*

तमब्रवीद्रामवचः सौमित्रिरकुतोभयः।
स तत्सर्वमशेषेण श्रुत्वा प्रह्वः कृताञ्जलिः॥

tamabravīdrāmavacaḥ saumitrirakutobhayaḥ.
sa tatsarvamaśeṣeṇa śrutvā prahvaḥ kṛtāñjaliḥ..

अन्वय - *anvaya*

तम् अब्रवीत् रामवचः सौमित्रिः अकुतोभयः। तत्सर्वम् अशेषेण श्रुत्वा सः प्रह्वः कृताञ्जलिः।

tam abravīt rāmavacaḥ saumitriḥ akutobhayaḥ.
tatsarvam aśeṣeṇa śrutvā saḥ prahvaḥ kṛtāñjaliḥ.

English Translation

The fearless son of Sumitrā told him the words of Rāma. Having heard everything entirely, he bent down with his hands joined in token of respect.

०३ २६६ ०१५

शास्त्र - *śāstra*

सभृत्यदारो राजेन्द्र सुग्रीवो वानराधिपः।
इदमाह वचः प्रीतो लक्ष्मणं नरकुञ्जरम्॥

sabhṛtyadāro rājendra sugrīvo vānarādhipaḥ.
idamāha vacaḥ prīto lakṣmaṇaṃ narakuñjaram..

अन्वय - *anvaya*

राजेन्द्र युधिष्ठिर सभृत्यदारः सुग्रीवः वानराधिपः प्रीतः इदम् आह वचः लक्ष्मणम् नरकुञ्जरम्।

rājendra yudhiṣṭhira sabhṛtyadāraḥ sugrīvaḥ vānarādhipaḥ prītaḥ idam āha vacaḥ lakṣmaṇam narakuñjaram.

English Translation

O King of the Kings! The commander of Monkeys, Sugrīva, accompanied by his wife

and servants, pleasingly said these words to the eminent man Lakṣmaṇa.

०३ २६६ ०१६

शास्त्र - *śāstra*

नास्मि लक्ष्मण दुर्मेधा न कृतघ्नो न निर्घृणः।
श्रूयतां यः प्रयत्नो मे सीतापर्येषणे कृतः॥

nāsmi lakṣmaṇa durmedhā na kṛtaghno na nirghṛṇaḥ.
śrūyatāṃ yaḥ prayatno me sītāparyeṣaṇe kṛtaḥ..

अन्वय - *anvaya*

न अस्मि लक्ष्मण दुर्मेधाः न कृतघ्नः न निर्घृणः। श्रूयताम् यः प्रयत्नः मे सीतापर्येषणे कृतः।

na asmi lakṣmaṇa durmedhāḥ na kṛtaghnaḥ na nirghṛṇaḥ. śrūyatām yaḥ prayatnaḥ me sītāparyeṣaṇe kṛtaḥ.

English Translation

“O Lakṣmaṇa! I am not stupid, ungrateful, or immodest. Whatever efforts I have made for searching Sītā, may that be heard.”

०३ २६६ ०१७

शास्त्र - *śāstra*

दिशः प्रस्थापिताः सर्वे विनीता हरयो मया।
सर्वेषां च कृतः कालो मासेनागमनं पुनः॥

diśaḥ prasthāpitāḥ sarve vinītā harayo mayā.
sarveṣāṃ ca kṛtaḥ kālo māsenāgamanaṃ punaḥ..

अन्वय - *anvaya*

सर्वे दिशः प्रस्थापिताः विनीताः हरयः मया। कालः च सर्वेषाम् पुनरागमनाम् एकम् मासम्।

sarve diśaḥ prasthāpitāḥ vinītāḥ harayaḥ mayā. kālaḥ ca sarveṣām punarāgamanām ekam māsam.

English Translation

"In all the directions, I have dispatched trained monkeys. The time for the return of their action is one month."

०३ २६६ ०१८

शास्त्र - *śāstra*

यैरियं सवना साद्रिः सपुरा सागराम्बरा।
विचेतव्या मही वीर सग्रामनगराकरा॥

yairiyaṃ savanā sādriḥ sapurā sāgarāmbarā.
vicetavyā mahī vīra sagrāmanagarākarā..

अन्वय - *anvaya*

यैः इयम् सवना साद्रिः सपुरा सागराम्बरा मही सग्रामनगराकरा विचेतव्या वीर।

yaiḥ iyam savanā sādriḥ sapurā sāgarāmbarā mahī sagrāmanagarākarā vicetavyā vīra.

English Translation

"By all of whom, this earth with forests, mountains, oceans, cities, villages, and mines should be searched."

०३ २६६ ०१९

शास्त्र - *śāstra*

स मासः पञ्चरात्रेण पूर्णो भवितुमर्हति।
ततः श्रोष्यसि रामेण सहितः सुमहत्प्रियम्॥

sa māsaḥ pañcarātreṇa pūrṇo bhavitumarhati.
tataḥ śroṣyasi rāmeṇa sahitaḥ sumahatpriyam..

अन्वय - *anvaya*

सः मासः पञ्चरात्रेण पूर्णः भवितुम् अर्हति। ततः श्रोष्यसि रामेण सहितः सुमहत्प्रियम्॥

saḥ māsaḥ pañcarātreṇa pūrṇaḥ bhavitum arhati.
tataḥ śroṣyasi rāmeṇa sahitaḥ sumahatpriyam..

English Translation

"This month is supposed to be completed by five nights. Then, you will hear along with Rāma about the extremely beloved."

०३ २६६ ०२०

शास्त्र - *śāstra*

इत्युक्तो लक्ष्मणस्तेन वानरेन्द्रेण धीमता।
त्यक्त्वा रोषमदीनात्मा सुग्रीवं प्रत्यपूजयत्॥

ityukto lakṣmaṇastena vānarendreṇa dhīmatā.
tyaktvā roṣamadīnātmā sugrīvaṃ pratyapūjayat..

अन्वय - *anvaya*

इति उक्तः लक्ष्मणः तेन वानरेन्द्रेण धीमता। रोषम् त्यक्त्वा अदीनात्मा सुग्रीवम् प्रत्यपूजयत्।

iti uktaḥ lakṣmaṇaḥ tena vānarendreṇa dhīmatā.
roṣam tyaktvā adīnātmā sugrīvam pratyapūjayat.

English Translation

The intelligent lord thus spoke Lakṣmaṇa of the monkeys. Having abandoned his anger, the high-spirited one honoured Surgrīva.

०३ २६६ ०२१

शास्त्र - *śāstra*

स रामं सहसुग्रीवो माल्यवत्पृष्ठमास्थितम्।
अभिगम्योदयं तस्य कार्यस्य प्रत्यवेदयत्॥

sa rāmaṃ sahasugrīvo mālyavatpṛṣṭhamāsthitam.
abhigamyodayaṃ tasya kāryasya pratyavedayat..

अन्वय - *anvaya*

सः सहसुग्रीवः रामम् माल्यवत् पृष्ठम् आस्थितम् उदयम् अभिगम्य तस्य कार्यस्य प्रत्यवेदयत्।

saḥ sahasugrīvaḥ rāmam mālyavat pṛṣṭham āsthitam udayam abhigamya tasya kāryasya pratyavedayat.

English Translation

He, accompanied by Surgīva, went to the Rāma, who was rising and staying on the top of the Mālyavat, and reported to him tasks that were supposed to be done by Sugrīva.

०३ २६६ ०२२

शास्त्र - *śāstra*

इत्येवं वानरेन्द्रास्ते समाजग्मुः सहस्रशः।
दिशस्तिस्रो विचित्याथ न तु ये दक्षिणां गताः॥

ityevaṃ vānarendrāste samājagmuḥ sahasraśaḥ.
diśastisro vicityātha na tu ye dakṣiṇāṃ gatāḥ..

अन्वय - *anvaya*

इति एवम् अथ दिशः तिस्रः विचित्य वानरेन्द्राः ते समाजग्मुः सहस्रशः न तु ये दक्षिणाम् गताः।

iti evam atha diśaḥ tisraḥ vicitya vānarendrāḥ te samājagmuḥ sahasraśaḥ na tu ye dakṣiṇām gatāḥ.

English Translation

Thus, in this way, having sifted in three directions, those lords of the monkeys in

thousands came together, but none of which had gone in the southern direction.

०३ २६६ ०२३

शास्त्र - *śāstra*

आचख्युस्ते तु रामाय महीं सागरमेखलाम्।
विचितां न तु वैदेह्या दर्शनं रावणस्य वा॥

ācakhyuste tu rāmāya mahīṃ sāgaramekhalām.
vicitāṃ na tu vaidehyā darśanaṃ rāvaṇasya vā..

अन्वय - *anvaya*

आचख्युः ते तु रामाय महीम् सागरमेखलाम् विचिताम्। न तु वैदेह्याः दर्शनम् रावणस्य वा।

ācakhyuḥ te tu rāmāya mahīm sāgaramekhalām
vicitām. na tu vaidehyāḥ darśanam rāvaṇasya vā.

English Translation

They communicated how the earth was searched to Rāma. But there was no sign of Vaidehī or Rāvaṇa.

०३ २६६ ०२४

शास्त्र - *śāstra*

गतास्तु दक्षिणामाशां ये वै वानरपुंगवाः।
आशावांस्तेषु काकुत्स्थः प्राणानार्तोऽप्यधारयत्॥

gatāstu dakṣiṇāmāśāṃ ye vai vānarapuṃgavāḥ.
āśāvāṃsteṣu kākutsthaḥ prāṇānārto'pyadhārayat..

अन्वय - *anvaya*

ये वै वानरपुंगवाः गताः तु दक्षिणाम् दिशम् तेषु आशावान् आर्तः अपि काकुत्स्थः प्राणान् अधारयत्।

ye vai vānarapuṃgavāḥ gatāḥ tu dakṣiṇām diśam teṣu āśāvān ārtaḥ api kākutsthaḥ prāṇān adhārayat.

English Translation

The descendant of Kakustha, even though pained, survived life hopeful at those monkeys that had indeed gone to the southern direction.

०३ २६६ ०२५

शास्त्र - *śāstra*

द्विमासोपरमे काले व्यतीते प्लवगास्ततः।
सुग्रीवमभिगम्येदं त्वरिता वाक्यमब्रुवन्॥

dvimāsoparame kāle vyatīte plavagāstataḥ.
sugrīvamabhigamyedaṃ tvaritā vākyamabruvan..

अन्वय - *anvaya*

द्विमासोपरमे काले व्यतीते ततः सुग्रीवम् अभिगम्य प्लवगाः इदम् त्वरिताः वाक्यम् अब्रुवन्।

dvimāsoparame kāle vyatīte tataḥ sugrīvam abhigamya plavagāḥ idam tvaritāḥ vākyam abruvan.

English Translation

At the passing of two months, the monkeys then came swiftly and said this, having approached Sugrīva.

०३ २६६ ०२६

शास्त्र - *śāstra*

रक्षितं वालिना यत्तत्स्फीतं मधुवनं महत्।
त्वया च प्लवगश्रेष्ठ तद्भुङ्क्ते पवनात्मजः॥

rakṣitaṃ vālinā yattatsphītaṃ madhuvanaṃ mahat.
tvayā ca plavagaśreṣṭha tadbhuṅkte pavanātmajaḥ..

अन्वय - *anvaya*

यद् रक्षितम् वालिना त्वया च स्फीतम् महत् मधुवनम् तद् प्लवगश्रेष्ठ भुङ्क्ते पवनात्मजः हनूमान्।

yad rakṣitam vālinā tvayā ca sphītam mahat madhuvanam tad plavagaśreṣṭha bhuṅkte pavanātmajaḥ hanūmān.

English Translation

"O, the best of monkeys! That great large forest Madhuvana, which you and Vālin protected, is being eaten by Hanumat."

०३ २६६ ०२७

शास्त्र - *śāstra*

वालिपुत्रोऽङ्गदश्चैव ये चान्ये प्लवगर्षभाः।
विचेतुं दक्षिणामाशां राजन्प्रस्थापितास्त्वया॥

vāliputro'ṅgadaścaiva ye cānye plavagarṣabhāḥ.
vicetuṃ dakṣiṇāmāśāṃ rājanprasthāpitāstvayā..

अन्वय - *anvaya*

वालिपुत्रः अङ्गदः च एव ये च अन्ये प्लवगर्षभाः विचेतुम् दक्षिणाम् आशाम् राजन् प्रस्थापिताः त्वया।

vāliputraḥ aṅgadaḥ ca eva ye ca anye plavagarṣabhāḥ vicetum dakṣiṇām āśām rājan prasthāpitāḥ tvayā.

English Translation

"O King! And certainly by Aṅgada, the son of Vālin, and other eminent monkeys sent away to the southern direction by you to search."

०३ २६६ ०२८

शास्त्र - *śāstra*

तेषां तं प्रणयं श्रुत्वा मेने स कृतकृत्यताम्।
कृतार्थानां हि भृत्यानामेतद्भवति चेष्टितम्॥

teṣāṃ taṃ praṇayaṃ śrutvā mene sa kṛtakṛtyatām.
kṛtārthānāṃ hi bhṛtyānāmetadbhavati ceṣṭitam..

अन्वय - *anvaya*

तेषाम् तम् प्रणयम् श्रुत्वा मेने सः कृतकृत्यताम्। कृतार्थानाम् हि भृत्यानाम् एतद् भवति चेष्टितम्।

teṣām tam praṇayam śrutvā mene saḥ kṛtakṛtyatām.
kṛtārthānām hi bhṛtyānām etad bhavati ceṣṭitam.

English Translation

Having heard their conduct, he thought he was successful as only successful servants had this conduct.

०३ २६६ ०२९

शास्त्र - *śāstra*

स तद्रामाय मेधावी शशंस प्लवगर्षभः।
रामश्चाप्यनुमानेन मेने दृष्टां तु मैथिलीम्॥

sa tadrāmāya medhāvī śaśaṃsa plavagarṣabhaḥ.
rāmaścāpyanumānena mene dṛṣṭāṃ tu maithilīm..

अन्वय - *anvaya*

सः मेधावी प्लवगर्षभः तद् रामाय शशंस। रामः च अपि अनुमानेन मेने दृष्टाम् तु मैथिलीम्।

saḥ medhāvī plavagarṣabhaḥ tad rāmāya śaśaṃsa.
rāmaḥ ca api anumānena mene dṛṣṭām tu maithilīm.

English Translation

The intelligent, eminent monkey recited this to Rāma, and he also inferred that Maithilī was seen.

०३ २६६ ०३०

शास्त्र - *śāstra*

हनूमत्प्रमुखाश्चापि विश्रान्तास्ते प्लवंगमाः।
अभिजग्मुर्हरीन्द्रं तं रामलक्ष्मणसंनिधौ॥

hanūmatpramukhāścāpi viśrāntāste plavaṃgamāḥ.
abhijagmurharīndraṃ taṃ
rāmalakṣmaṇasaṃnidhau..

अन्वय - *anvaya*

हनूमत्प्रमुखाः च अपि विश्रान्ताः ते प्लवंगमाः अभिजग्मुः हरीन्द्रम् तम् रामलक्ष्मणसंनिधौ।

hanūmatpramukhāḥ ca api viśrāntāḥ te plavaṃgamāḥ abhijagmuḥ harīndram tam rāmalakṣmaṇasaṃnidhau.

English Translation

The rested monkeys, headed by Hanūmat, approached the lord of the monkeys, Sugrīva, present near Rāma and Lakṣmaṇa.

०३ २६६ ०३१

शास्त्र - *śāstra*

गतिं च मुखवर्णं च दृष्ट्वा रामो हनूमतः।
अगमत्प्रत्ययं भूयो दृष्टा सीतेति भारत॥

gatiṃ ca mukhavarṇaṃ ca dṛṣṭvā rāmo hanūmataḥ.
agamatpratyayaṃ bhūyo dṛṣṭā sīteti bhārata..

अन्वय - *anvaya*

गतिम् च मुखवर्णम् च दृष्ट्वा रामः हनूमतः अगमत् प्रत्ययम् भूयः दृष्टा सीता इति भारत युधिष्ठिर।

gatim ca mukhavarṇam ca dṛṣṭvā rāmaḥ hanūmataḥ agamat pratyayam bhūyaḥ dṛṣṭā sītā iti bhārata yudhiṣṭhira.

English Translation

O descendant of Bharata! Watching the movement and colour of Hanūmat's face, Rāma exceedingly became confident that Sītā was seen.

०३ २६६ ०३२

शास्त्र - *śāstra*

हनूमत्प्रमुखास्ते तु वानराः पूर्णमानसाः।
प्रणेमुर्विधिवद्रामं सुग्रीवं लक्ष्मणं तथा॥

hanūmatpramukhāste tu vānarāḥ pūrṇamānasāḥ.
praṇemurvidhivadrāmaṃ sugrīvaṃ lakṣmaṇaṃ tathā..

अन्वय - *anvaya*

हनूमत्प्रमुखाः ते तु वानराः पूर्णमानसाः प्रणेमुः विधिवत् रामम् सुग्रीवम् लक्ष्मणम् तथा।

hanūmatpramukhāḥ te tu vānarāḥ pūrṇamānasāḥ praṇemuḥ vidhivat rāmam sugrīvam lakṣmaṇam tathā.

English Translation

The contented monkeys, led by Hanūmat duly bowed down to Rāma, Lakṣmaṇa, and then Sugrīva.

०३ २६६ ०३३

शास्त्र - *śāstra*

तानुवाचागतान्रामः प्रगृह्य सशरं धनुः।
अपि मां जीवयिष्यध्वमपि वः कृतकृत्यता॥

tānuvācāgatānrāmaḥ pragṛhya saśaraṃ dhanuḥ.
api māṃ jīvayiṣyadhvamapi vaḥ kṛtakṛtyatā..

अन्वय - *anvaya*

तान् आगतान् उवाच रामः प्रगृह्य सशरम् धनुः। अपि माम् जीवयिष्यध्वम् अपि वः कृतकृत्यता।

tān āgatān uvāca rāmaḥ pragṛhya saśaram dhanuḥ.
api mām jīvayiṣyadhvam api vaḥ kṛtakṛtyatā.

English Translation

Having taken his bow and arrow, Rāma told the returned monkeys - "Will you all cause me to live? Have you been successful?"

०३ २६६ ०३४

शास्त्र - *śāstra*

अपि राज्यमयोध्यायां कारयिष्याम्यहं पुनः।
निहत्य समरे शत्रूनाहृत्य जनकात्मजाम्॥

api rājyamayodhyāyāṃ kārayiṣyāmyahaṃ punaḥ.
nihatya samare śatrūnāhṛtya janakātmajām..

अन्वय - *anvaya*

अपि राज्यम् अयोध्यायाम् कारयिष्यामि अहम् पुनः निहत्य समरे शत्रून् आहृत्य जनकात्मजाम्।

api rājyam ayodhyāyām kārayiṣyāmi aham punaḥ nihatya samare śatrūn āhṛtya janakātmajām.

English Translation

"Having killed all enemies in war and obtaining the daughter of Janaka, will I be caused to run the Kingdom in Ayodhyā again?"

०३ २६६ ०३५

शास्त्र - *śāstra*

अमोक्षयित्वा वैदेहीमहत्वा च रिपून्रणे।
हृतदारोऽवधूतश्च नाहं जीवितुमुत्सहे॥

amokṣayitvā vaidehīmahatvā ca ripūnraṇe.
hṛtadāro'vadhūtaśca nāhaṃ jīvitumutsahe..

अन्वय - *anvaya*

अमोक्षयित्वा वैदेहीम् अहत्वा च रिपून् रणे हृतदारः अवधूतः च न अहम् जीवितुम् उत्सहे।

amokṣayitvā vaidehīm ahatvā ca ripūn raṇe hṛtadāraḥ avadhūtaḥ ca na aham jīvitum utsahe.

English Translation

"Without having freed Vaidehī and without killing enemies in the battle, I, whose wife was abducted and excluded, do not have the power to live."

०३ २६६ ०३६

शास्त्र - *śāstra*

इत्युक्तवचनं रामं प्रत्युवाचानिलात्मजः।
प्रियमाख्यामि ते राम दृष्टा सा जानकी मया॥

ityuktavacanaṃ rāmaṃ pratyuvācānilātmajaḥ.
priyamākhyāmi te rāma dṛṣṭā sā jānakī mayā..

अन्वय - *anvaya*

इति उक्तवचनम् रामम् प्रत्युवाच अनिलात्मजः। प्रियम् आख्यामि ते राम दृष्टा सा जानकी मया।

iti uktavacanam rāmam pratyuvāca anilātmajaḥ. priyam ākhyāmi te rāma dṛṣṭā sā jānakī mayā.

English Translation

The son of God of wind, Hanūmat, said this to Rāma, having heard his spoken words - "O Rāma! I have to tell you about your beloved. I saw Jānakī."

०३ २६६ ०३७

शास्त्र - *śāstra*

विचित्य दक्षिणामाशां सपर्वतवनाकराम्।
श्रान्ताः काले व्यतीते स्म दृष्टवन्तो महागुहाम्॥

vicitya dakṣiṇāmāśāṃ saparvatavanākarām.
śrāntāḥ kāle vyatīte sma dṛṣṭavanto mahāguhām..

अन्वय - *anvaya*

दक्षिणाम् आशाम् सपर्वतवनाकराम् विचित्य काले व्यतीते स्म दृष्टवन्तः श्रान्ताः महागुहाम्।

dakṣiṇām āśām saparvatavanākarām vicitya kāle vyatīte sma dṛṣṭavantaḥ śrāntāḥ mahāguhām.

English Translation

"Having searched all the mountains, forests, and mines in the southern direction, the exhausted ones saw a large cave around the end of time."

०३ २६६ ०३८

शास्त्र - *śāstra*

प्रविशामो वयं तां तु बहुयोजनमायताम्।
अन्धकारां सुविपिनां गहनां कीटसेविताम्॥

praviśāmo vayaṃ tāṃ tu bahuyojanamāyatām.
andhakārāṃ suvipināṃ gahanāṃ kīṭasevitām..

अन्वय - *anvaya*

प्रविशामः वयम् ताम् तु बहुयोजनम् आयताम् अन्धकाराम् सुविपिनाम् गहनाम् कीटसेविताम्।

praviśāmaḥ vayam tām tu bahuyojanam āyatām
andhakārām suvipināṃ gahanām kīṭasevitām.

English Translation

"But we all entered that very distant, dark, woody, deep, and insect-dwelling cave."

०३ २६६ ०३९

शास्त्र - *śāstra*

गत्वा सुमहदध्वानमादित्यस्य प्रभां ततः।
दृष्टवन्तः स्म तत्रैव भवनं दिव्यमन्तरा॥

gatvā sumahadadhvānamādityasya prabhāṃ tataḥ.
dṛṣṭavantaḥ sma tatraiva bhavanaṃ divyamantarā..

अन्वय - *anvaya*

सुमहदध्वानम् आदित्यस्य प्रभाम् गत्वा ततः दृष्टवन्तः स्म तत्र एव भवनम् दिव्यम् अन्तरा।

sumahadadhvānam ādityasya prabhām gatvā tataḥ
dṛṣṭavantaḥ sma tatra eva bhavanam divyam antarā.

English Translation

"Having gone a long way towards the light of the Sun, we certainly saw a large mansion in the middle."

०३ २६६ ०४०

शास्त्र - *śāstra*

मयस्य किल दैत्यस्य तदासीद्वेश्म राघव।
तत्र प्रभावती नाम तपोऽतप्यत तापसी॥

mayasya kila daityasya tadāsīdveśma rāghava.
tatra prabhāvatī nāma tapo'tapyata tāpasī..

अन्वय - *anvaya*

मयस्य किल दैत्यस्य तदा आसीत् वेश्म राघव। तत्र प्रभावती नाम तपः अतप्यत तापसी।

mayasya kila daityasya tadā āsīt veśma rāghava. tatra prabhāvatī nāma tapaḥ atapyata tāpasī.

English Translation

"O Rāghava! Then there was indeed a house of the architect of Daityas, Maya. There, a female ascetic named Prabhāvatī. was practising austerities."

०३ २६६ ०४१

शास्त्र - *śāstra*

तया दत्तानि भोज्यानि पानानि विविधानि च।
भुक्त्वा लब्धबलाः सन्तस्तयोक्तेन पथा ततः॥

tayā dattāni bhojyāni pānāni vividhāni ca.
bhuktvā labdhabalāḥ santastayoktena pathā tataḥ..

अन्वय - *anvaya*

तया दत्तानि भोज्यानि पानानि विविधानि च भुक्त्वा लब्धबलाः सन्तः तया उक्तेन पथा ततः।

tayā dattāni bhojyāni pānāni vividhāni ca bhuktvā labdhabalāḥ santaḥ tayā uktena pathā tataḥ.

English Translation

“Having consumed various foods and drinks offered by her, we obtained strength from them. Then, there was a path she showed.”

०३ २६६ ०४२

शास्त्र - *śāstra*

निर्याय तस्मादुद्देशात्पश्यामो लवणाम्भसः।
समीपे सह्यमलयौ दर्दुरं च महागिरिम्॥

niryāya tasmāduddeśātpaśyāmo lavaṇāmbhasaḥ.
samīpe sahyamalayau darduraṃ ca mahāgirim..

अन्वय - *anvaya*

निर्याय तस्मात् उद्देशात् पश्यामः लवणाम्भसः समीपे सह्यमलयौ दर्दुरम् च महागिरिम्।

niryāya tasmāt uddeśāt paśyāmaḥ lavaṇāmbhasaḥ samīpe sahyamalayau darduram ca mahāgirim.

English Translation

“Therefore, having set out from that direction, we saw the Sahya and Malaya mountains and the Dardura mountain near the salty water.”

०३ २६६ ०४३

शास्त्र - *śāstra*

ततो मलयमारुह्य पश्यन्तो वरुणालयम्।
विषण्णा व्यथिताः खिन्ना निराशा जीविते भृशम्॥

tato malayamāruhya paśyanto varuṇālayam.
viṣaṇṇā vyathitāḥ khinnā nirāśā jīvite bhṛśam..

अन्वय - *anvaya*

ततः मलयम् आरुह्य पश्यन्तः वरुणालयम् विषण्णाः व्यथिताः खिन्नाः निराशाः जीविते भृशम्।

tataḥ malayam āruhya paśyantaḥ varuṇālayam viṣaṇṇāḥ vyathitāḥ khinnāḥ nirāśāḥ jīvite bhṛśam.

English Translation

"Then, having climbed Malaya, the great ocean was seen while we were severely dejected, troubled, depressed, and sad in life."

०३ २६६ ०४४

शास्त्र - *śāstra*

अनेकशतविस्तीर्णं योजनानां महोदधिम्।
तिमिनक्रझषावासं चिन्तयन्तः सुदुःखिताः॥

anekaśatavistīrṇaṃ yojanānāṃ mahodadhim.
timinakrajhaṣāvāsaṃ cintayantaḥ suduḥkhitāḥ..

अन्वय - *anvaya*

अनेकशतविस्तीर्णम् योजनानाम् महोदधिम् तिमिनक्रझषावासम् चिन्तयन्तः सुदुःखिताः।

anekaśatavistīrṇam yojanānām mahodadhim timinakrajhaṣāvāsam cintayantaḥ suduḥkhitāḥ.

English Translation

"The great ocean was spread across hundreds of yojanas, where alligators, whales, and fishes lived, and was thought of with grief."

०३ २६६ ०४५

शास्त्र - *śāstra*

तत्रानशनसंकल्पं कृत्वासीना वयं तदा।
ततः कथान्ते गृध्रस्य जटायोरभवत्कथा॥

tatrānaśanasaṃkalpaṃ kṛtvāsīnā vayaṃ tadā.
tataḥ kathānte gṛdhrasya jaṭāyorabhavatkathā..

अन्वय - *anvaya*

तत्र अनशनसंकल्पम् कृत्वा आसीनाः वयम् तदा। ततः कथान्ते गृध्रस्य जटायोः अभवत् कथा।

tatra anaśanasaṃkalpam kṛtvā āsīnāḥ vayam tadā.
tataḥ kathānte gṛdhrasya jaṭāyoḥ abhavat kathā.

English Translation

"There, having resolved fasting, we all sat in this way. Then, at the end of the story, there was a story of the vulture Jaṭāyu."

०३ २६६ ०४६

शास्त्र - *śāstra*

ततः पर्वतशृङ्गाभं घोररूपं भयावहम्।
पक्षिणं दृष्टवन्तः स्म वैनतेयमिवापरम्॥

tataḥ parvataśṛṅgābhaṃ ghorarūpaṃ bhayāvaham.
pakṣiṇaṃ dṛṣṭavantaḥ sma vainateyamivāparam..

अन्वय - *anvaya*

ततः पर्वतशृङ्गाभम् घोररूपम् भयावहम् पक्षिणम् दृष्टवन्तः स्म वैनतेयम् इव अपरम्।

tataḥ parvataśṛṅgābham ghorarūpam bhayāvaham pakṣiṇam dṛṣṭavantaḥ sma vainateyam iva aparam.

English Translation

"Then, we saw a frightening, formidable bird looking like the top of a mountain as if he was another son of Garuḍa."

०३ २६६ ०४७

शास्त्र - *śāstra*

सोऽस्मानतर्कयद्भोक्तुमथाभ्येत्य वचोऽब्रवीत्।
भोः क एष मम भ्रातुर्जटायोः कुरुते कथाम्॥

so'smānatarkayadbhoktumathābhyetya vaco'bravīt.
bhoḥ ka eṣa mama bhrāturjaṭāyoḥ kurute kathām..

अन्वय - *anvaya*

सः अस्मान् अतर्कयत् भोक्तुम् अथ अभ्येत्य वचः अब्रवीत्। भोः कः एषः मम भ्रातुः जटायोः कुरुते कथाम्।

saḥ asmān atarkayat bhoktum atha abhyetya vacaḥ abravīt. bhoḥ kaḥ eṣaḥ mama bhrātuḥ jaṭāyoḥ kurute kathām.

English Translation

"He intended to eat us. Thus, he said this coming close - Oh! Who is this telling story of my brother Jaṭāyu?"

०३ २६६ ०४८

शास्त्र - *śāstra*

संपातिर्नाम तस्याहं ज्येष्ठो भ्राता खगाधिपः।
अन्योन्यस्पर्धयारूढावावामादित्यसंसदम्॥

saṃpātirnāma tasyāhaṃ jyeṣṭho bhrātā khagādhipaḥ.
anyonyaspardhayārūḍhāvāvāmādityasaṃsadam..

अन्वय - *anvaya*

संपातिः नाम तस्य अहम् ज्येष्ठः भ्राता खगाधिपः। अन्योन्यस्पर्धया आरूढौ आवाम् आदित्यसंसदम्।

saṃpātiḥ nāma tasya aham jyeṣṭhaḥ bhrātā khagādhipaḥ. anyonyaspardhayā ārūḍhau āvām ādityasaṃsadam.

English Translation

"I am his eldest brother and the lord of the birds named Saṃpāti. Through mutual competition, we climbed to the assembly of the Sun."

०३ २६६ ०४९

शास्त्र - *śāstra*

ततो दग्धाविमौ पक्षौ न दग्धौ तु जटायुषः।
तदा मे चिरदृष्टः स भ्राता गृध्रपतिः प्रियः।
निर्दग्धपक्षः पतितो ह्यहमस्मिन्महागिरौ॥

tato dagdhāvimau pakṣau na dagdhau tu jaṭāyuṣaḥ.
tadā me ciradṛṣṭaḥ sa bhrātā gṛdhrapatiḥ priyaḥ.
nirdagdhapakṣaḥ patito hyahamasminmahāgirau..

अन्वय - *anvaya*

ततः दग्धौ इमौ पक्षौ न दग्धौ तु जटायुषः। तदा मया चिरदृष्टः सः भ्राता गृध्रपतिः मे प्रियः निर्दग्धपक्षः। पतितः हि अहम् अस्मिन् महागिरौ।

tataḥ dagdhau imau pakṣau na dagdhau tu jaṭāyuṣaḥ. tadā ciradṛṣṭaḥ saḥ bhrātā gṛdhrapatiḥ me priyaḥ nirdagdhapakṣaḥ. patitaḥ hi aham asmin mahāgirau.

English Translation

"Then, these wings were burnt, but that of Jaṭāyu did not. Since then, the King of the Vultures, my beloved brother, the one with unburnt wings, was seen long ago. I indeed fell on this mountain."

०३ २६६ ०५०

शास्त्र - *śāstra*

तस्यैवं वदतोऽस्माभिर्हतो भ्राता निवेदितः।
व्यसनं भवतश्चेदं संक्षेपाद्वै निवेदितम्॥

tasyaivaṃ vadato'smābhirhato bhrātā niveditaḥ.
vyasanaṃ bhavataścedaṃ saṃkṣepādvai niveditam..

अन्वय - *anvaya*

एवम् अस्माभिः हतः तस्य वदतः भ्राता निवेदितः। व्यसनम् भवतः च इदम् संक्षेपात् वै निवेदितम्।

evam asmābhiḥ hataḥ tasya vadataḥ bhrātā niveditaḥ.
vyasanam bhavataḥ ca idam saṃkṣepāt vai niveditam.

English Translation

"In this way, we informed of the brother's death of the speaking one, and this destruction of the honourary was presented comprehensively."

०३ २६६ ०५१

शास्त्र - *śāstra*

स संपातिस्तदा राजञ्श्रुत्वा सुमहदप्रियम्।
विषण्णचेताः पप्रच्छ पुनरस्मानरिंदम॥

sa saṃpātistadā rājañśrutvā sumahadapriyam.
viṣaṇṇacetāḥ papraccha punarasmānariṃdama..

अन्वय - *anvaya*

राजन् अरिंदम सुमहत् अप्रियम् श्रुत्वा सः संपातिः तदा विषण्णचेताः पप्रच्छ पुनः अस्मान्।

rājan ariṃdama sumahat apriyam śrutvā saḥ saṃpātiḥ tadā viṣaṇṇacetāḥ papraccha punaḥ asmān.

English Translation

"O King! O conquerer of enemies! Having heard the great tragedy, the low-spirited Saṃpāti again asked us."

०३ २६६ ०५२

शास्त्र - *śāstra*

कः स रामः कथं सीता जटायुश्च कथं हतः।
इच्छामि सर्वमेवैतच्छ्रोतुं प्लवगसत्तमाः॥

kaḥ sa rāmaḥ kathaṃ sītā jaṭāyuśca kathaṃ hataḥ.
icchāmi sarvamevaitacchrotuṃ plavagasattamāḥ..

अन्वय - *anvaya*

कः सः रामः कथम् सीता जटायुः च कथम् हतः। इच्छामि सर्वम् एव एतद् श्रोतुम् प्लवगसत्तमाः।

kaḥ saḥ rāmaḥ katham sītā jaṭāyuḥ ca katham hataḥ.
icchāmi sarvam eva etad śrotum plavagasattamāḥ.

English Translation

"O virtuous monkeys! Who is this Rāma? How is Sītā, and how was Jaṭāyu killed? I desire to hear this, indeed, completely."

०३ २६६ ०५३

शास्त्र - *śāstra*

तस्याहं सर्वमेवैतं भवतो व्यसनागमम्।
प्रायोपवेशने चैव हेतुं विस्तरतोऽब्रुवम्॥

tasyāhaṃ sarvamevaitaṃ bhavato vyasanāgamam.
prāyopaveśane caiva hetuṃ vistarato'bruvam..

अन्वय - *anvaya*

तस्य अहम् सर्वम् एव एतम् भवतः व्यसनागमम् प्रायोपवेशने च एव हेतुम् विस्तरतः अब्रुवम्।

tasya aham sarvam eva etam bhavataḥ vyasanāgamam prāyopaveśane ca eva hetum vistarataḥ abruvam.

English Translation

“In detail, I told him everything about the approach of calamity and why you abstained from food until death.”

०३ २६६ ०५४

शास्त्र - *śāstra*

सोऽस्मानुत्थापयामास वाक्येनानेन पक्षिराट्।
रावणो विदितो मह्यं लङ्का चास्य महापुरी॥

so’smānutthāpayāmāsa vākyenānena pakṣirāṭ.
rāvaṇo vidito mahyaṃ laṅkā cāsya mahāpurī..

अन्वय - *anvaya*

सः पक्षिराट् अस्मान् उत्थापयामास वाक्येन अनेन। रावणः विदितः मह्यम् लङ्का च अस्य महापुरी।

saḥ pakṣirāṭ asmān utthāpayāmāsa vākyena anena.
rāvaṇaḥ viditaḥ mahyam laṅkā ca asya mahāpurī.

English Translation

“That King of the birds caused us to rise with this statement - Rāvaṇa and his great city Laṅkā is known to me.”

०३ २६६ ०५५

शास्त्र - *śāstra*

दृष्टा पारे समुद्रस्य त्रिकूटगिरिकन्दरे।
भवित्री तत्र वैदेही न मेऽस्त्यत्र विचारणा॥

dṛṣṭā pāre samudrasya trikūṭagirikandare.
bhavitrī tatra vaidehī na me’styatra vicāraṇā..

अन्वय - *anvaya*

दृष्टा पारे समुद्रस्य त्रिकूटगिरिकन्दरे। भवित्री तत्र वैदेही न मे अस्ति अत्र विचारणा।

dṛṣṭā pāre samudrasya trikūṭagirikandare. bhavitrī tatra vaidehī na me asti atra vicāraṇā.

English Translation

"She was seen on the other side in a mountain cave on Trikūṭa. The lady Vaidehī is there. There is no doubt of me on this."

०३ २६६ ०५६

शास्त्र - *śāstra*

इति तस्य वचः श्रुत्वा वयमुत्थाय सत्वराः।
सागरप्लवने मन्त्रं मन्त्रयामः परंतप॥

iti tasya vacaḥ śrutvā vayamutthāya satvarāḥ.
sāgaraplavane mantraṃ mantrayāmaḥ paraṃtapa..

अन्वय - *anvaya*

इति तस्य वचः श्रुत्वा वयम् उत्थाय सत्वराः सागरप्लवने मन्त्रम् मन्त्रयामः परंतप।

iti tasya vacaḥ śrutvā vayam utthāya satvarāḥ sāgaraplavane mantram mantrayāmaḥ paraṃtapa.

English Translation

"O destroyer of enemies! Having heard these words and quickly standing up, we discussed a design for traversing the ocean."

०३ २६६ ०५७

शास्त्र - *śāstra*

नाध्यवस्यद्यदा कश्चित्सागरस्य विलङ्घने।
ततः पितरमाविश्य पुप्लुवेऽहं महार्णवम्।
शतयोजनविस्तीर्णं निहत्य जलराक्षसीम्॥

nādhyavasyadyadā kaścitsāgarasya vilaṅghane.
tataḥ pitaramāviśya pupluve'haṃ mahārṇavam.
śatayojanavistīrṇaṃ nihatya jalarākṣasīm..

अन्वय - *anvaya*

न अध्यवस्यत् यदा कश्चित् सागरस्य विलङ्घने ततः पितरम् आविश्य पुप्लुवे अहम् महार्णवम् शतयोजनविस्तीर्णम् जलराक्षसीम् निहत्य।

na adhyavasyat yadā kaścit sāgarasya vilaṅghane tataḥ pitaram āviśya pupluve aham mahārṇavam śatayojanavistīrṇam jalarākṣasīm nihatya.

English Translation

"When no one settled on crossing the ocean, I entered my father, wind, and crossed the great ocean spread over a hundred yojanas, having killed the Rākṣasī in water."

०३ २६६ ०५८

शास्त्र - *śāstra*

तत्र सीता मया दृष्टा रावणान्तःपुरे सती।
उपवासतपःशीला भर्तृदर्शनलालसा।
जटिला मलदिग्धाङ्गी कृशा दीना तपस्विनी॥

tatra sītā mayā dṛṣṭā rāvaṇāntaḥpure satī.
upavāsatapaḥśīlā bhartṛdarśanalālasā.
jaṭilā maladigdhāṅgī kṛśā dīnā tapasvinī..

अन्वय - *anvaya*

तत्र सीता सती उपवासतपःशीला भर्तृदर्शनलालसा जटिला मलदिग्धाङ्गी कृशा दीना तपस्विनी मया दृष्टा रावणान्तःपुरे।

tatra sītā satī upavāsatapaḥśīlā bhartṛdarśanalālasā jaṭilā maladigdhāṅgī kṛśā dīnā tapasvinī mayā dṛṣṭā rāvaṇāntaḥpure.

English Translation

"There, the righteous ascetic Sītā, with twisted hair, desirous of seeing her husband, lean, wretched, and whose body is smeared with dust, was seen by me in the middle of the city of Rāvaṇa."

०३ २६६ ०५९

शास्त्र - *śāstra*

निमित्तैस्तामहं सीतामुपलभ्य पृथग्विधैः।
उपसृत्याब्रुवं चार्यामभिगम्य रहोगताम्॥

nimittaistāmahaṃ sītāmupalabhya pṛthagvidhaiḥ.
upasṛtyābruvaṃ cāryāmabhigamya rahogatām..

अन्वय - *anvaya*

ताम् सीताम् निमित्तैः पृथग्विधैः उपलभ्य रहोगताम् अभिगम्य उपसृत्य अब्रुवम् आर्याम् अहम्।

tām sītām nimittaiḥ pṛthagvidhaiḥ upalabhya rahogatām abhigamya upasṛtya abruvam āryām aham.

English Translation

"Having perceived her as Sītā using various marks, going secretly, and approaching the honourable lady, I spoke to her."

०३ २६६ ०६०

शास्त्र - *śāstra*

सीते रामस्य दूतोऽहं वानरो मारुतात्मजः।
त्वद्दर्शनमभिप्रेप्सुरिह प्राप्तो विहायसा॥

sīte rāmasya dūto'haṃ vānaro mārutātmajaḥ.
tvaddarśanamabhiprepsuriha prāpto vihāyasā..

अन्वय - *anvaya*

सीते रामस्य दूतः अहम् वानरः मारुतात्मजः। त्वद्दर्शनम् अभिप्रेप्सुः इह प्राप्तः विहायसा।

sīte rāmasya dūtaḥ aham vānaraḥ mārutātmajaḥ.
tvaddarśanam abhiprepsuḥ iha prāptaḥ vihāyasā.

English Translation

"O Sītā! I am a messenger of Rāma. I am a Vānara and son of the lord of wind. I am desirous of gaining your sight here, having obtained the sky."

०३ २६६ ०६१

शास्त्र - *śāstra*

राजपुत्रौ कुशलिनौ भ्रातरौ रामलक्ष्मणौ।
सर्वशाखामृगेन्द्रेण सुग्रीवेणाभिपालितौ॥

rājaputrau kuśalinau bhrātarau rāmalakṣmaṇau.
sarvaśākhāmṛgendreṇa sugrīveṇābhipālitau..

अन्वय - *anvaya*

राजपुत्रौ कुशलिनौ भ्रातरौ रामलक्ष्मणौ सर्वशाखामृगेन्द्रेण सुग्रीवेण अभिपालितौ।

rājaputrau kuśalinau bhrātarau rāmalakṣmaṇau
sarvaśākhāmṛgendreṇa sugrīveṇa abhipālitau.

English Translation

"The two prosperous princely brothers, Rāma and Lakṣmaṇa, are protected by the King of all the monkeys, Sugrīva."

०३ २६६ ०६२

शास्त्र - *śāstra*

कुशलं त्वाब्रवीद्रामः सीते सौमित्रिणा सह।
सखिभावाच्च सुग्रीवः कुशलं त्वानुपृच्छति॥

kuśalaṃ tvābravīdrāmaḥ sīte saumitriṇā saha.
sakhibhāvācca sugrīvaḥ kuśalaṃ tvānupṛcchati..

अन्वय - *anvaya*

सीते कुशलम् त्वा अब्रवीत् रामः सौमित्रिणा सह। सखिभावात् च सुग्रीवः कुशलम् त्वा अनुपृच्छति।

sīte kuśalam tvā abravīt rāmaḥ saumitriṇā saha.
sakhibhāvāt ca sugrīvaḥ kuśalam tvā anupṛcchati.

English Translation

"Rāma, accompanied by the son of Sumitrā, told - O Sītā! Welfare to you. And Sugrīva has asked from friendship about your welfare."

०३ २६६ ०६३

शास्त्र - *śāstra*

क्षिप्रमेष्यति ते भर्ता सर्वशाखामृगैः सह।
प्रत्ययं कुरु मे देवि वानरोऽस्मि न राक्षसः॥

kṣiprameṣyati te bhartā sarvaśākhāmṛgaiḥ saha.
pratyayaṃ kuru me devi vānaro'smi na rākṣasaḥ..

अन्वय - *anvaya*

क्षिप्रम् एष्यति ते भर्ता सर्वशाखामृगैः सह। प्रत्ययम् कुरु मे देवि वानरः अस्मि न राक्षसः।

kṣipram eṣyati te bhartā sarvaśākhāmṛgaiḥ saha.
pratyayam kuru me devi vānaraḥ asmi na rākṣasaḥ.

English Translation

"Your husband will quickly move with all the monkeys. O lady! Trust me. I am not a Rākṣasa but a Vānara."

०३ २६६ ०६४

शास्त्र - *śāstra*

मुहूर्तमिव च ध्यात्वा सीता मां प्रत्युवाच ह।
अवैमि त्वां हनूमन्तमविन्ध्यवचनादहम्॥

muhūrtamiva ca dhyātvā sītā māṃ pratyuvāca ha.
avaimi tvāṃ hanūmantamavindhyavacanādaham..

अन्वय - *anvaya*

मुहूर्तम् इव च ध्यात्वा सीता माम् प्रत्युवाच ह। अवैमि त्वाम् हनूमन्तम् अविन्ध्यवचनात् अहम्।

muhūrtam iva ca dhyātvā sītā mām pratyuvāca ha.
avaimi tvām hanūmantam avindhyavacanāt aham.

English Translation

"And after thinking for a moment, Sītā replied to me - I know you are Hanūmat from the words of Avindhya."

०३ २६६ ०६५

शास्त्र - *śāstra*

अविन्ध्यो हि महाबाहो राक्षसो वृद्धसंमतः।
कथितस्तेन सुग्रीवस्त्वद्विधैः सचिवैर्वृतः॥

avindhyo hi mahābāho rākṣaso vṛddhasaṃmataḥ.
kathitastena sugrīvastvadvidhaiḥ sacivairvṛtaḥ..

अन्वय - *anvaya*

महाबाहो अविन्ध्यः हि राक्षसः वृद्धसम्मतः कथितः। तेन सुग्रीवः त्वद्विधैः सचिवैः वृतः।

mahābāho avindhyaḥ hi rākṣasaḥ vṛddhasammataḥ kathitaḥ. tena sugrīvaḥ tvadvidhaiḥ sacivaiḥ vṛtaḥ.

English Translation

"O mighty-armed! Avindhya is indeed a Rākṣasa highly honoured by the learned who said that ministers like you surround Sugrīva."

०३ २६६ ०६६

शास्त्र - *śāstra*

गम्यतामिति चोक्त्वा मां सीता प्रादादिमं मणिम्।
धारिता येन वैदेही कालमेतमनिन्दिता॥

gamyatāmiti coktvā māṃ sītā prādādimaṃ maṇim. dhāritā yena vaidehī kālametamaninditā..

अन्वय - *anvaya*

गम्यताम् इति च उक्त्वा माम् सीता प्रादात् इमम् मणिम् येन धारिता वैदेही कालम् एतम् अनिन्दिता।

gamyatām iti ca uktvā mām sītā prādāt imam maṇim yena dhāritā vaidehī kālam etam aninditā.

English Translation

"Having said - Let it be gone! The virtuous Sītā gave me this jewel, which she has held for a long time."

०३ २६६ ०६७

शास्त्र - *śāstra*

प्रत्ययार्थं कथां चेमां कथयामास जानकी।
क्षिप्तामिषीकां काकस्य चित्रकूटे महागिरौ।
भवता पुरुषव्याघ्र प्रत्यभिज्ञानकारणात्॥

pratyayārthaṃ kathāṃ cemāṃ kathayāmāsa jānakī.
kṣiptāmiṣīkāṃ kākasya citrakūṭe mahāgirau.
bhavatā puruṣavyāghra pratyabhijñānakāraṇāt..

अन्वय - *anvaya*

प्रत्ययार्थम् कथाम् च इमाम् कथयामास जानकी प्रत्यभिज्ञानकारणात्।
पुरुषव्याघ्र क्षिप्ताम् इषीकाम् काकस्य चित्रकूटे महागिरौ भवता।

pratyayārtham kathām ca imām kathayāmāsa jānakī
pratyabhijñānakāraṇāt. puruṣavyāghra kṣiptām
iṣīkām kākasya citrakūṭe mahāgirau bhavatā.

English Translation

"The daughter of Janaka told this story for trust as a token of recognition. O tiger amongst men! A stall of grass used as an arrow was thrown by you on the Citrakūṭa mountain."

०३ २६६ ०६८

शास्त्र - *śāstra*

श्रावयित्वा तदात्मानं ततो दग्ध्वा च तां पुरीम्।
संप्राप्त इति तं रामः प्रियवादिनमर्चयत्॥

śrāvayitvā tadātmānaṃ tato dagdhvā ca tāṃ purīm.
saṃprāpta iti taṃ rāmaḥ priyavādinamarcayat..

अन्वय - *anvaya*

श्रावयित्वा तदा आत्मानम् ततः दग्ध्वा च ताम् पुरीम् संप्राप्त इति तम् प्रियवादिनम् रामः आर्चयत्।

śrāvayitvā tadā ātmānam tataḥ dagdhvā ca tām purīm
saṃprāpta iti tam priyavādinam rāmaḥ ārcayat.

English Translation

“Then, having caused them to hear me and having burned their city, I have arrived.” Rāma honoured the one speaking kindly.

— ११ —

०३ २६७

असतो मा सद्गमय।
तमसो मा ज्योतिर्गमय।
मृत्योर्मामृतं गमय॥
ॐ शान्तिः शान्तिः शान्तिः॥

०३ २६७ ००१

शास्त्र - *śāstra*

मार्कण्डेय उवाच।
ततस्तत्रैव रामस्य समासीनस्य तैः सह।
समाजग्मुः कपिश्रेष्ठाः सुग्रीववचनात्तदा॥

mārkaṇḍeya uvāca.
tatastatraiva rāmasya samāsīnasya taiḥ saha.
samājagmuḥ kapiśreṣṭhāḥ sugrīvavacanāttadā..

अन्वय - *anvaya*

ततः तत्र एव रामस्य समासीनस्य तैः सह तदा समाजग्मुः कपिश्रेष्ठाः सुग्रीववचनात्।

tataḥ tatra eva rāmasya samāsīnasya taiḥ saha tadā samājagmuḥ kapiśreṣṭhāḥ sugrīvavacanāt.

English Translation

Mārkaṇḍeya said: Therefore, while Rāma was sitting with them, the best monkeys came together from the command of Sugrīva.

०३ २६७ ००२

शास्त्र - *śāstra*

वृतः कोटिसहस्रेण वानराणां तरस्विनाम्।
श्वशुरो वालिनः श्रीमान्सुषेणो राममभ्ययात्॥

vṛtaḥ koṭisahasreṇa vānarāṇāṃ tarasvinām.
śvaśuro vālinaḥ śrīmānsuṣeṇo rāmamabhyayāt..

अन्वय - *anvaya*

वृतः कोटिसहस्रेण वानराणाम् तरस्विनाम् श्वशुरः वालिनः श्रीमान् सुषेणः रामम् अभ्ययात्।

vṛtaḥ koṭisahasreṇa vānarāṇām tarasvinām śvaśuraḥ vālinaḥ śrīmān suṣeṇaḥ rāmam abhyayāt.

English Translation

The honourable Suṣeṇa, the father-in-law of Vālin, surrounded by ten billion energetic monkeys, approached Rāma.

०३ २६७ ००३

शास्त्र - *śāstra*

कोटीशतवृतौ चापि गजो गवय एव च।
वानरेन्द्रौ महावीर्यौ पृथक्पृथगदृश्यताम्॥

koṭīśatavṛtau cāpi gajo gavaya eva ca.
vānarendrau mahāvīryau pṛthakpṛthagadṛśyatām..

अन्वय - *anvaya*

कोटीशतवृतौ च अपि गजः गवयः एव च वानरेन्द्रौ महावीर्यौ पृथक् पृथक् अदृश्येताम्।

koṭīśatavṛtau ca api gajaḥ gavayaḥ eva ca vānarendrau mahāvīryau pṛthak pṛthak adṛśyetām.

English Translation

And indeed, the mighty warriors and lord of the monkeys, Gaja and Gavaya, were seen one by one surrounded by a billion.

०३ २६७ ००४

शास्त्र - *śāstra*

षष्टिकोटिसहस्राणि प्रकर्षन्प्रत्यदृश्यत।
गोलाङ्गूलो महाराज गवाक्षो भीमदर्शनः॥

ṣaṣṭikoṭisahasrāṇi prakarṣanpratyadṛśyata.
golāṅgūlo mahārāja gavākṣo bhīmadarśanaḥ..

अन्वय - *anvaya*

षष्टिकोटिसहस्राणि प्रकर्षन् गवाक्षः गोलाङ्गूलः भीमदर्शनः प्रत्यदृश्यत महाराज।

ṣaṣṭikoṭisahasrāṇi prakarṣan gavākṣaḥ golāṅgūlaḥ bhīmadarśanaḥ pratyadṛśyata mahārāja.

English Translation

O, great King! The cow-tailed monkey, frightful, Gavākṣa appeared leading an army of six hundred billion.

०३ २६७ ००५

शास्त्र - *śāstra*

गन्धमादनवासी तु प्रथितो गन्धमादनः।
कोटीसहस्रमुग्राणां हरीणां समकर्षत॥

gandhamādanavāsī tu prathito gandhamādanaḥ.
koṭīsahasramugrāṇāṃ harīṇāṃ samakarṣata..

अन्वय - *anvaya*

गन्धमादनवासी तु प्रथितः गन्धमादनः कोटीसहस्रम् उग्राणाम् हरीणाम् समकर्षत।

gandhamādanavāsī tu prathitaḥ gandhamādanaḥ koṭīsahasram ugrāṇām harīṇām samakarṣata.

English Translation

But the celebrated Gandhamādana, living on the Gandhamādana, carried ten billion ferocious monkeys.

०३ २६७ ००६

शास्त्र - *śāstra*

पनसो नाम मेधावी वानरः सुमहाबलः।
कोटीर्दश द्वादश च त्रिंशत्पञ्च प्रकर्षति॥

panaso nāma medhāvī vānaraḥ sumahābalaḥ.
koṭīrdaśa dvādaśa ca triṃśatpañca prakarṣati..

अन्वय - *anvaya*

पनसः नाम मेधावी वानरः सुमहाबलः दश च द्वादश च त्रिंशत् च पञ्च कोटीम् प्रकर्षति।

panasaḥ nāma medhāvī vānaraḥ sumahābalaḥ daśa ca dvādaśa ca triṃśat ca pañca koṭīm prakarṣati.

English Translation

An intelligent, mighty Vānara named Panasa leads five hundred and seventy million.

०३ २६७ ००७

शास्त्र - *śāstra*

श्रीमान्दधिमुखो नाम हरिवृद्धोऽपि वीर्यवान्।
प्रचकर्ष महत्सैन्यं हरीणां भीमतेजसाम्॥

śrīmāndadhimukho nāma harivṛddho'pi vīryavān.
pracakarṣa mahatsainyaṃ harīṇāṃ bhīmatejasām..

अन्वय - *anvaya*

श्रीमान् दधिमुखः नाम हरिवृद्धः अपि वीर्यवान् प्रचकर्ष महत्सैन्यम् हरीणाम् भीमतेजसाम्।

śrīmān dadhimukhaḥ nāma harivṛddhaḥ api vīryavān pracakarṣa mahatsainyam harīṇām bhīmatejasām.

English Translation

The honourary older warrior monkey named Dadhimukha led a massive army of frightful brilliant monkeys.

०३ २६७ ००८

शास्त्र - *śāstra*

कृष्णानां मुखपुण्ड्राणामृक्षाणां भीमकर्मणाम्।
कोटीशतसहस्रेण जाम्बवान्प्रत्यदृश्यत॥

kṛṣṇānāṃ mukhapuṇḍrāṇāmṛkṣāṇāṃ bhīmakarmaṇām.
koṭīśatasahasreṇa jāmbavānpratyadṛśyata..

अन्वय - *anvaya*

कृष्णानाम् मुखपुण्ड्राणाम् ऋक्षाणाम् भीमकर्मणाम् कोटीशतसहस्रेण जाम्बवान् प्रत्यदृश्यत।

kṛṣṇānām mukhapuṇḍrāṇām ṛkṣāṇām bhīmakarmaṇām koṭīśatasahasreṇa jāmbavān pratyadṛśyata.

English Translation

Jāmbavat led with a billion dark, dreadful bears whose faces were smeared.

०३ २६७ ००९

शास्त्र - *śāstra*

एते चान्ये च बहवो हरियूथपयूथपाः।
असंख्येया महाराज समीयू रामकारणात्॥

ete cānye ca bahavo hariyūthapayūthapāḥ.
asaṃkhyeyā mahārāja samīyū rāmakāraṇāt..

अन्वय - *anvaya*

एते च अन्ये च बहवः हरियूथपयूथपाः असंख्येयाः महाराज समीयुः रामकारणात्।

ete ca anye ca bahavaḥ hariyūthapayūthapāḥ asaṃkhyeyāḥ mahārāja samīyuḥ rāmakāraṇāt.

English Translation

O, great King! These and many other innumerable multitudes of monkeys came together because of Rāma.

०३ २६७ ०१०

शास्त्र - *śāstra*

शिरीषकुसुमाभानां सिंहानामिव नर्दताम्।
श्रूयते तुमुलः शब्दस्तत्र तत्र प्रधावताम्॥

śirīṣakusumābhānāṃ siṃhānāmiva nardatām.
śrūyate tumulaḥ śabdastatra tatra pradhāvatām..

अन्वय - *anvaya*

तुमुलः शब्दः शिरीषकुसुमाभानाम् सिंहानाम् इव नर्दताम् श्रूयते तत्र तत्र प्रधावताम्।

tumulaḥ śabdaḥ śirīṣakusumābhānām siṃhānām iva nardatām śrūyate tatra tatra pradhāvatām.

English Translation

The violent noise of those running here and there looking brilliant like Śirīṣa flowers was like that of roaring lions.

०३ २६७ ०११

शास्त्र - *śāstra*

गिरिकूटनिभाः केचित्केचिन्महिषसंनिभाः।
शरदभ्रप्रतीकाशाः पिष्टहिङ्गुलकाननाः॥

girikūṭanibhāḥ kecitkecinmahiṣasaṃnibhāḥ.
śaradabhrapratīkāśāḥ piṣṭahiṅgulakānanāḥ..

अन्वय - *anvaya*

केचित् गिरिकूटनिभाः केचित् महिषसंनिभाः शरदभ्रप्रतीकाशाः पिष्टहिङ्गुलकाननाः।

kecit girikūṭanibhāḥ kecit mahiṣasaṃnibhāḥ śaradabhrapratīkāśāḥ piṣṭahiṅgulakānanāḥ.

English Translation

Some were like peaks of mountains. Some were like buffalo. Some resembled clouds of autumn. Some had faces decorated with vermilion.

०३ २६७ ०१२

शास्त्र - *śāstra*

उत्पतन्तः पतन्तश्च प्लवमानाश्च वानराः।
उद्धुन्वन्तोऽपरे रेणून्समाजग्मुः समन्ततः॥

utpatantaḥ patantaśca plavamānāśca vānarāḥ.
uddhunvanto'pare reṇūnsamājagmuḥ samantataḥ..

अन्वय - *anvaya*

उत्पतन्तः पतन्तः च प्लवमानाः च वानराः उद्धुन्वन्तः अपरे रेणून् समाजग्मुः समन्ततः।

utpatantaḥ patantaḥ ca plavamānāḥ ca vānarāḥ uddhunvantaḥ apare reṇūn samājagmuḥ samantataḥ.

English Translation

Other monkeys were rising and falling, and others causing dust rise came together from all sides.

०३ २६७ ०१३

शास्त्र - *śāstra*

स वानरमहालोकः पूर्णसागरसंनिभः।
निवेशमकरोत्तत्र सुग्रीवानुमते तदा॥

sa vānaramahālokaḥ pūrṇasāgarasaṃnibhaḥ.
niveśamakarottatra sugrīvānumate tadā..

अन्वय - *anvaya*

सः वानरमहालोकः पूर्णसागरसंनिभः निवेशम् अकरोत् तत्र सुग्रीवानुमते तदा।

saḥ vānaramahālokaḥ pūrṇasāgarasaṃnibhaḥ niveśam akarot tatra sugrīvānumate tadā.

English Translation

Then, this great gathering of Vānaras looking like a filled ocean settled there with the approval of Sugrīva.

०३ २६७ ०१४

शास्त्र - *śāstra*

ततस्तेषु हरीन्द्रेषु समावृत्तेषु सर्वशः।
तिथौ प्रशस्ते नक्षत्रे मुहूर्ते चाभिपूजिते॥

tatasteṣu harīndreṣu samāvṛtteṣu sarvaśaḥ.
tithau praśaste nakṣatre muhūrte cābhipūjite..

अन्वय - *anvaya*

ततः तेषु हरीन्द्रेषु समावृत्तेषु सर्वशः तिथौ प्रशस्ते नक्षत्रे मुहूर्ते च अभिपूजिते।

tataḥ teṣu harīndreṣu samāvṛtteṣu sarvaśaḥ tithau praśaste nakṣatre muhūrte ca abhipūjite.

English Translation

Then, all those lords of the monkeys came together during the auspicious constellation and the honoured time.

०३ २६७ ०१५

शास्त्र - *śāstra*

तेन व्यूढेन सैन्येन लोकानुद्वर्तयन्निव।
प्रययौ राघवः श्रीमान्सुग्रीवसहितस्तदा॥

tena vyūḍhena sainyena lokānudvartayanniva.
prayayau rāghavaḥ śrīmānsugrīvasahitastadā..

अन्वय - *anvaya*

तेन व्यूढेन सैन्येन लोकान् उद्वर्तयन् इव प्रययौ श्रीमान् राघवः सुग्रीवसहितः तदा।

tena vyūḍhena sainyena lokān udvartayan iva prayayau śrīmān rāghavaḥ sugrīvasahitaḥ tadā.

English Translation

Then, the opulent Rāghava set forth accompanied by Sugrīva with the arranged military like shaking the worlds.

०३ २६७ ०१६

शास्त्र - *śāstra*

मुखमासीत्तु सैन्यस्य हनूमान्मारुतात्मजः।
जघनं पालयामास सौमित्रिरकुतोभयः॥

mukhamāsīttu sainyasya hanūmānmārutātmajaḥ.
jaghanaṃ pālayāmāsa saumitrirakutobhayaḥ..

अन्वय - *anvaya*

मुखम् आसीत् तु सैन्यस्य हनूमान् मारुतात्मजः। जघनम् पालयामास सौमित्रिः अकुतोभयः।

mukham āsīt tu sainyasya hanūmān mārutātmajaḥ.
jaghanam pālayāmāsa saumitriḥ akutobhayaḥ.

English Translation

Hanūmat, the son of the god of wind, was at the mouth of the army. Lakṣmaṇa, the one without fear of any quarter, protected the hinder part.

०३ २६७ ०१७

शास्त्र - *śāstra*

बद्धगोधाङ्गुलित्राणौ राघवौ तत्र रेजतुः।
वृतौ हरिमहामात्रैश्चन्द्रसूर्यौ ग्रहैरिव॥

baddhagodhāṅgulitrāṇau rāghavau tatra rejatuḥ.
vṛtau harimahāmātraiścandrasūryau grahairiva..

अन्वय - *anvaya*

बद्धगोधाङ्गुलित्राणौ राघवौ तत्र रेजतुः वृतौ हरिमहामात्रैः चन्द्रसूर्यौ ग्रहैः इव।

baddhagodhāṅgulitrāṇau rāghavau tatra rejatuḥ vṛtau harimahāmātraiḥ candrasūryau grahaiḥ iva.

English Translation

There, the two descendants of Raghu, Rāma and Lakṣmaṇa, shined with fastened bowstrings and arm protectors, surrounded by the most excellent of monkeys, like planets around the sun and moon.

०३ २६७ ०१८

शास्त्र - *śāstra*

प्रबभौ हरिसैन्यं तच्छालतालशिलायुधम्।
सुमहच्छालिभवनं यथा सूर्योदयं प्रति॥

prababhau harisainyaṃ tacchālatālaśilāyudham.
sumahacchālibhavanaṃ yathā sūryodayaṃ prati..

अन्वय - *anvaya*

यथा सुमहत् शालिभवनम् सूर्योदयम् प्रति तद् प्रबभौ हरिसैन्यम् शालतालशिलायुधम्।

yathā sumahat śālibhavanam sūryodayam prati tad prababhau harisainyam śālatālaśilāyudham.

English Translation

That army of monkeys armed with Śāl, palm trees, and stones shined like a rice field towards sunrise.

०३ २६७ ०१९

शास्त्र - *śāstra*

नलनीलाङ्गदक्राथमैन्दद्विविदपालिता।
ययौ सुमहती सेना राघवस्यार्थसिद्धये॥

nalanīlāṅgadakrāthamaindadvividapālitā.
yayau sumahatī senā rāghavasyārthasiddhaye..

अन्वय - *anvaya*

नलनीलाङ्गदक्राथमैन्दद्विविदपालिता सुमहती सेना राघवस्य अर्थसिद्धये ययौ।

nalanīlāṅgadakrāthamaindadvividapālitā sumahatī senā rāghavasya arthasiddhaye yayau.

English Translation

The large military guarded by Nala, Nīla, Aṅgada, Krātha, Mainda, and Dvivida went for the success of Rāghava.

०३ २६७ ०२०

शास्त्र - *śāstra*

विधिवत्सुप्रशस्तेषु बहुमूलफलेषु च।
प्रभूतमधुमांसेषु वारिमत्सु शिवेषु च॥

vidhivatsupraśasteṣu bahumūlaphaleṣu ca.
prabhūtamadhumāṃseṣu vārimatsu śiveṣu ca..

अन्वय - *anvaya*

विधिवत् सुप्रशस्तेषु बहुमूलफलेषु च। प्रभूतमधुमांसेषु वारिमत्सु शिवेषु च।

vidhivat supraśasteṣu bahumūlaphaleṣu ca. prabhūtamadhumāṃseṣu vārimatsu śiveṣu ca.

English Translation

They were in places with lots of roots and fruits, places very famous according to duty, and auspicious places with lots of honey and meat filled with water.

०३ २६७ ०२१

शास्त्र - *śāstra*

निवसन्ती निराबाधा तथैव गिरिसानुषु।
उपायाद्धरिसेना सा क्षारोदमथ सागरम्॥

nivasantī nirābādhā tathaiva girisānuṣu.
upāyāddharisenā sā kṣārodamatha sāgaram..

अन्वय - *anvaya*

निवसन्ती निराबाधा तथा एव गिरिसानुषु। उपायात् हरिसेना सा क्षारोदम् अथ सागरम्।

nivasantī nirābādhā tathā eva girisānuṣu. upāyāt harisenā sā kṣārodam atha sāgaram.

English Translation

Then, indeed, they were staying in the undisturbed mountain tableland. Then, the army of monkeys arrived at the salty sea.

०३ २६७ ०२२

शास्त्र - *śāstra*

द्वितीयसागरनिभं तद्बलं बहुलध्वजम्।
वेलावनं समासाद्य निवासमकरोत्तदा॥

dvitīyasāgaranibhaṃ tadbalaṃ bahuladhvajam.
velāvanaṃ samāsādya nivāsamakarottadā..

अन्वय - *anvaya*

वेलावनम् समासाद्य द्वितीयसागरनिभम् तद्बलम् बहुलध्वजम् निवासम् अकरोत् तदा।

velāvanam samāsādya dvitīyasāgaranibham tadbalam bahuladhvajam nivāsam akarot tadā.

English Translation

Then, having reached the forest on the seashore, that army, which resembled a second ocean, set camp.

०३ २६७ ०२३

शास्त्र - *śāstra*

ततो दाशरथिः श्रीमान्सुग्रीवं प्रत्यभाषत।
मध्ये वानरमुख्यानां प्राप्तकालमिदं वचः॥

tato dāśarathiḥ śrīmānsugrīvaṃ pratyabhāṣata.
madhye vānaramukhyānāṃ prāptakālamidaṃ vacaḥ..

अन्वय - *anvaya*

ततः दाशरथिः श्रीमान् सुग्रीवम् प्रत्यभाषत मध्ये वानरमुख्यानाम् प्राप्तकालम् इदम् वचः।

tataḥ dāśarathiḥ śrīmān sugrīvam pratyabhāṣata
madhye vānaramukhyānām prāptakālam idam vacaḥ.

English Translation

Then, the opulent son of Daśaratha said this timely speech to Sugrīva in the middle of the chiefs of monkeys.

०३ २६७ ०२४

शास्त्र - *śāstra*

उपायः को नु भवतां मतः सागरलङ्घने।
इयं च महती सेना सागरश्चापि दुस्तरः॥

upāyaḥ ko nu bhavatāṃ mataḥ sāgaralaṅghane.
iyaṃ ca mahatī senā sāgaraścāpi dustaraḥ..

अन्वय - *anvaya*

उपायः कः नु भवताम् मतः सागरलङ्घने। इयम् च महती सेना सागरः च अपि दुस्तरः।

upāyaḥ kaḥ nu bhavatām mataḥ sāgaralaṅghane.
iyam ca mahatī senā sāgaraḥ ca api dustaraḥ.

English Translation

"What is your approach for crossing the ocean? This army is large, and also, this sea is unconquerable."

०३ २६७ ०२५

शास्त्र - *śāstra*

तत्रान्ये व्याहरन्ति स्म वानराः पटुमानिनः।
समर्था लङ्घने सिन्धोर्न तु कृत्स्नस्य वानराः॥

tatrānye vyāharanti sma vānarāḥ paṭumāninaḥ.
samarthā laṅghane sindhorna tu kṛtsnasya vānarāḥ..

अन्वय - *anvaya*

तत्र अन्ये वानराः पटुमानिनः व्याहरन्ति स्म न तु लङ्घने सिन्धोः कृत्स्नस्य वानराः समर्थाः।

tatra anye vānarāḥ paṭumāninaḥ vyāharanti sma na tu laṅghane sindhoḥ kṛtsnasya vānarāḥ samarthāḥ.

English Translation

There, other Vānaras who considered themselves strong uttered, "But monkeys cannot cross the entire ocean."

०३ २६७ ०२६

शास्त्र - *śāstra*

केचिन्नौभिर्व्यवस्यन्ति केचीच्च विविधैः प्लवैः।
नेति रामश्च तान्सर्वान्सान्त्वयन्प्रत्यभाषत॥

kecinnaubhirvyavasyanti kecīcca vividhaiḥ plavaiḥ.
neti rāmaśca tānsarvānsāntvayanpratyabhāṣata..

अन्वय - *anvaya*

केचित् नौभिः व्यवस्यन्ति केचित् च विविधैः प्लवैः। रामः च तान् सर्वान् सान्त्वयन् प्रत्यभाषत न इति।

kecit naubhiḥ vyavasyanti kecit ca vividhaiḥ plavaiḥ.
rāmaḥ ca tān sarvān sāntvayan pratyabhāṣata na iti.

English Translation

Some settled with boats, and some with different rafts. The consoling Rāma answered them all - "No."

०३ २६७ ०२७

शास्त्र - *śāstra*

शतयोजनविस्तारं न शक्ताः सर्ववानराः।
क्रान्तुं तोयनिधिं वीरा नैषा वो नैष्ठिकी मतिः॥

śatayojanavistāraṃ na śaktāḥ sarvavānarāḥ.
krāntuṃ toyanidhiṃ vīrā naiṣā vo naiṣṭhikī matiḥ..

अन्वय - *anvaya*

शतयोजनविस्तारम् न शक्ताः सर्ववानराः वीराः तोयनिधिम् क्रान्तुम्। एषा वः न नैष्ठिकी मतिः।

śatayojanavistāram na śaktāḥ sarvavānarāḥ vīrāḥ toyanidhim krāntum. eṣā vaḥ na naiṣṭhikī matiḥ.

English Translation

"All warrior monkeys can't cross the ocean spread across a hundred yojanas. This belief of yours is not fixed."

०३ २६७ ०२८

शास्त्र - *śāstra*

नावो न सन्ति सेनाया बह्व्यस्तारयितुं तथा।
वणिजामुपघातं च कथमस्मद्विधश्चरेत्॥

nāvo na santi senāyā bahvyastārayituṃ tathā.
vaṇijāmupaghātaṃ ca kathamasmadvidhaścaret..

अन्वय - *anvaya*

नावः न सन्ति सेनायाः बह्व्यः तारयितुम् तथा। वणिजाम् उपघातम् च कथम् अस्मद्विधः चरेत्।

nāvaḥ na santi senāyāḥ bahvyaḥ tārayitum tathā.
vaṇijām upaghātam ca katham asmadvidhaḥ caret.

English Translation

"There are not many boats to sail in this way for the army, and how shall one of us cause damage to the merchants?"

०३ २६७ ०२९

शास्त्र - *śāstra*

विस्तीर्णं चैव नः सैन्यं हन्याच्छिद्रेषु वै परः।
प्लवोडुपप्रतारश्च नैवात्र मम रोचते॥

vistīrṇaṃ caiva naḥ sainyaṃ hanyācchidreṣu vai paraḥ.
plavoḍupapratāraśca naivātra mama rocate..

अन्वय - *anvaya*

विस्तीर्णम् च एव नः सैन्यम् हन्यात् छिद्रेषु वै परः। प्लवोडुपप्रतारः च न एव अत्र मम रोचते।

vistīrṇam ca eva naḥ sainyam hanyāt chidreṣu vai paraḥ. plavoḍupapratāraḥ ca na eva atra mama rocate.

English Translation

"And certainly, the enemy would strike at weak points in our large army. And crossing with boats and rafts here does not please me."

०३ २६७ ०३०

शास्त्र - *śāstra*

अहं त्विमं जलनिधिं समारप्स्याम्युपायतः।
प्रतिशेष्याम्युपवसन्दर्शयिष्यति मां ततः॥

ahaṃ tvimaṃ jalanidhiṃ samārapsyāmyupāyataḥ.
pratiśeṣyāmyupavasandarśayiṣyati māṃ tataḥ..

अन्वय - *anvaya*

अहम् तु इमम् जलनिधिम् समारप्स्यामि उपायतः। प्रतिशेष्यामि उपवसन्। दर्शयिष्यति माम् ततः।

aham tu imam jalanidhim samārapsyāmi upāyataḥ.
pratiśeṣyāmi upavasan. darśayiṣyati mām tataḥ.

English Translation

"But I will take up this ocean in a clever way. I will urge it with fasting. Then it will show me."

०३ २६७ ०३१

शास्त्र - *śāstra*

न चेद्दर्शयिता मार्गं धक्ष्याम्येनमहं ततः।
महास्त्रैरप्रतिहतैरत्यग्निपवनोज्ज्वलैः॥

na ceddarśayitā mārgaṃ dhakṣyāmyenamahaṃ tataḥ.
mahāstrairapratihataairatyagnipavanojjvalaiḥ..

अन्वय - *anvaya*

न चेद् दर्शयिता मार्गम् ततः धक्ष्यामि एनम् अहम् महास्त्रैः अप्रतिहतैः अत्यग्निपवनोज्ज्वलैः।

na ced darśayitā mārgam tataḥ dhakṣyāmi enam aham
mahāstraiḥ apratihataiḥ atyagnipavanojjvalaiḥ.

English Translation

“If it does not show the way, I will burn this down with a powerful, unobstructed missile blazing with excessive fire and wind.”

०३ २६७ ०३२

शास्त्र - *śāstra*

इत्युक्त्वा सहसौमित्रिरुपस्पृश्याथ राघवः।
प्रतिशिश्ये जलनिधिं विधिवत्कुशसंस्तरे॥

ityuktvā sahasaumitrirupaspṛśyātha rāghavaḥ.
pratiśiśye jalanidhiṃ vidhivatkuśasaṃstare..

अन्वय - *anvaya*

इति उक्त्वा उपस्पृश्य अथ सहसौमित्रिः राघवः प्रतिशिश्ये जलनिधिम् विधिवत् कुशसंस्तरे।

iti uktvā upaspṛśya atha sahasaumitriḥ rāghavaḥ
pratiśiśye jalanidhim vidhivat kuśasaṃstare.

English Translation

Thus, having spoken this way and touched the water, Rāghava, accompanied by Lakṣmaṇa, urged the ocean on a bed of grass as per duty.

०३ २६७ ०३३

शास्त्र - *śāstra*

सागरस्तु ततः स्वप्ने दर्शयामास राघवम्।
देवो नदनदीभर्ता श्रीमान्यादोगणैर्वृतः॥

sāgarastu tataḥ svapne darśayāmāsa rāghavam.
devo nadanadībhartā śrīmānyādogaṇairvṛtaḥ..

अन्वय - *anvaya*

ततः तु सागरः देवः नदनदीभर्ता श्रीमान् यादोगणैः वृतः स्वप्ने दर्शयामास राघवम्।

tataḥ tu sāgaraḥ devaḥ nadanadībhartā śrīmān yādogaṇaiḥ vṛtaḥ svapne darśayāmāsa rāghavam.

English Translation

But then, the lord of the oceans, Sāgara, the husband of rivers, opulent, surrounded by sea monsters, showed in the dream of Rāghava.

०३ २६७ ०३४

शास्त्र - *śāstra*

कौसल्यामातरित्येवमाभाष्य मधुरं वचः।
इदमित्याह रत्नानामाकरैः शतशो वृतः॥

kausalyāmātarityevamābhāṣya madhuraṃ vacaḥ.
idamityāha ratnānāmākaraiḥ śataśo vṛtaḥ..

अन्वय - *anvaya*

कौसल्यामातर् इति एवम् आभाष्य मधुरम् वचः इदम् इति आह रत्नानाम् आकरैः शतशः वृतः।

kausalyāmātar iti evam ābhāṣya madhuram vacaḥ idam iti āha ratnānām ākaraiḥ śataśaḥ vṛtaḥ.

English Translation

"O son of Kausalyā!" - Having called him out in this soft way, the one surrounded with hundreds of mines of jewels said this.

०३ २६७ ०३५

शास्त्र - *śāstra*

ब्रूहि किं ते करोम्यत्र साहाय्यं पुरुषर्षभ।
इक्ष्वाकुरस्मि ते ज्ञातिरिति रामस्तमब्रवीत्॥

brūhi kiṃ te karomyatra sāhāyyaṃ puruṣarṣabha.
ikṣvākurasmi te jñātiriti rāmastamabravīt..

अन्वय - *anvaya*

ब्रूहि किम् ते करोमि अत्र साहाय्यम् पुरुषर्षभ। ते ज्ञातिः इक्ष्वाकुः अस्मि इति। रामः तम् अब्रवीत्।

brūhi kim te karomi atra sāhāyyam puruṣarṣabha. te jñātiḥ ikṣvākuḥ asmi iti. rāmaḥ tam abravīt.

English Translation

"O chief of men! Please tell me what assistance I can give you here. I am of your relative Ikṣvāku." Rāma told him.

०३ २६७ ०३६

शास्त्र - *śāstra*

मार्गमिच्छामि सैन्यस्य दत्तं नदनदीपते।
येन गत्वा दशग्रीवं हन्यां पौलस्त्यपांसनम्॥

mārgamicchāmi sainyasya dattaṃ nadanadīpate.
yena gatvā daśagrīvaṃ hanyāṃ paulastyapāṃsanam..

अन्वय - *anvaya*

मार्गम् इच्छामि सैन्यस्य। दत्तम् नदनदीपते येन गत्वा दशग्रीवम् हन्याम् पौलस्त्यपांसनम्।

mārgam icchāmi sainyasya. dattam nadanadīpate yena gatvā daśagrīvam hanyām paulastyapāṃsanam.

English Translation

"O lord of the rivers! I desire a way for army, having gone by which I shall kill the destroyer of the son of Pulastya, Daśagrīva."

०३ २६७ ०३७

शास्त्र - *śāstra*

यद्येवं याचतो मार्गं न प्रदास्यति मे भवान्।
शरैस्त्वां शोषयिष्यामि दिव्यास्त्रप्रतिमन्त्रितैः॥

yadyevaṃ yācato mārgaṃ na pradāsyati me bhavān.
śaraistvāṃ śoṣayiṣyāmi divyāstrapratimantritaiḥ..

अन्वय - *anvaya*

यदि एवम् याचतः मार्गम् न प्रदास्यति मे भवान् त्वाम् शोषयिष्यामि दिव्यास्त्रप्रतिमन्त्रितैः शरैः।

yadi evam yācataḥ mārgam na pradāsyati me bhavān tvām śoṣayiṣyāmi divyāstrapratimantritaiḥ śaraiḥ.

English Translation

"If the path is not granted in this way to me by you from praying, I will cause you to dry with a divine arrow consecrated by sacred texts."

०३ २६७ ०३८

शास्त्र - *śāstra*

इत्येवं ब्रुवतः श्रुत्वा रामस्य वरुणालयः।
उवाच व्यथितो वाक्यमिति बद्धाञ्जलिः स्थितः॥

ityevaṃ bruvataḥ śrutvā rāmasya varuṇālayaḥ.
uvāca vyathito vākyamiti baddhāñjaliḥ sthitaḥ..

अन्वय - *anvaya*

इति एवम् रामस्य ब्रुवतः श्रुत्वा वरुणालयः उवाच व्यथितः वाक्यम् इति बद्धाञ्जलिः स्थितः।

iti evam rāmasya bruvataḥ śrutvā varuṇālayaḥ uvāca vyathitaḥ vākyam iti baddhāñjaliḥ sthitaḥ.

English Translation

Thus, having heard the words of the talking Rāma, the agitated lord of the ocean said this while standing with joined palms of the hand.

०३ २६७ ०३९

शास्त्र - *śāstra*

नेच्छामि प्रतिघातं ते नास्मि विघ्नकरस्तव।
शृणु चेदं वचो राम श्रुत्वा कर्तव्यमाचर॥

necchāmi pratighātaṃ te nāsmi vighnakarastava.
śṛṇu cedaṃ vaco rāma śrutvā kartavyamācara..

अन्वय - *anvaya*

न इच्छामि प्रतिघातम् ते न अस्मि विघ्नकरः तव। शृणु च इदम् वचः राम श्रुत्वा कर्तव्यम् आचर।

na icchāmi pratighātam te na asmi vighnakaraḥ tava.
śṛṇu ca idam vacaḥ rāma śrutvā kartavyam ācara.

English Translation

“I do not desire your resistance and am not your obstacle. O Rāma! Listen to these words, and having heard them, perform your duty.”

०३ २६७ ०४०

शास्त्र - *śāstra*

यदि दास्यामि ते मार्गं सैन्यस्य व्रजतोऽऽज्ञया।
अन्येऽप्याज्ञापयिष्यन्ति मामेवं धनुषो बलात्॥

yadi dāsyāmi te mārgaṃ sainyasya vrajato”jñayā.
anye’pyājñāpayiṣyanti māmevaṃ dhanuṣo balāt..

अन्वय - *anvaya*

यदि दास्यामि ते मार्गम् सैन्यस्य व्रजतः आज्ञया अन्ये अपि आज्ञापयिष्यन्ति माम् एवम् धनुषः बलात्।

yadi dāsyāmi te mārgam sainyasya vrajataḥ ājñayā anye api ājñāpayiṣyanti mām evam dhanuṣaḥ balāt.

English Translation

“If I grant way to your moving army by command, then others will also order me in this way from the force of the arrow.”

०३ २६७ ०४१

शास्त्र - *śāstra*

अस्ति त्वत्र नलो नाम वानरः शिल्पिसंमतः।
त्वष्टुर्देवस्य तनयो बलवान्विश्वकर्मणः॥

asti tvatra nalo nāma vānaraḥ śilpisaṃmataḥ.
tvaṣṭurdevasya tanayo balavānviśvakarmaṇaḥ..

अन्वय - *anvaya*

अस्ति तु अत्र नलः नाम बलवान् वानरः शिल्पिसम्मतः त्वष्टुः विश्वकर्मणः देवस्य तनयः।

asti tu atra nalaḥ nāma balavān vānaraḥ śilpisammataḥ tvaṣṭuḥ viśvakarmaṇaḥ devasya tanayaḥ.

English Translation

“But, there is a mighty Vānara named Nala here who is a renowned artisan and son of the creator Lord Viśvakarman.”

०३ २६७ ०४२

शास्त्र - *śāstra*

स यत्काष्ठं तृणं वापि शिलां वा क्षेप्स्यते मयि।
सर्वं तद्धारयिष्यामि स ते सेतुर्भविष्यति॥

sa yatkāṣṭhaṃ tṛṇaṃ vāpi śilāṃ vā kṣepsyate mayi.
sarvaṃ taddhārayiṣyāmi sa te seturbhaviṣyati..

अन्वय - *anvaya*

सः यत् काष्ठम् तृणम् वा अपि शिलाम् वा क्षेप्स्यते मयि तद् सर्वम् धारयिष्यामि। सः ते सेतुः भविष्यति।

saḥ yat kāṣṭham tṛṇam vā api śilām vā kṣepsyate mayi
tad sarvam dhārayiṣyāmi. saḥ te setuḥ bhaviṣyati.

English Translation

“Whatever wood, grass, or even stone he will throw at me, I will hold all that. That will be your bridge.”

०३ २६७ ०४३

शास्त्र - *śāstra*

इत्युक्त्वान्तर्हिते तस्मिन्रामो नलमुवाच ह।
कुरु सेतुं समुद्रे त्वं शक्तो ह्यसि मतो मम॥

ityuktvāntarhite tasminrāmo nalamuvāca ha.
kuru setuṃ samudre tvaṃ śakto hyasi mato mama..

अन्वय - *anvaya*

इति उक्त्वा अन्तर्हिते तस्मिन् रामः नलम् उवाच ह। कुरु सेतुम् समुद्रे त्वम् शक्तः हि असि मतः मम।

iti uktvā antarhite tasmin rāmaḥ nalam uvāca ha. kuru setum samudre tvam śaktaḥ hi asi mataḥ mama.

English Translation

Thus, having spoken this way while he disappeared, Rāma said to Nala - "Build this bridge on the ocean. You are certainly capable, is my belief."

०३ २६७ ०४४

शास्त्र - *śāstra*

तेनोपायेन काकुत्स्थः सेतुबन्धमकारयत्।
दशयोजनविस्तारमायतं शतयोजनम्॥

tenopāyena kākutsthaḥ setubandhamakārayat.
daśayojanavistāramāyataṃ śatayojanam..

अन्वय - *anvaya*

तेन उपायेन काकुत्स्थः दशयोजनविस्तारम् आयतम् शतयोजनम् सेतुबन्धम् अकारयत्।

tena upāyena kākutsthaḥ daśayojanavistāram āyatam śatayojanam setubandham akārayat.

English Translation

The descendant of Kakustha caused the bridge with width of ten yojanas and length of hundred yojanas to be built by his craft.

०३ २६७ ०४५

शास्त्र - *śāstra*

नलसेतुरिति ख्यातो योऽद्यापि प्रथितो भुवि।
रामस्याज्ञां पुरस्कृत्य धार्यते गिरिसंनिभः॥

nalaseturiti khyāto yo'dyāpi prathito bhuvi.
rāmasyājñāṃ puraskṛtya dhāryate girisaṃnibhaḥ..

अन्वय - *anvaya*

नलसेतुः इति ख्यातः यः अद्य अपि प्रथितः भुवि रामस्य आज्ञाम् पुरस्कृत्य धार्यते गिरिसंनिभः।

nalasetuḥ iti khyātaḥ yaḥ adya api prathitaḥ bhuvi rāmasya ājñām puraskṛtya dhāryate girisaṃnibhaḥ.

English Translation

Named Nalasetu, resembling a mountain, which is celebrated even today, having honoured the command of Rāma, is borne on earth.

०३ २६७ ०४६

शास्त्र - *śāstra*

तत्रस्थं स तु धर्मात्मा समागच्छद्विभीषणः।
भ्राता वै राक्षसेन्द्रस्य चतुर्भिः सचिवैः सह॥

tatrasthaṃ sa tu dharmātmā samāgacchadvibhīṣaṇaḥ.
bhrātā vai rākṣasendrasya caturbhiḥ sacivaiḥ saha..

अन्वय - *anvaya*

तत्रस्थम् तु समागच्छत् सः धर्मात्मा विभीषणः भ्राता वै राक्षसेन्द्रस्य चतुर्भिः सचिवैः सह।

tatrastham tu samāgacchat saḥ dharmātmā vibhīṣaṇaḥ bhrātā vai rākṣasendrasya caturbhiḥ sacivaiḥ saha.

English Translation

The righteous Vibhīṣaṇa, the brother of the lord of demons, arrived with four ministers to the one present there.

०३ २६७ ०४७

शास्त्र - *śāstra*

प्रतिजग्राह रामस्तं स्वागतेन महामनाः।
सुग्रीवस्य तु शङ्काभूत्प्रणिधिः स्यादिति स्म ह॥

pratijagrāha rāmastaṃ svāgatena mahāmanāḥ.
sugrīvasya tu śaṅkābhūtpraṇidhiḥ syāditi sma ha..

अन्वय - *anvaya*

महामनाः रामः तम् स्वागतेन प्रतिजग्राह। सुग्रीवस्य तु शङ्का अभूत् प्रणिधिः स्यात् इति स्म ह।

mahāmanāḥ rāmaḥ tam svāgatena pratijagrāha.
sugrīvasya tu śaṅkā abhūt praṇidhiḥ syāt iti sma ha.

English Translation

The great-minded Rāma went towards him with a welcome. But there was indeed suspicion of Sugrīva that he shall be a spy.

०३ २६७ ०४८

शास्त्र - *śāstra*

राघवस्तस्य चेष्टाभिः सम्यक्च चरितेङ्गितैः।
यदा तत्त्वेन तुष्टोऽभूत्तत एनमपूजयत्॥

rāghavastasya ceṣṭābhiḥ samyakca cariteṅgitaiḥ.
yadā tattvena tuṣṭo'bhūttata enamapūjayat..

अन्वय - *anvaya*

यदा राघवः तस्य चेष्टाभिः सम्यक् च चरितेङ्गितैः तत्त्वेन तुष्टः अभूत् ततः एनम् अपूजयत्।

yadā rāghavaḥ tasya ceṣṭābhiḥ samyak ca cariteṅgitaiḥ tattvena tuṣṭaḥ abhūt tataḥ enam apūjayat.

English Translation

When Rāghava was completely satisfied with the reality of his behaviour, actions, and gestures, then he honoured him.

०३ २६७ ०४९

शास्त्र - *śāstra*

सर्वराक्षसराज्ये चाप्यभ्यषिञ्चद्विभीषणम्।
चक्रे च मन्त्रानुचरं सुहृदं लक्ष्मणस्य च॥

sarvarākṣasarājye cāpyabhyaṣiñcadvibhīṣaṇam.
cakre ca mantrānucaraṃ suhṛdaṃ lakṣmaṇasya ca..

अन्वय - *anvaya*

सर्वराक्षसराज्ये च अपि अभ्यषिञ्चत् विभीषणम् चक्रे च मन्त्रानुचरम् सुहृदम् लक्ष्मणस्य च।

sarvarākṣasarājye ca api abhyaṣiñcat vibhīṣaṇam cakre ca mantrānucaram suhṛdam lakṣmaṇasya ca.

English Translation

He also consecrated Vibhīṣaṇa over the kingdom of all the Rākṣasas, a consultant, and a friend of Lakṣmaṇa.

०३ २६७ ०५०

शास्त्र - *śāstra*

विभीषणमते चैव सोऽत्यक्रामन्महार्णवम्।
ससैन्यः सेतुना तेन मासेनैव नराधिप॥

vibhīṣaṇamate caiva so'tyakrāmanmahārṇavam.
sasainyaḥ setunā tena māsenaiva narādhipa..

अन्वय - *anvaya*

विभीषणमते च एव सः ससैन्यः अत्यक्रामन् महार्णवम् सेतुना तेन मासेन एव नराधिप।

vibhīṣaṇamate ca eva saḥ sasainyaḥ atyakrāman mahārṇavam setunā tena māsena eva narādhipa.

English Translation

O lord of men! And certainly, on the thoughts of Vibhīṣaṇa, he, along with the army, crossed the ocean by the bridge in a month only.

०३ २६७ ०५१

शास्त्र - *śāstra*

ततो गत्वा समासाद्य लङ्कोद्यानान्यनेकशः।
भेदयामास कपिभिर्महान्ति च बहूनि च॥

tato gatvā samāsādya laṅkodyānānyanekaśaḥ.
bhedayāmāsa kapibhirmahānti ca bahūni ca..

अन्वय - *anvaya*

ततः गत्वा समासाद्य लङ्कायाम् उद्यानानि अनेकशः भेदयामास कपिभिः महान्ति च बहूनि च।

tataḥ gatvā samāsādya laṅkāyām udyānāni anekaśaḥ bhedayāmāsa kapibhiḥ mahānti ca bahūni ca.

English Translation

Then, having gone and approached, the many great gardens of Laṅkā were destroyed by the monkeys.

०३ २६७ ०५२

शास्त्र - *śāstra*

तत्रास्तां रावणामात्यौ राक्षसौ शुकसारणौ।
चारौ वानररूपेण तौ जग्राह विभीषणः॥

tatrāstāṃ rāvaṇāmātyau rākṣasau śukasāraṇau.
cārau vānararūpeṇa tau jagrāha vibhīṣaṇaḥ..

अन्वय - *anvaya*

तत्र आस्ताम् रावणामात्यौ राक्षसौ शुकसारणौ चारौ वानररूपेण। तौ जग्राह विभीषणः।

tatra āstām rāvaṇāmātyau rākṣasau śukasāraṇau cārau vānararūpeṇa. tau jagrāha vibhīṣaṇaḥ.

English Translation

There were two ministers of Rāvaṇa, the demons Śuka and Sāraṇa, as spies in the form of monkeys. Vibhīṣaṇa caught them.

०३ २६७ ०५३

शास्त्र - *śāstra*

प्रतिपन्नौ यदा रूपं राक्षसं तौ निशाचरौ।
दर्शयित्वा ततः सैन्यं रामः पश्चादवासृजत्॥

pratipannau yadā rūpaṃ rākṣasaṃ tau niśācarau.
darśayitvā tataḥ sainyaṃ rāmaḥ paścādavāsṛjat..

अन्वय - *anvaya*

यदा तौ निशाचरौ रूपम् राक्षसम् प्रतिपन्नौ सैन्यम् दर्शयित्वा ततः रामः पश्चात् अवासृजत्।

yadā tau niśācarau rūpam rākṣasam pratipannau sainyam darśayitvā tataḥ rāmaḥ paścāt avāsṛjat.

English Translation

When those two demons got into their demonic form, later, Rāma showed the army and dismissed them.

०३ २६७ ०५४

शास्त्र - *śāstra*

निवेश्योपवने सैन्यं तच्छूरः प्राज्ञवानरम्।
प्रेषयामास दौत्येन रावणस्य ततोऽङ्गदम्॥

niveśyopavane sainyaṃ tacchūraḥ prājñavānaram.
preṣayāmāsa dautyena rāvaṇasya tato'ṅgadam..

अन्वय - *anvaya*

निवेश्य उपवने सैन्यम् ततः तद् शूरः प्रेषयामास दौत्येन रावणस्य अङ्गदम् प्राज्ञवानरम्।

niveśya upavane sainyam tataḥ tad śūraḥ preṣayāmāsa dautyena rāvaṇasya aṅgadam prājñavānaram.

English Translation

When the army entered the garden, then that warrior Rāma sent forth the intelligent monkey Aṅgada with a message of Rāvaṇa.

— १२ —

०३ २६८

असतो मा सद्गमय।
तमसो मा ज्योतिर्गमय।
मृत्योर्मामृतं गमय॥
ॐ शान्तिः शान्तिः शान्तिः॥

०३ २६८ ००१

शास्त्र - *śāstra*

मार्कण्डेय उवाच।
प्रभूतान्नोदके तस्मिन्बहुमूलफले वने।
सेनां निवेश्य काकुत्स्थो विधिवत्पर्यरक्षत॥

mārkaṇḍeya uvāca.
prabhūtānnodake tasminbahumūlaphale vane.
senāṃ niveśya kākutstho vidhivatparyarakṣata..

अन्वय - *anvaya*

यस्मिन् प्रभूतम् अन्नम् उदकम् च तस्मिन् बहुमूलफले वने सेनाम् निवेश्य काकुत्स्थः विधिवत् पर्यरक्षत।

yasmin prabhūtam annam udakam ca tasmin bahumūlaphale vane senām niveśya kākutsthaḥ vidhivat paryarakṣata.

English Translation

Mārkaṇḍeya said: When the army settled in the forest with lots of fruits and roots and filled with food and water, the descendant of Kakustha defended it dutifully.

०३ २६८ ००२

शास्त्र - *śāstra*

रावणश्च विधिं चक्रे लङ्कायां शास्त्रनिर्मितम्।
प्रकृत्यैव दुराधर्षा दृढप्राकारतोरणा॥

rāvaṇaśca vidhiṃ cakre laṅkāyāṃ śāstranirmitam.
prakṛtyaiva durādharṣā dṛḍhaprākāratoraṇā..

अन्वय - *anvaya*

रावणः च विधिम् चक्रे लङ्कायाम् शास्त्रनिर्मितम्। प्रकृत्या एव दुराधर्षा दृढप्राकारतोरणा।

rāvaṇaḥ ca vidhim cakre laṅkāyām śāstranirmitam.
prakṛtyā eva durādharṣā dṛḍhaprākāratoraṇā.

English Translation

Rāvaṇa established a rule according to the scriptures in Laṅkā. It was undoubtedly by nature invincible, having massive ramparts and arches.

०३ २६८ ००३

शास्त्र - *śāstra*

अगाधतोयाः परिखा मीननक्रसमाकुलाः।
बभूवुः सप्त दुर्धर्षाः खादिरैः शङ्कुभिश्चिताः॥

agādhatoyāḥ parikhā mīnanakrasamākulāḥ.
babhūvuḥ sapta durdharṣāḥ khādiraiḥ śaṅkubhiścitāḥ..

अन्वय - *anvaya*

अगाधतोयाः परिखाः मीननक्रसमाकुलाः बभूवुः सप्त दुर्धर्षाः खादिरैः शङ्कुभिः चिताः।

agādhatoyāḥ parikhāḥ mīnanakrasamākulāḥ babhūvuḥ sapta durdharṣāḥ khādiraiḥ śaṅkubhiḥ citāḥ.

English Translation

There were seven unconquerable deep trenches filled with water, with fishes and crocodiles covered by stakes of Khādira.

०३ २६८ ००४

शास्त्र - *śāstra*

कर्णाट्टयन्त्रदुर्धर्षा बभूवुः सहुडोपलाः।
साशीविषघटायोधाः ससर्जरसपांसवः॥

karṇāṭṭayantradurdharṣā babhūvuḥ sahuḍopalāḥ.
sāśīviṣaghaṭāyodhāḥ sasarjarasapāṃsavaḥ..

अन्वय - *anvaya*

कर्णाट्टियन्त्रदुर्धर्षाः सहुडोपलाः साशीविषघटायोधाः ससर्जरसपांसवः बभूवुः।

karṇāṭṭayantradurdharṣāḥ sahuḍopalāḥ
sāśīviṣaghaṭāyodhāḥ sasarjarasapāṃsavaḥ babhūvuḥ.

English Translation

They were ear watchtower machines that were difficult to attack, fighters with pots of venomous snakes, dust, and resin.

०३ २६८ ००५

शास्त्र - *śāstra*

मुसलालातनाराचतोमरासिपरश्वधैः।
अन्विताश्च शतघ्नीभिः समधूच्छिष्टमुद्गराः॥

musalālātanārācatomarāsiparaśvadhaiḥ.
anvitāśca śataghnībhiḥ samadhūcchiṣṭamudgarāḥ..

अन्वय - *anvaya*

मुसलालातनाराचतोमरासिपरश्वधैः अन्विताः च शतघ्नीभिः समधूच्छिष्टमुद्गराः।

musalālātanārācatomarāsiparaśvadhaiḥ anvitāḥ ca
śataghnībhiḥ samadhūcchiṣṭamudgarāḥ.

English Translation

They were with maces, firepower, arrows, spears, swords, and axes and possessing mallets with beeswax and deadly weapons.

०३ २६८ ००६

शास्त्र - *śāstra*

पुरद्वारेषु सर्वेषु गुल्माः स्थावरजङ्गमाः।
बभूवुः पत्तिबहुलाः प्रभूतगजवाजिनः॥

puradvāreṣu sarveṣu gulmāḥ sthāvarajaṅgamāḥ.
babhūvuḥ pattibahulāḥ prabhūtagajavājinaḥ..

अन्वय - *anvaya*

पुरद्वारेषु सर्वेषु गुल्माः स्थावरजङ्गमाः पत्तिबहुलाः प्रभूतगजवाजिनः बभूवुः।

puradvāreṣu sarveṣu gulmāḥ sthāvarajaṅgamāḥ pattibahulāḥ prabhūtagajavājinaḥ babhūvuḥ.

English Translation

There were large moving and stationary military on all the city gates, with abundant infantry, elephants, and horses.

०३ २६८ ००७

शास्त्र - *śāstra*

अङ्गदस्त्वथ लङ्काया द्वारदेशमुपागतः।
विदितो राक्षसेन्द्रस्य प्रविवेश गतव्यथः॥

aṅgadastvatha laṅkāyā dvāradeśamupāgataḥ.
vidito rākṣasendrasya praviveśa gatavyathaḥ..

अन्वय - *anvaya*

अथ लङ्कायाः द्वारदेशम् उपागतः गतव्यथः अङ्गदः तु विदितः राक्षसेन्द्रस्य प्रविवेश।

atha laṅkāyāḥ dvāradeśam upāgataḥ gatavyathaḥ aṅgadaḥ tu viditaḥ rākṣasendrasya praviveśa.

English Translation

But then, having reached the city door of Laṅkā, the fearless Aṅgada, having been known by the lord of the demons, entered there.

०३ २६८ ००८

शास्त्र - *śāstra*

मध्ये राक्षसकोटीनां बह्वीनां सुमहाबलः।
शुशुभे मेघमालाभिरादित्य इव संवृतः॥

madhye rākṣasakoṭīnāṃ bahvīnāṃ sumahābalaḥ.
śuśubhe meghamālābhirāditya iva saṃvṛtaḥ..

अन्वय - *anvaya*

मध्ये राक्षसकोटीनाम् बह्वीनाम् सुमहाबलः शुशुभे मेघमालाभिः आदित्यः इव संवृतः।

madhye rākṣasakoṭīnām bahvīnām sumahābalaḥ
śuśubhe meghamālābhiḥ ādityaḥ iva saṃvṛtaḥ.

English Translation

In the middle of many ten-millions of demons, the powerful one shined like a garland of clouds around the Sun.

०३ २६८ ००९

शास्त्र - *śāstra*

स समासाद्य पौलस्त्यममात्यैरभिसंवृतम्।
रामसंदेशमामन्त्र्य वाग्मी वक्तुं प्रचक्रमे॥

sa samāsādya paulastyamamātyairabhisaṃvṛtam.
rāmasaṃdeśamāmantrya vāgmī vaktuṃ pracakrame..

अन्वय - *anvaya*

समासाद्य पौलस्त्यम् अमात्यैः अभिसंवृतम् रामसंदेशम् आमन्त्र्य सः वाग्मी वक्तुम् प्रचक्रमे।

samāsādya paulastyam amātyaiḥ abhisaṃvṛtam rāmasaṃdeśam āmantrya saḥ vāgmī vaktum pracakrame.

English Translation

Having arrived near the son of Pulastya being surrounded by the ministers, the eloquent one stepped forward to tell the address of Rāma.

०३ २६८ ०१०

शास्त्र - *śāstra*

आह त्वां राघवो राजन्कोसलेन्द्रो महायशाः।
प्राप्तकालमिदं वाक्यं तदादत्स्व कुरुष्व च॥

āha tvāṃ rāghavo rājankosalendro mahāyaśāḥ.
prāptakālamidaṃ vākyaṃ tadādatsva kuruṣva ca..

अन्वय - *anvaya*

राजन् आह त्वाम् राघवः कोसलेन्द्रः महायशाः प्राप्तकालम् इदम् वाक्यम् तद् आदत्स्व कुरुष्व च।

rājan āha tvām rāghavaḥ kosalendraḥ mahāyaśāḥ prāptakālam idam vākyam tad ādatsva kuruṣva ca.

English Translation

“O King! The glorious lord of Kosala Rāghava tells you these timely words. Take it and do so!”

०३ २६८ ०११

शास्त्र - *śāstra*

अकृतात्मानमासाद्य राजानमनये रतम्।
विनश्यन्त्यनयाविष्टा देशाश्च नगराणि च॥

akṛtātmānamāsādya rājānamanaye ratam.
vinaśyantyanayāviṣṭā deśāśca nagarāṇi ca..

अन्वय - *anvaya*

अनयाविष्टा अकृतात्मानम् आसाद्य राजानम् अनये रतम् विनश्यन्ति देशाः च नगराणि च।

anayāviṣṭā akṛtātmānam āsādya rājānam anaye ratam vinaśyanti deśāḥ ca nagarāṇi ca.

English Translation

"Countries and cities are destroyed when they reach imperfection after a King is pleased with bad conduct."

०३ २६८ ०१२

शास्त्र - *śāstra*

त्वयैकेनापराद्धं मे सीतामाहरता बलात्।
वधायानपराद्धानामन्येषां तद्भविष्यति॥

tvayaikenāparāddhaṃ me sītāmāharatā balāt.
vadhāyānaparāddhānāmanyeṣāṃ tadbhaviṣyati..

अन्वय - *anvaya*

त्वया एकेन अपराद्धम् मे सीताम् आहरता बलात्। वधाय अनपराद्धानाम् अन्येषाम् तद् भविष्यति।

tvayā ekena aparāddham me sītām āharatā balāt.
vadhāya anaparāddhānām anyeṣām tad bhaviṣyati.

English Translation

"The offence for me is of taking away Sītā forcefully by you only. That will result in the slaying of others who have not offended."

०३ २६८ ०१३

शास्त्र - *śāstra*

ये त्वया बलदर्पाभ्यामाविष्टेन वनेचराः।
ऋषयो हिंसिताः पूर्वं देवाश्चाप्यवमानिताः॥

ye tvayā baladarpābhyāmāviṣṭena vanecarāḥ.
ṛṣayo hiṃsitāḥ pūrvaṃ devāścāpyavamānitāḥ..

अन्वय - *anvaya*

ये त्वया बलदर्पाभ्याम् आविष्टेन वनेचराः ऋषयः हिंसिताः पूर्वम् देवाः च अपि अवमानिताः।

ye tvayā baladarpābhyām āviṣṭena vanecarāḥ ṛṣayaḥ hiṃsitāḥ pūrvam devāḥ ca api avamānitāḥ.

English Translation

"Earlier, you have hurt saints living in the forest and even gods with your arrogance and strength."

०३ २६८ ०१४

शास्त्र - *śāstra*

राजर्षयश्च निहता रुदन्त्यश्चाहृताः स्त्रियः।
तदिदं समनुप्राप्तं फलं तस्यानयस्य ते॥

rājarṣayaśca nihatā rudantyaścāhṛtāḥ striyaḥ.
tadidaṃ samanuprāptaṃ phalaṃ tasyānayasya te..

अन्वय - *anvaya*

राजर्षयः च निहताः रुदन्त्यः च अहृताः स्त्रियः। तद् इदम् समनुप्राप्तम् फलम् तस्य अनयस्य ते।

rājarṣayaḥ ca nihatāḥ rudantyaḥ ca ahṛtāḥ striyaḥ.
tad idam samanuprāptam phalam tasya anayasya te.

English Translation

“The royal sages were slayed, and the weeping women were carried away. This result of your ill conduct has caught up.”

०३ २६८ ०१५

शास्त्र - *śāstra*

हन्तास्मि त्वां सहामात्यं युध्यस्व पुरुषो भव।
पश्य मे धनुषो वीर्यं मानुषस्य निशाचर॥

hantāsmi tvāṃ sahāmātyaṃ yudhyasva puruṣo bhava.
paśya me dhanuṣo vīryaṃ mānuṣasya niśācara..

अन्वय - *anvaya*

हन्तास्मि त्वाम् सह अमात्यम्। युध्यस्व। पुरुषः भव। पश्य मे धनुषः मानुषस्य वीर्यम् निशाचर।

hantāsmi tvām saha amātyam. yudhyasva. puruṣaḥ bhava. paśya me dhanuṣaḥ mānuṣasya vīryam niśācara.

English Translation

“O Niśācara! I will kill you with your ministers. Fight. Be a man. Watch the valour of my human bow.”

०३ २६८ ०१६

शास्त्र - *śāstra*

मुच्यतां जानकी सीता न मे मोक्ष्यसि कर्हिचित्।
अराक्षसमिमं लोकं कर्तास्मि निशितैः शरैः॥

mucyatāṃ jānakī sītā na me mokṣyasi karhicit.
arākṣasamimaṃ lokaṃ kartāsmi niśitaiḥ śaraiḥ..

अन्वय - *anvaya*

मुच्यताम् जानकी सीता। न मे मोक्ष्यसि कर्हिचित् अराक्षसम् इमम् लोकम् कर्तास्मि निशितैः शरैः।

mucyatām jānakī sītā. na me mokṣyasi karhicit arākṣasam imam lokam kartāsmi niśitaiḥ śaraiḥ.

English Translation

"Let Sītā be freed! If you do not release her to me at any time, I will make this world without Rākṣasas with sharp arrows."

०३ २६८ ०१७

शास्त्र - *śāstra*

इति तस्य ब्रुवाणस्य दूतस्य परुषं वचः।
श्रुत्वा न ममृषे राजा रावणः क्रोधमूर्छितः॥

iti tasya bruvāṇasya dūtasya paruṣaṃ vacaḥ.
śrutvā na mamṛṣe rājā rāvaṇaḥ krodhamūrchitaḥ..

अन्वय - *anvaya*

इति तस्य ब्रुवाणस्य दूतस्य परुषम् वचः श्रुत्वा न ममृषे राजा रावणः क्रोधमूर्छितः।

iti tasya bruvāṇasya dūtasya paruṣam vacaḥ śrutvā na mamṛṣe rājā rāvaṇaḥ krodhamūrchitaḥ.

English Translation

Having heard these harsh words of that speaking messenger, the enraged King Rāvaṇa did not tolerate it.

०३ २६८ ०१८

शास्त्र - *śāstra*

इङ्गितज्ञास्ततो भर्तुश्चत्वारो रजनीचराः।
चतुर्ष्वङ्गेषु जगृहुः शार्दूलमिव पक्षिणः॥

iṅgitajñāstato bhartuścatvāro rajanīcarāḥ.
caturṣvaṅgeṣu jagṛhuḥ śārdūlamiva pakṣiṇaḥ..

अन्वय - *anvaya*

इङ्गितज्ञाः ततः भर्तुः चत्वारः रजनीचराः चतुर्षु अङ्गेषु जगृहुः शार्दूलम् इव पक्षिणः।

iṅgitajñāḥ tataḥ bhartuḥ catvāraḥ rajanīcarāḥ caturṣu aṅgeṣu jagṛhuḥ śārdūlam iva pakṣiṇaḥ.

English Translation

Then, four demons, understanding the signs of the lord, grabbed on four limbs like birds of a tiger.

०३ २६८ ०१९

शास्त्र - *śāstra*

तांस्तथाङ्गेषु संसक्तानङ्गदो रजनीचरान्।
आदायैव खमुत्पत्य प्रासादतलमाविशत्॥

tāṃstathāṅgeṣu saṃsaktānaṅgado rajanīcarān.
ādāyaiva khamutpatya prāsādatalamāviśat..

अन्वय - *anvaya*

तान् तथा अङ्गेषु संसक्तान् रजनीचरान् आदाय एव खम् उत्पत्य अङ्गदः प्रासादतलम् आविशत्।

tān tathā aṅgeṣu saṃsaktān rajanīcarān ādāya eva kham utpatya aṅgadaḥ prāsādatalam āviśat.

English Translation

Then, sticking them on the limbs and taking the demons, Aṅgada leapt towards the Sun and entered the palace roof.

०३ २६८ ०२०

शास्त्र - *śāstra*

वेगेनोत्पततस्तस्य पेतुस्ते रजनीचराः।
भुवि संभिन्नहृदयाः प्रहारपरिपीडिताः॥

vegenotpatatastasya petuste rajanīcarāḥ.
bhuvi saṃbhinnahṛdayāḥ prahāraparipīḍitāḥ..

अन्वय - *anvaya*

वेगेन तस्य उत्पततः ते रजनीचराः सम्भिन्नहृदयाः प्रहारपरिपीडिताः भुवि पेतुः।

vegena tasya utpatataḥ te rajanīcarāḥ sambhinnahṛdayāḥ prahāraparipīḍitāḥ bhuvi petuḥ.

English Translation

When he rose quickly, those demons, whose hearts were entirely broken and tormented with strikes, fell on the ground.

०३ २६८ ०२१

शास्त्र - *śāstra*

स मुक्तो हर्म्यशिखरात्तस्मात्पुनरवापतत्।
लङ्घयित्वा पुरीं लङ्कां स्वबलस्य समीपतः॥

sa mukto harmyaśikharāttasmātpunaravāpatat.
laṅghayitvā purīṃ laṅkāṃ svabalasya samīpataḥ..

अन्वय - *anvaya*

सः मुक्तः तस्मात् हर्म्यशिखरात् लङ्घयित्वा पुरीम् लङ्काम् पुनरवापतत् स्वबलस्य समीपतः।

saḥ muktaḥ tasmāt harmyaśikharāt laṅghayitvā purīm laṅkām punaravāpatat svabalasya samīpataḥ.

English Translation

He who was freed, having leapt over the city of Laṅkā from that top of the palace, again flew down in the presence of his army.

०३ २६८ ०२२

शास्त्र - *śāstra*

कोसलेन्द्रमथाभ्येत्य सर्वमावेद्य चाङ्गदः।
विशश्राम स तेजस्वी राघवेणाभिनन्दितः॥

kosalendramathābhyetya sarvamāvedya cāṅgadaḥ.
viśaśrāma sa tejasvī rāghaveṇābhinanditaḥ..

अन्वय - *anvaya*

कोसलेन्द्रम् अथ अभ्येत्य सर्वम् आवेद्य च सः तेजस्वी अङ्गदः विशश्राम राघवेण अभिनन्दितः।

kosalendram atha abhyetya sarvam āvedya ca saḥ tejasvī aṅgadaḥ viśaśrāma rāghaveṇa abhinanditaḥ.

English Translation

Thus, having approached the King of Kosala and made him known everything, that brilliant Aṅgada, being applauded by Rāghava, rested.

०३ २६८ ०२३

शास्त्र - *śāstra*

ततः सर्वाभिसारेण हरीणां वातरंहसाम्।
भेदयामास लङ्कायाः प्राकारं रघुनन्दनः॥

tataḥ sarvābhisāreṇa harīṇāṃ vātaraṃhasām.
bhedayāmāsa laṅkāyāḥ prākāraṃ raghunandanaḥ..

अन्वय - *anvaya*

ततः सर्वाभिसारेण हरीणाम् वातरंहसाम् भेदयामास लङ्कायाः प्राकारम् रघुनन्दनः।

tataḥ sarvābhisāreṇa harīṇām vātaraṃhasām bhedayāmāsa laṅkāyāḥ prākāram raghunandanaḥ.

English Translation

Then, Rāma broke the wall of Laṅkā with a total assault of the fleet of monkeys as wind.

०३ २६८ ०२४

शास्त्र - *śāstra*

विभीषणर्क्षाधिपती पुरस्कृत्याथ लक्ष्मणः।
दक्षिणं नगरद्वारमवामृद्नाद्दुरासदम्॥

vibhīṣaṇarkṣādhipatī puraskṛtyātha lakṣmaṇaḥ.
dakṣiṇaṃ nagaradvāramavāmṛdnāddurāsadam..

अन्वय - *anvaya*

विभीषणर्क्षाधिपती पुरस्कृत्य अथ लक्ष्मणः अवामृद्नात् दक्षिणम् नगरद्वारम् दुरासदम्।

vibhīṣaṇarkṣādhipatī puraskṛtya atha lakṣmaṇaḥ avāmṛdnāt dakṣiṇam nagaradvāram durāsadam.

English Translation

Having placed Vibhīṣaṇa and Jāmbavat in front, Lakṣmaṇa crushed down the difficult-to-attack southern gate of the city.

०३ २६८ ०२५

शास्त्र - *śāstra*

करभारुणगात्राणां हरीणां युद्धशालिनाम्।
कोटीशतसहस्रेण लङ्कामभ्यपतत्तदा॥

karabhāruṇagātrāṇāṃ harīṇāṃ yuddhaśālinām.
koṭīśatasahasreṇa laṅkāmabhyapatattadā..

अन्वय - *anvaya*

करभारुणगात्राणाम् हरीणाम् युद्धशालिनाम् कोटीशतसहस्रेण लङ्काम् अभ्यपतत् तदा।

karabhāruṇagātrāṇām harīṇām yuddhaśālinām koṭīśatasahasreṇa laṅkām abhyapatat tadā.

English Translation

Then he, whose limbs were reddish and like the trunk of an elephant and who was distinguished in battle, fell upon Laṅkā with a billion monkeys.

०३ २६८ ०२६

शास्त्र - *śāstra*

उत्पतद्भिः पतद्भिश्च निपतद्भिश्च वानरैः।
नादृश्यत तदा सूर्यो रजसा नाशितप्रभः॥

utpatadbhiḥ patadbhiśca nipatadbhiśca vānaraiḥ.
nādṛśyata tadā sūryo rajasā nāśitaprabhaḥ..

अन्वय - *anvaya*

उत्पतद्भिः पतद्भिः च निपतद्भिः च वानरैः न अदृश्यत तदा सूर्यः रजसा नाशितप्रभः।

utpatadbhiḥ patadbhiḥ ca nipatadbhiḥ ca vānaraiḥ na adṛśyata tadā sūryaḥ rajasā nāśitaprabhaḥ.

English Translation

Then, the light of the Sun was not seen with dust by monkeys jumping up, jumping down, and jumping around.

०३ २६८ ०२७

शास्त्र - *śāstra*

शालिप्रसूनसदृशैः शिरीषकुसुमप्रभैः।
तरुणादित्यसदृशैः शरगौरैश्च वानरैः॥

śāliprasūnasadṛśaiḥ śirīṣakusumaprabhaiḥ.
taruṇādityasadṛśaiḥ śaragauraiśca vānaraiḥ..

अन्वय - *anvaya*

शालिप्रसूनसदृशैः शिरीषकुसुमप्रभैः तरुणादित्यसदृशैः शरगौरैः च वानरैः।

śāliprasūnasadṛśaiḥ śirīṣakusumaprabhaiḥ
taruṇādityasadṛśaiḥ śaragauraiḥ ca vānaraiḥ.

English Translation

White monkeys looked like a rice blossom, whose radiance was like Śirīṣa flowers and like a rising Sun.

०३ २६८ ०२८

शास्त्र - *śāstra*

प्राकारं ददृशुस्ते तु समन्तात्कपिलीकृतम्।
राक्षसा विस्मिता राजन्सस्त्रीवृद्धाः समन्ततः॥

prākāraṃ dadṛśuste tu samantātkapilīkṛtam.
rākṣasā vismitā rājansastrīvṛddhāḥ samantataḥ..

अन्वय - *anvaya*

कपिलीकृतम् प्राकारम् ददृशुः ते तु समन्तात् राक्षसाः विस्मिताः राजन् सस्त्रीवृद्धाः समन्ततः।

kapilīkṛtam prākāram dadṛśuḥ te tu samantāt
rākṣasāḥ vismitāḥ rājan sastrīvṛddhāḥ samantataḥ.

English Translation

O King! But the astonished Rākṣasas, along with the women and elders everywhere, saw a wall made brown from all sides.

०३ २६८ ०२९

शास्त्र - *śāstra*

बिभिदुस्ते मणिस्तम्भान्कर्णाट्टशिखराणि च।
भग्नोन्मथितवेगानि यन्त्राणि च विचिक्षिपुः॥

bibhiduste maṇistambhānkarṇāṭṭaśikharāṇi ca.
bhagnonmathitavegāni yantrāṇi ca vicikṣipuḥ..

अन्वय - *anvaya*

ते मणिस्तम्भान् कर्णाट्टशिखराणि च भग्नोन्मथितवेगानि यन्त्राणि बिभिदुः विचिक्षिपुः च।

te maṇistambhān karṇāṭṭaśikharāṇi ca bhagnonmathitavegāni yantrāṇi bibhiduḥ vicikṣipuḥ ca.

English Translation

They broke the crystal posts and tops of ear watchtowers and destroyed and split the machines and their speed.

०३ २६८ ०३०

शास्त्र - *śāstra*

परिगृह्य शतघ्नीश्च सचक्राः सहुडोपलाः।
चिक्षिपुर्भुजवेगेन लङ्कामध्ये महाबलाः॥

parigṛhya śataghnīśca sacakrāḥ sahuḍopalāḥ.
cikṣipurbhujavegena laṅkāmadhye mahābalāḥ..

अन्वय - *anvaya*

महाबलाः च शतघ्नीः सचक्राः सहुडोपलाः परिगृह्य चिक्षिपुः भुजवेगेन लङ्कामध्ये।

mahābalāḥ ca śataghnīḥ sacakrāḥ sahuḍopalāḥ parigṛhya cikṣipuḥ bhujavegena laṅkāmadhye.

English Translation

The valorous hundred-slaying missiles with Cakras, rams, and rocks were grabbed and thrown with the force of hands in the middle of Laṅkā.

०३ २६८ ०३१

शास्त्र - *śāstra*

प्राकारस्थाश्च ये केचिन्निशाचरगणास्तदा।
प्रदुद्रुवुस्ते शतशः कपिभिः समभिद्रुताः॥

prākārasthāśca ye kecinniśācaragaṇāstadā.
pradudruvuste śataśaḥ kapibhiḥ samabhidrutāḥ..

अन्वय - *anvaya*

तदा च ये केचित् प्राकारस्थाः निशाचरगणाः प्रदुद्रुवुः ते शतशः कपिभिः समभिद्रुताः।

tadā ca ye kecit prākārasthāḥ niśācaragaṇāḥ pradudruvuḥ te śataśaḥ kapibhiḥ samabhidrutāḥ.

English Translation

And then those demons standing on the walls were run forth by those hundreds of attacking monkeys.

०३ २६८ ०३२

शास्त्र - *śāstra*

ततस्तु राजवचनाद्राक्षसाः कामरूपिणः।
निर्ययुर्विकृताकाराः सहस्रशतसंघशः॥

tatastu rājavacanādrākṣasāḥ kāmarūpiṇaḥ.
niryayurvikṛtākārāḥ sahasraśatasaṃghaśaḥ..

अन्वय - *anvaya*

ततः तु राजवचनात् राक्षसाः कामरूपिणः विकृताकाराः सहस्रशतसंघशः निर्ययुः।

tataḥ tu rājavacanāt rākṣasāḥ kāmarūpiṇaḥ vikṛtākārāḥ sahasraśatasaṃghaśaḥ niryayuḥ.

English Translation

But then, from the lord's command, the demons who could assume form as per desire came out disfigured collectively.

०३ २६८ ०३३

शास्त्र - *śāstra*

शस्त्रवर्षाणि वर्षन्तो द्रावयन्तो वनौकसः।
प्राकारं शोधयन्तस्ते परं विक्रममास्थिताः॥

śastravarṣāṇi varṣanto drāvayanto vanaukasaḥ.
prākāraṃ śodhayantaste paraṃ vikramamāsthitāḥ..

अन्वय - *anvaya*

शस्त्रवर्षाणि वर्षन्तः द्रावयन्तः वनौकसः प्राकारम् शोधयन्तः ते परम् विक्रमम् आस्थिताः।

śastravarṣāṇi varṣantaḥ drāvayantaḥ vanaukasaḥ prākāram śodhayantaḥ te param vikramam āsthitāḥ.

English Translation

They were raining showers of weapons, driving away the forest dwellers, clearing the walls, and resorting to supreme valour.

०३ २६८ ०३४

शास्त्र - *śāstra*

स माषराशिसदृशैर्बभूव क्षणदाचरैः।
कृतो निर्वानरो भूयः प्राकारो भीमदर्शनैः॥

sa māṣarāśisadṛśairbabhūva kṣaṇadācaraiḥ.
kṛto nirvānaro bhūyaḥ prākāro bhīmadarśanaiḥ..

अन्वय - *anvaya*

सः प्राकारः माषराशिसदृशैः भीमदर्शनैः क्षणदाचरैः बभूव कृतः निर्वानरः भूयः।

saḥ prākāraḥ māṣarāśisadṛśaiḥ bhīmadarśanaiḥ kṣaṇadācaraiḥ babhūva kṛtaḥ nirvānaraḥ bhūyaḥ.

English Translation

That wall was again made free from monkeys by frightful-looking looking like heaps of bean demons.

०३ २६८ ०३५

शास्त्र - *śāstra*

पेतुः शूलविभिन्नाङ्गा बहवो वानरर्षभाः।
स्तम्भतोरणभग्नाश्च पेतुस्तत्र निशाचराः॥

petuḥ śūlavibhinnāṅgā bahavo vānararṣabhāḥ.
stambhatoraṇabhagnāśca petustatra niśācarāḥ..

अन्वय - *anvaya*

पेतुः शूलविभिन्नाङ्गाः बहवः वानरर्षभाः। स्तम्भतोरणभग्नाः च पेतुः तत्र निशाचराः।

petuḥ śūlavibhinnāṅgāḥ bahavaḥ vānararṣabhāḥ.
stambhatoraṇabhagnāḥ ca petuḥ tatra niśācarāḥ.

English Translation

Many monkeys fell, having their bodies split by spears, and the demons fell, having been shattered by pillars and arches.

०३ २६८ ०३६

शास्त्र - *śāstra*

केशाकेश्यभवद्युद्धं रक्षसां वानरैः सह।
नखैर्दन्तैश्च वीराणां खादतां वै परस्परम्॥

keśākeśyabhavadyuddhaṃ rakṣasāṃ vānaraiḥ saha.
nakhairdantaiśca vīrāṇāṃ khādatāṃ vai parasparam..

अन्वय - *anvaya*

केशाकेशि अभवत् युद्धम् रक्षसाम् वानरैः सह। नखैः दन्तैः च वीराणाम् खादताम् वै परस्परम्।

keśākeśi abhavat yuddham rakṣasām vānaraiḥ saha.
nakhaiḥ dantaiḥ ca vīrāṇām khādatām vai parasparam.

English Translation

The battle of Rākṣasas with Vānaras was hair-to-hair, and the warriors were mutually biting with nails and teeth.

०३ २६८ ०३७

शास्त्र - *śāstra*

निष्टनन्तो ह्युभयतस्तत्र वानरराक्षसाः।
हता निपतिता भूमौ न मुञ्चन्ति परस्परम्॥

niṣṭananto hyubhayatastatra vānararākṣasāḥ.
hatā nipatitā bhūmau na muñcanti parasparam..

अन्वय - *anvaya*

निष्टनन्तः हि उभयतः तत्र वानरराक्षसाः। हताः निपतिताः भूमौ न मुञ्चन्ति परस्परम्।

niṣṭanantaḥ hi ubhayataḥ tatra vānararākṣasāḥ.
hatāḥ nipatitāḥ bhūmau na muñcanti parasparam.

English Translation

There, the Vānaras and Rākṣasas on both sides were groaning. Slaying and falling on the ground, they did not free each other.

०३ २६८ ०३८

शास्त्र - *śāstra*

रामस्तु शरजालानि ववर्ष जलदो यथा।
तानि लङ्कां समासाद्य जघ्नुस्तान्रजनीचरान्॥

rāmastu śarajālāni vavarṣa jalado yathā.
tāni laṅkāṃ samāsādya jaghnustānrajanīcarān..

अन्वय - *anvaya*

रामः तु शरजालानि ववर्ष जलदः यथा। तानि लङ्काम् समासाद्य जघ्नुः तान् रजनीचरान्।

rāmaḥ tu śarajālāni vavarṣa jaladaḥ yathā. tāni laṅkām samāsādya jaghnuḥ tān rajanīcarān.

English Translation

But Rāma rained a multitude of arrows like a cloud. Having reached Laṅkā, they killed those demons.

०३ २६८ ०३९

शास्त्र - *śāstra*

सौमित्रिरपि नाराचैर्दृढधन्वा जितक्लमः।
आदिश्यादिश्य दुर्गस्थान्पातयामास राक्षसान्॥

saumitrirapi nārācairdṛḍhadhanvā jitaklamaḥ.
ādiśyādiśya durgasthānpātayāmāsa rākṣasān..

अन्वय - *anvaya*

सौमित्रिः अपि नाराचैः दृढधन्वा जितक्लमः आदिश्य आदिश्य दुर्गस्थान् राक्षसान् पातयामास।

saumitriḥ api nārācaiḥ dṛḍhadhanvā jitaklamaḥ ādiśya ādiśya durgasthān rākṣasān pātayāmāsa.

English Translation

Also, the son of Sumitrā, the one with a strong bow and having won over his fatigue, repeatedly aimed at the demons situated under challenging positions and killed them.

०३ २६८ ०४०

शास्त्र - *śāstra*

ततः प्रत्यवहारोऽभूत्सैन्यानां राघवाज्ञया।
कृते विमर्दे लङ्कायां लब्धलक्षो जयोत्तरः॥

tataḥ pratyavahāro'bhūtsainyānāṃ rāghavājñayā.
kṛte vimarde laṅkāyāṃ labdhalakṣo jayottaraḥ..

अन्वय - *anvaya*

ततः प्रत्यवहारः अभूत् सैन्यानाम् राघवाज्ञया कृते विमर्दे लङ्कायाम् लब्धलक्षः जयोत्तरः।

tataḥ pratyavahāraḥ abhūt sainyānām rāghavājñayā kṛte vimarde laṅkāyām labdhalakṣaḥ jayottaraḥ.

English Translation

Then, there was a retreat of the armies by the command of Rāghava, having obtained a crushing victory on Laṅka.

— १३ —

०३ २६९

असतो मा सद्गमय।
तमसो मा ज्योतिर्गमय।
मृत्योर्मामृतं गमय॥
ॐ शान्तिः शान्तिः शान्तिः॥

०३ २६९ ००१

शास्त्र - *śāstra*

मार्कण्डेय उवाच।
ततो निविशमानांस्तान्सैनिकान्रावणानुगाः।
अभिजग्मुर्गणानेके पिशाचक्षुद्ररक्षसाम्॥

mārkaṇḍeya uvāca.
tato niviśamānāṃstānsainikānrāvaṇānugāḥ.
abhijagmurgaṇāneke piśācakṣudrarakṣasām..

अन्वय - *anvaya*

ततः निविशमानान् तान् सैनिकान् रावणानुगाः अभिजग्मुः गणे अनेके पिशाचक्षुद्ररक्षसाम्।

tataḥ niviśamānān tān sainikān rāvaṇānugāḥ abhijagmuḥ gaṇe aneke piśācakṣudrarakṣasām.

English Translation

Mārkaṇḍeya said: Then, many groups of Piśācas and demons who were followers of Rāvaṇa approached those resting soldiers.

०३ २६९ ००२

शास्त्र - *śāstra*

पर्वणः पूतनो जम्भः खरः क्रोधवशो हरिः।
प्ररुजश्चारुजश्चैव प्रघसश्चैवमादयः॥

parvaṇaḥ pūtano jambhaḥ kharaḥ krodhavaśo hariḥ.
prarujaścārujaścaiva praghasaścaivamādayaḥ..

अन्वय - *anvaya*

पर्वणः पूतनः जम्भः खरः क्रोधवशः हरिः प्ररुजः च अरुजः च एव प्रघसः च एवमादयः।

parvaṇaḥ pūtanaḥ jambhaḥ kharaḥ krodhavaśaḥ hariḥ prarujaḥ ca arujaḥ ca eva praghasaḥ ca evamādayaḥ.

English Translation

Parvaṇa, Pūtana, Jambha, Khara, Krodhavaśa, Hari, Praruja, Aruja, Praghasa, and many others.

०३ २६९ ००३

शास्त्र - *śāstra*

ततोऽभिपततां तेषामदृश्यानां दुरात्मनाम्।
अन्तर्धानवधं तज्ज्ञश्चकार स विभीषणः॥

tato'bhipatatāṃ teṣāmadṛśyānāṃ durātmanām.
antardhānavadhaṃ tajjñaścakāra sa vibhīṣaṇaḥ..

अन्वय - *anvaya*

ततः अभिपतताम् तेषाम् अदृश्यानाम् दुरात्मनाम् अन्तर्धानवधम् चकार सः तज्ज्ञः विभीषणः।

tataḥ abhipatatām teṣām adṛśyānām durātmanām antardhānavadham cakāra saḥ tajjñaḥ vibhīṣaṇaḥ.

English Translation

Then, the knowing man Vibhīṣaṇa struck the invisibility of those evil, invisible, rushing ones.

०३ २६९ ००४

शास्त्र - *śāstra*

ते दृश्यमाना हरिभिर्बलिभिर्दूरपातिभिः।
निहताः सर्वशो राजन्महीं जग्मुर्गतासवः॥

te dṛśyamānā haribhirbalibhirdūrapātibhiḥ.
nihatāḥ sarvaśo rājanmahīṃ jagmurgatāsavaḥ..

अन्वय - *anvaya*

राजन् युधिष्ठिर ते दृश्यमानाः गतासवः सर्वशः हरिभिः बलिभिः दूरपातिभिः निहताः महीम् जग्मुः।

rājan yudhiṣṭhira te dṛśyamānāḥ gatāsavaḥ sarvaśaḥ haribhiḥ balibhiḥ dūrapātibhiḥ nihatāḥ mahīm jagmuḥ.

English Translation

O King! All those who were seen lifelessly went to the Earth, who the strong flying monkeys killed.

०३ २६९ ००५

शास्त्र - *śāstra*

अमृष्यमाणः सबलो रावणो निर्ययावथ।
व्यूह्य चौशनसं व्यूहं हरीन्सर्वानहारयत्॥

amṛṣyamāṇaḥ sabalo rāvaṇo niryayāvatha.
vyūhya cauśanasaṃ vyūhaṃ harīnsarvānahārayat..

अन्वय - *anvaya*

अथ अमृष्यमाणः सबलः रावणः निर्ययौ व्यूह्य च औशनसम् व्यूहम् हरीन् सर्वान् अहारयत्।

atha amṛṣyamāṇaḥ sabalaḥ rāvaṇaḥ niryayau vyūhya ca auśanasam vyūham harīn sarvān ahārayat.

English Translation

Thus, the intolerating Rāvaṇa, accompanied by his army, went out, having arranged the Auśanasa formation, and attacked all the monkeys.

०३ २६९ ००६

शास्त्र - *śāstra*

राघवस्त्वभिनिर्याय व्यूढानीकं दशाननम्।
बार्हस्पत्यं विधिं कृत्वा प्रत्यव्यूहन्निशाचरम्॥

rāghavastvabhiniryāya vyūḍhānīkaṃ daśānanam.
bārhaspatyaṃ vidhiṃ kṛtvā pratyavyūhanniśācaram..

अन्वय - *anvaya*

व्यूढानीकम् दशाननम् अभिनिर्याय बार्हस्पत्यम् विधिम् कृत्वा राघवः तु प्रत्यव्यूहन् निशाचरम्।

vyūḍhānīkam daśānanam abhiniryāya bārhaspatyam vidhim kṛtvā rāghavaḥ tu pratyavyūhan niśācaram.

English Translation

Having marched out against the arranged force of Daśānana and having observed the prescribed act of Bārhaspatya, Rāghava drew up his army the demon.

०३ २६९ ००७

शास्त्र - *śāstra*

समेत्य युयुधे तत्र ततो रामेण रावणः।
युयुधे लक्ष्मणश्चैव तथैवेन्द्रजिता सह॥

sametya yuyudhe tatra tato rāmeṇa rāvaṇaḥ.
yuyudhe lakṣmaṇaścaiva tathaivendrajitā saha..

अन्वय - *anvaya*

ततः रावणः समेत्य युयुधे तत्र रामेण। लक्ष्मणः युयुधे च एव तथा एव इन्द्रजिता सह।

tataḥ rāvaṇaḥ sametya yuyudhe tatra rāmeṇa.
lakṣmaṇaḥ yuyudhe ca eva tathā eva indrajitā saha.

English Translation

Then, having met there, Rāvaṇa fought with Rāma and certainly Lakṣmaṇa, likewise, fought with Indrajit.

०३ २६९ ००८

शास्त्र - *śāstra*

विरूपाक्षेण सुग्रीवस्तारेण च निखर्वटः।
तुण्डेन च नलस्तत्र पटुशः पनसेन च॥

virūpākṣeṇa sugrīvastāreṇa ca nikharvaṭaḥ.
tuṇḍena ca nalastatra paṭuśaḥ panasena ca..

अन्वय - *anvaya*

तत्र विरूपाक्षेण सुग्रीवः तारेण च निखर्वटः तुण्डेन च नलः पटुशः पनसेन च।

tatra virūpākṣeṇa sugrīvaḥ tāreṇa ca nikharvaṭaḥ tuṇḍena ca nalaḥ paṭuśaḥ panasena ca.

English Translation

There, Sugrīva fought with Virūpākṣa, Nikharvaṭa with Tāra, Nala with Tuṇḍa, and Paṭuśa with Panasa.

०३ २६९ ००९

शास्त्र - *śāstra*

विषह्यं यं हि यो मेने स स तेन समेयिवान्।
युयुधे युद्धवेलायां स्वबाहुबलमाश्रितः॥

viṣahyaṃ yaṃ hi yo mene sa sa tena sameyivān.
yuyudhe yuddhavelāyāṃ svabāhubalamāśritaḥ..

अन्वय - *anvaya*

यः यम् विषह्यम् मेने सः युद्धवेलायाम् स्वबाहुबलम् आश्रित्य तम् समेत्य युयुधे।

yaḥ yam viṣahyam mene saḥ yuddhavelāyām svabāhubalam āśritya tam sametya yuyudhe.

English Translation

They approached and fought those they believed were bearable during the battle, resorting to their strength.

०३ २६९ ०१०

शास्त्र - *śāstra*

स संप्रहारो ववृधे भीरूणां भयवर्धनः।
लोमसंहर्षणो घोरः पुरा देवासुरे यथा॥

sa saṃprahāro vavṛdhe bhīrūṇāṃ bhayavardhanaḥ.
lomasaṃharṣaṇo ghoraḥ purā devāsure yathā..

अन्वय - *anvaya*

सः सम्प्रहारः भीरूणाम् भयवर्धनः लोमसंहर्षणः घोरः पुरा देवासुरे यथा ववृधे।

saḥ samprahāraḥ bhīrūṇām bhayavardhanaḥ lomasaṃharṣaṇaḥ ghoraḥ purā devāsure yathā vavṛdhe.

English Translation

That terrific hair-bristling battle, increasing the fear of the fearful, was growing like the earlier Devas and Asuras.

०३ २६९ ०११

शास्त्र - *śāstra*

रावणो राममानर्छच्छक्तिशूलासिवृष्टिभिः।
निशितैरायसैस्तीक्ष्णै रावणं चापि राघवः॥

rāvaṇo rāmamānarchacchaktiśūlāsivṛṣṭibhiḥ.
niśitairāyasaistīkṣṇai rāvaṇaṃ cāpi rāghavaḥ..

अन्वय - *anvaya*

रावणः रामम् आर्च्छत् शक्तिशूलासिवृष्टिभिः। निशितैः आयसैः तीक्ष्णैः रावणम् च अपि राघवः।

rāvaṇaḥ rāmam ārcchat śaktiśūlāsivṛṣṭibhiḥ. niśitaiḥ āyasaiḥ tīkṣṇaiḥ rāvaṇam ca api rāghavaḥ.

English Translation

Rāvaṇa advanced towards Rāma with a shower of spears, darts, and swords. Rāma also did towards Rāvaṇa with sharp fiery irons.

०३ २६९ ०१२

शास्त्र - *śāstra*

तथैवेन्द्रजितं यत्तं लक्ष्मणो मर्मभेदिभिः।
इन्द्रजिच्चापि सौमित्रिं बिभेद बहुभिः शरैः॥

tathaivendrajitaṃ yattaṃ lakṣmaṇo marmabhedibhiḥ.
indrajiccāpi saumitriṃ bibheda bahubhiḥ śaraiḥ..

अन्वय - *anvaya*

तथा एव इन्द्रजितम् यत्तम् लक्ष्मणः मर्मभेदिभिः। इन्द्रजित् च अपि सौमित्रिम् बिभेद बहुभिः शरैः।

tathā eva indrajitam yattam lakṣmaṇaḥ marmabhedibhiḥ. indrajit ca api saumitrim bibheda bahubhiḥ śaraiḥ.

English Translation

Likewise, Lakṣmaṇa was engaged with Indrajit with arrows, and Indrajit also pierced the son of Sumitrā with lots of arrows.

०३ २६९ ०१३

शास्त्र - *śāstra*

विभीषणः प्रहस्तं च प्रहस्तश्च विभीषणम्।
खगपत्रैः शरैस्तीक्ष्णैरभ्यवर्षद्गतव्यथः॥

vibhīṣaṇaḥ prahastaṃ ca prahastaśca vibhīṣaṇam.
khagapatraiḥ śaraistīkṣṇairabhyavarṣadgatavyathaḥ..

अन्वय - *anvaya*

गतव्यथः विभीषणः प्रहस्तम् च प्रहस्तः च विभीषणम् खगपत्रैः शरैः तीक्ष्णैः अभ्यवर्षत्।

gatavyathaḥ vibhīṣaṇaḥ prahastam ca prahastaḥ ca vibhīṣaṇam khagapatraiḥ śaraiḥ tīkṣṇaiḥ abhyavarṣat.

English Translation

The unanxious Vibhīṣaṇa covered Prahasta with a shower of sharp arrows endowed with bird's feathers and Prahasta against Vibhīṣaṇa.

०३ २६९ ०१४

शास्त्र - *śāstra*

तेषां बलवतामासीन्महास्त्राणां समागमः।
विव्यथुः सकला येन त्रयो लोकाश्चराचराः॥

teṣāṃ balavatāmāsīnmahāstrāṇāṃ samāgamaḥ.
vivyathuḥ sakalā yena trayo lokāścarācarāḥ..

अन्वय - *anvaya*

तेषाम् बलवताम् महास्त्राणाम् समागमः आसीत् येन सकलाः त्रयः लोकाः चराचराः विव्यथुः।

teṣām balavatām mahāstrāṇām samāgamaḥ āsīt yena sakalāḥ trayaḥ lokāḥ carācarāḥ vivyathuḥ.

English Translation

There was an encounter of those powerful great bows by which all moving and

unmoving things of the three worlds trembled.

— १४ —

०३ २७०

असतो मा सद्गमय।
तमसो मा ज्योतिर्गमय।
मृत्योर्मामृतं गमय॥
ॐ शान्तिः शान्तिः शान्तिः॥

०३ २७० ००१

शास्त्र - *śāstra*

मार्कण्डेय उवाच।
ततः प्रहस्तः सहसा समभ्येत्य विभीषणम्।
गदया ताडयामास विनद्य रणकर्कशः॥

mārkaṇḍeya uvāca.
tataḥ prahastaḥ sahasā samabhyetya vibhīṣaṇam.
gadayā tāḍayāmāsa vinadya raṇakarkaśaḥ..

अन्वय - *anvaya*

ततः विभीषणम् समभ्येत्य विनद्य रणकर्कशः प्रहस्तः सहसा गदया ताडयामास।

tataḥ vibhīṣaṇam samabhyetya vinadya raṇakarkaśaḥ prahastaḥ sahasā gadayā tāḍayāmāsa.

English Translation

Mārkaṇḍeya said: Then, having approached and screamed at Vibhīṣaṇa, Prahasta, the one firm in battle, hit forcefully with a mace.

०३ २७० ००२

शास्त्र - *śāstra*

स तयाभिहतो धीमान्गदया भीमवेगया।
नाकम्पत महाबाहुर्हिमवानिव सुस्थिरः॥

sa tayābhihato dhīmāngadayā bhīmavegayā.
nākampata mahābāhurhimavāniva susthiraḥ..

अन्वय - *anvaya*

सः धीमान् तया गदया भीमवेगया अभिहतः। महाबाहुः हिमवान् इव सुस्थिरः न अकम्पत।

saḥ dhīmān tayā gadayā bhīmavegayā abhihataḥ. mahābāhuḥ himavān iva susthiraḥ na akampata.

English Translation

That fearful, speedy mace struck the intelligent one. The long-armed one did not shake like the very firm Himālaya.

०३ २७० ००३

शास्त्र - *śāstra*

ततः प्रगृह्य विपुलां शतघण्टां विभीषणः।
अभिमन्त्र्य महाशक्तिं चिक्षेपास्य शिरः प्रति॥

tataḥ pragṛhya vipulāṃ śataghaṇṭāṃ vibhīṣaṇaḥ.
abhimantrya mahāśaktiṃ cikṣepāsya śiraḥ prati..

अन्वय - *anvaya*

ततः विपुलाम् शतघण्टाम् प्रगृह्य महाशक्तिम् अभिमन्त्र्य विभीषणः चिक्षेप अस्य शिरः प्रति।

tataḥ vipulām śataghaṇṭām pragṛhya mahāśaktim abhimantrya vibhīṣaṇaḥ cikṣepa asya śiraḥ prati.

English Translation

Then, having taken the large spear Śataghaṇṭa and consecrated it with a mantra, Vibhīṣaṇa threw it towards his head.

०३ २७० ००४

शास्त्र - *śāstra*

पतन्त्या स तया वेगाद्राक्षसोऽशनिनादया।
हृतोत्तमाङ्गो ददृशे वातरुग्ण इव द्रुमः॥

patantyā sa tayā vegādrākṣaso'śaninādayā.
hṛtottamāṅgo dadṛśe vātarugṇa iva drumaḥ..

अन्वय - *anvaya*

सः हृतोत्तमाङ्गः राक्षसः तया पतन्त्या अशनिनादया वेगात् ददृशे वातरुग्णः इव द्रुमः।

saḥ hṛtottamāṅgaḥ rākṣasaḥ tayā patantyā aśaninādayā vegāt dadṛśe vātarugṇaḥ iva drumaḥ.

English Translation

That demon, whose head was seized from the force of that falling thunderbolt, was seen like a tree broken by the wind.

०३ २७० ००५

शास्त्र - *śāstra*

तं दृष्ट्वा निहतं संख्ये प्रहस्तं क्षणदाचरम्।
अभिदुद्राव धूम्राक्षो वेगेन महता कपीन्॥

taṃ dṛṣṭvā nihataṃ saṃkhye prahastaṃ kṣaṇadācaram.
abhidudrāva dhūmrākṣo vegena mahatā kapīn..

अन्वय - *anvaya*

तम् निहतम् प्रहस्तम् क्षणदाचरम् संख्ये दृष्ट्वा धूम्राक्षः अभिदुद्राव वेगेन महता कपीन्।

tam nihatam prahastam kṣaṇadācaram saṃkhye dṛṣṭvā dhūmrākṣaḥ abhidudrāva vegena mahatā kapīn.

English Translation

Dhūmrākṣa ran swiftly toward the monkeys, seeing that fallen demon Prahasta in battle.

०३ २७० ००६

शास्त्र - *śāstra*

तस्य मेघोपमं सैन्यमापतद्भीमदर्शनम्।
दृष्ट्वैव सहसा दीर्णा रणे वानरपुंगवाः॥

tasya meghopamaṃ sainyamāpatadbhīmadarśanam.
dṛṣṭvaiva sahasā dīrṇā raṇe vānarapuṃgavāḥ..

अन्वय - *anvaya*

तस्य मेघोपमम् भीमदर्शनम् सैन्यम् आपतत्। तद् दृष्ट्वा एव सहसा दीर्णाः वानरपुंगवाः रणे।

tasya meghopamam bhīmadarśanam sainyam āpatat.
tad dṛṣṭvā eva sahasā dīrṇāḥ vānarapuṃgavāḥ raṇe.

English Translation

His frightful army fell like a cloud. Seeing that, the chiefs of monkeys were scattered intensely in the field.

०३ २७० ००७

शास्त्र - *śāstra*

ततस्तान्सहसा दीर्णान्दृष्ट्वा वानरपुंगवान्।
निर्याय कपिशार्दूलो हनूमान्पर्यवस्थितः॥

tatastānsahasā dīrṇāndṛṣṭvā vānarapuṃgavān.
niryāya kapiśārdūlo hanūmānparyavasthitaḥ..

अन्वय - *anvaya*

ततः तान् सहसा दीर्णान् वानरपुंगवान् दृष्ट्वा कपिशार्दूलः हनूमान् निर्याय पर्यवस्थितः।

tataḥ tān sahasā dīrṇān vānarapuṃgavān dṛṣṭvā
kapiśārdūlaḥ hanūmān niryāya paryavasthitaḥ.

English Translation

Thus, seeing those intensely scattered chiefs of monkeys, the tiger amongst monkeys, Hanūmat, came forth and stood.

०३ २७० ००८

शास्त्र - *śāstra*

तं दृष्ट्वावस्थितं संख्ये हरयः पवनात्मजम्।
वेगेन महता राजन्संन्यवर्तन्त सर्वशः॥

taṃ dṛṣṭvāvasthitaṃ saṃkhye harayaḥ pavanātmajam.
vegena mahatā rājansaṃnyavartanta sarvaśaḥ..

अन्वय - *anvaya*

राजन् युधिष्ठिर तम् पवनात्मजम् अवस्थितम् दृष्ट्वा संख्ये हरयः वेगेन महता संन्यवर्तन्त सर्वशः।

rājan yudhiṣṭhira tam pavanātmajam avasthitam dṛṣṭvā saṃkhye harayaḥ vegena mahatā saṃnyavartanta sarvaśaḥ.

English Translation

O King! All the monkeys in the battle returned with great speed, seeing the son of wind that was situated there.

०३ २७० ००९

शास्त्र - *śāstra*

ततः शब्दो महानासीत्तुमुलो लोमहर्षणः।
रामरावणसैन्यानामन्योन्यमभिधावताम्॥

tataḥ śabdo mahānāsīttumulo lomaharṣaṇaḥ.
rāmarāvaṇasainyānāmanyonyamabhidhāvatām..

अन्वय - *anvaya*

ततः शब्दः महान् तुमुलः लोमहर्षणः आसीत् रामरावणसैन्यानाम् अन्योन्यम् अभिधावताम्।

tataḥ śabdaḥ mahān tumulaḥ lomaharṣaṇaḥ āsīt rāmarāvaṇasainyānām anyonyam abhidhāvatām.

English Translation

Then, there was a loud, noisy, hair-bristling sound of the armies of Rāma and Rāvaṇa mutually running towards each other.

०३ २७० ०१०

शास्त्र - *śāstra*

तस्मिन्प्रवृत्ते संग्रामे घोरे रुधिरकर्दमे।
धूम्राक्षः कपिसैन्यं तद्द्रावयामास पत्त्रिभिः॥

tasminpravṛtte saṃgrāme ghore rudhirakardame.
dhūmrākṣaḥ kapisainyaṃ taddrāvayāmāsa patribhiḥ..

अन्वय - *anvaya*

तस्मिन् प्रवृत्ते संग्रामे घोरे रुधिरकर्दमे धूम्राक्षः कपिसैन्यम् तद् द्रावयामास पत्त्रिभिः।

tasmin pravṛtte saṃgrāme ghore rudhirakardame dhūmrākṣaḥ kapisainyam tad drāvayāmāsa pattribhiḥ.

English Translation

In that ongoing fierce battle on mud filled with blood, Dhūmrākṣa ran towards that army of monkeys with arrows.

०३ २७० ०११

शास्त्र - *śāstra*

तं राक्षसमहामात्रमापतन्तं सपत्नजित्।
तरसा प्रतिजग्राह हनूमान्पवनात्मजः॥

taṃ rākṣasamahāmātramāpatantaṃ sapatnajit.
tarasā pratijagrāha hanūmānpavanātmajaḥ..

अन्वय - *anvaya*

हनूमान् सपत्नजित् पवनात्मजः तम् राक्षसमहामात्रम् आपतन्तम् तरसा प्रतिजग्राह।

hanūmān sapatnajit pavanātmajaḥ tam rākṣasamahāmātram āpatantam tarasā pratijagrāha.

English Translation

Hanūmat, the conqueror of rivals and son of the wind, rapidly went towards that high-ranked flying Rākṣasa.

०३ २७० ०१२

शास्त्र - *śāstra*

तयोर्युद्धमभूद्घोरं हरिराक्षसवीरयोः।
जिगीषतोर्युधान्योन्यमिन्द्रप्रह्लादयोरिव॥

tayoryuddhamabhūdghoraṃ harirākṣasavīrayoḥ.
jigīṣatoryudhānyonyamindraprahlādayoriva..

अन्वय - *anvaya*

तयोः हरिराक्षसवीरयोः जिगीषतोः युधान्योन्यम् इन्द्रप्रह्लादयोः इव युद्धम् घोरम् अभूत्।

tayoḥ harirākṣasavīrayoḥ jigīṣatoḥ yudhānyonyam indraprahlādayoḥ iva yuddham ghoram abhūt.

English Translation

There was a terrific battle like Indra and Prahlāda of the two brave, the monkey and the demon, desirous of mutually conquering in battle.

०३ २७० ०१३

शास्त्र - *śāstra*

गदाभिः परिघैश्चैव राक्षसो जघ्निवान्कपिम्।
कपिश्च जघ्निवान्रक्षः सस्कन्धविटपैर्द्रुमैः॥

gadābhiḥ parighaiścaiva rākṣaso jaghnivānkapim.
kapiśca jaghnivānrakṣaḥ saskandhaviṭapairdrumaiḥ..

अन्वय - *anvaya*

गदाभिः परिघैः च एव राक्षसः जघ्निवान् कपिम्। कपिः च जघ्निवान् रक्षः सस्कन्धविटपैः द्रुमैः।

gadābhiḥ parighaiḥ ca eva rākṣasaḥ jaghnivān kapim.
kapiḥ ca jaghnivān rakṣaḥ saskandhaviṭapaiḥ drumaiḥ.

English Translation

The demon was striking the monkey intensely with iron maces, and the monkey was striking the demon intensely with trees, trunks, and branches.

०३ २७० ०१४

शास्त्र - *śāstra*

ततस्तमतिकायेन साश्वं सरथसारथिम्।
धूम्राक्षमवधीद्धीमान्हनूमान्मारुतात्मजः॥

tatastamatikāyena sāśvaṃ sarathasārathim.
dhūmrākṣamavadhīddhīmānhanūmānmārutātmajaḥ..

अन्वय - *anvaya*

ततः धीमान् हनूमान् मारुतात्मजः अतिकायेन अवधीत् तम् साश्वम् सरथसारथिम् धूम्राक्षम्।

tataḥ dhīmān hanūmān mārutātmajaḥ atikāyena avadhīt tam sāśvam sarathasārathim dhūmrākṣam.

English Translation

Then, the intelligent son of the wind killed Dhūmrākṣa and his charioteers and horses with his gigantic body.

०३ २७० ०१५

शास्त्र - *śāstra*

ततस्तं निहतं दृष्ट्वा धूम्राक्षं राक्षसोत्तमम्।
हरयो जातविस्रम्भा जघ्नुरभ्येत्य सैनिकान्॥

tatastaṃ nihataṃ dṛṣṭvā dhūmrākṣaṃ rākṣasottamam.
harayo jātavisrambhā jaghnurabhyetya sainikān..

अन्वय - *anvaya*

ततः तम् निहतम् धूम्राक्षम् राक्षसोत्तमम् दृष्ट्वा हरयः जातविश्रम्भाः जघ्नुः अभ्येत्य सैनिकान्।

tataḥ tam nihatam dhūmrākṣam rākṣasottamam dṛṣṭvā harayaḥ jātaviśrambhāḥ jaghnuḥ abhyetya sainikān.

English Translation

Thus, seeing the dead chief of demons Dhūmrākṣa, the monkeys whose confidence was born, approached and killed soldiers.

०३ २७० ०१६

शास्त्र - *śāstra*

ते वध्यमाना बलिभिर्हरिभिर्जितकाशिभिः।
राक्षसा भग्नसंकल्पा लङ्कामभ्यपतन्भयात्॥

te vadhyamānā balibhirharibhirjitakāśibhiḥ.
rākṣasā bhagnasaṃkalpā laṅkāmabhyapatanbhayāt..

अन्वय - *anvaya*

ते वध्यमानाः राक्षसाः भग्नसंकल्पाः बलिभिः हरिभिः जितकाशिभिः लङ्काम् अभ्यपतन् भयात्।

te vadhyamānāḥ rākṣasāḥ bhagnasaṃkalpāḥ balibhiḥ haribhiḥ jitakāśibhiḥ laṅkām abhyapatan bhayāt.

English Translation

Those demons, whose will was broken, who the strong conqueror monkeys defeated, rushed towards Laṅkā from fear.

०३ २७० ०१७

शास्त्र - *śāstra*

तेऽभिपत्य पुरं भग्ना हतशेषा निशाचराः।
सर्वं राज्ञे यथावृत्तं रावणाय न्यवेदयन्॥

te'bhipatya puraṃ bhagnā hataśeṣā niśācarāḥ.
sarvaṃ rājñe yathāvṛttaṃ rāvaṇāya nyavedayan..

अन्वय - *anvaya*

पुरम् अभिपत्य ते भग्नाः हतशेषाः निशाचराः सर्वम् यथावृत्तम् राज्ञे रावणाय न्यवेदयन्।

puram abhipatya te bhagnāḥ hataśeṣāḥ niśācarāḥ sarvam yathāvṛttam rājñe rāvaṇāya nyavedayan.

English Translation

Having rushed to the city, those surviving broken demons proclaimed everything as happened to King Rāvaṇa.

०३ २७० ०१८

शास्त्र - *śāstra*

श्रुत्वा तु रावणस्तेभ्यः प्रहस्तं निहतं युधि।
धूम्राक्षं च महेष्वासं ससैन्यं वानरर्षभैः॥

śrutvā tu rāvaṇastebhyaḥ prahastaṃ nihataṃ yudhi.
dhūmrākṣaṃ ca maheṣvāsaṃ sasainyaṃ vānarарṣabhaiḥ..

अन्वय - *anvaya*

श्रुतः तु रावणः तेभ्यः प्रहस्तम् निहतम् युधि धूम्राक्षम् च महेष्वासम् ससैन्यम् वानरर्षभैः।

śrutaḥ tu rāvaṇaḥ tebhyaḥ prahastam nihatam yudhi
dhūmrākṣam ca maheṣvāsam sasainyam vānarарṣabhaiḥ.

English Translation

But Rāvaṇa heard from them about the death of Prahasta and the great archer Dhūmrākṣa, along with the army in the battle by the chiefs among monkeys.

०३ २७० ०१९

शास्त्र - *śāstra*

सुदीर्घमिव निःश्वस्य समुत्पत्य वरासनात्।
उवाच कुम्भकर्णस्य कर्मकालोऽयमागतः॥

sudīrghamiva niḥśvasya samutpatya varāsanāt.
uvāca kumbhakarṇasya karmakālo'yamāgataḥ..

अन्वय - *anvaya*

सुदीर्घम् इव निःश्वस्य वरासनात् समुत्पत्य रावणः उवाच कुम्भकर्णस्य कर्मकालः अयम् आगतः इति।

sudīrgham iva niḥśvasya varāsanāt samutpatya rāvaṇaḥ uvāca kumbhakarṇasya karmakālaḥ ayam āgataḥ iti.

English Translation

Rāvaṇa sprung up from his throne, profoundly sighing, and said - "That proper time for the action of Kumbhakarṇa has come."

०३ २७० ०२०

शास्त्र - *śāstra*

इत्येवमुक्त्वा विविधैर्वादित्रैः सुमहास्वनैः।
शयानमतिनिद्रालुं कुम्भकर्णमबोधयत्॥

ityevamuktvā vividhairvāditraiḥ sumahāsvanaiḥ.
śayānamatinidrāluṃ kumbhakarṇamabodhayat..

अन्वय - *anvaya*

एवम् उक्त्वा सः विविधैः सुमहास्वनैः वादित्रैः शयानम् अतिनिद्रालुम् कुम्भकर्णम् अबोधयत्।

evam uktvā saḥ vividhaiḥ sumahāsvanaiḥ vāditraiḥ śayānam atinidrālum kumbhakarṇam abodhayat.

English Translation

Having said this, he woke up the resting and deeply sleeping Kumbhakarṇa with various very loud musical instruments.

०३ २७० ०२१

शास्त्र - *śāstra*

प्रबोध्य महता चैनं यत्नेनागतसाध्वसः।
स्वस्थमासीनमव्यग्रं विनिद्रं राक्षसाधिपः।
ततोऽब्रवीद्दशग्रीवः कुम्भकर्णं महाबलम्॥

prabodhya mahatā cainaṃ yatnenāgatasādhvasaḥ.
svasthamāsīnamavyagraṃ vinidraṃ rākṣasādhipaḥ.
tato'bravīddaśagrīvaḥ kumbhakarṇaṃ mahābalam..

अन्वय - *anvaya*

ततः च महता यत्नेन एनम् प्रबोध्य स्वस्थम् आसीनम् अव्यग्रम् विनिद्रम् महाबलम् कुम्भकर्णम् अब्रवीत् राक्षसाधिपः आगतसाध्वसः दशग्रीवः।

tataḥ ca mahatā yatnena enam prabodhya svastham āsīnam avyagram vinidram mahābalam kumbhakarṇam abravīt rākṣasādhipaḥ āgatasādhvasaḥ daśagrīvaḥ.

English Translation

And then, having woken him up, the terrified King of demons Daśagrīva said to the mighty awake, steady, healthy, seated Kumbhakarṇa.

०३ २७० ०२२

शास्त्र - *śāstra*

धन्योऽसि यस्य ते निद्रा कुम्भकर्णेयमीदृशी।
य इमं दारुणं कालं न जानीषे महाभयम्॥

dhanyo'si yasya te nidrā kumbhakarṇeyamīdṛśī.
ya imaṃ dāruṇaṃ kālaṃ na jānīṣe mahābhayam..

अन्वय - *anvaya*

कुम्भकर्ण यस्य ते निद्रा इयम् ईदृशी यः च इमम् दारुणम् कालम् महाभयम् न जानीषे सः त्वम् धन्यः असि।

kumbhakarṇa yasya te nidrā iyam īdṛśī yaḥ ca imam dāruṇam kālam mahābhayam na jānīṣe saḥ tvam dhanyaḥ asi.

English Translation

"O Kumbhakarṇa! You are fortunate whose sleep has such qualities, and you do not know this intensely dangerous time."

०३ २७० ०२३

शास्त्र - *śāstra*

एष तीर्त्वार्णवं रामः सेतुना हरिभिः सह।
अवमन्येह नः सर्वान्करोति कदनं महत्॥

eṣa tīrtvārṇavaṃ rāmaḥ setunā haribhiḥ saha.
avamanyeha naḥ sarvānkaroti kadanaṃ mahat..

अन्वय - *anvaya*

सेतुना अर्णवम् तीर्त्वा अवमन्य इह नः सर्वान् एषः रामः हरिभिः सह करोति महत् कदनम्।

setunā arṇavam tīrtvā avamanya iha naḥ sarvān eṣaḥ rāmaḥ haribhiḥ saha karoti mahat kadanam.

English Translation

"Having passed across the ocean by a bridge and despising all of us here, this Rāma with monkeys is doing great destruction."

०३ २७० ०२४

शास्त्र - *śāstra*

मया ह्यपहृता भार्या सीता नामास्य जानकी।
तां मोक्षयिषुरायातो बद्ध्वा सेतुं महार्णवे॥

mayā hyapahṛtā bhāryā sītā nāmāsya jānakī.
tāṃ mokṣayiṣurāyāto baddhvā setuṃ mahārṇave..

अन्वय - *anvaya*

मया हि अपहृता भार्या अस्य नाम जानकी सीता। सेतुम् महार्णवे बद्ध्वा ताम् मुमुक्षुः आयातः।

mayā hi apahṛtā bhāryā asya nāma jānakī sītā. setum mahārṇave baddhvā tām mumukṣuḥ āyātaḥ.

English Translation

"His wife, Sītā, the daughter of Janaka, was abducted by me indeed. Having built the bridge over the great ocean, he desirous of freeing her has come."

०३ २७० ०२५

शास्त्र - *śāstra*

तेन चैव प्रहस्तादिर्महान्नः स्वजनो हतः।
तस्य नान्यो निहन्तास्ति त्वदृते शत्रुकर्शन॥

tena caiva prahastādirmahānnaḥ svajano hataḥ.
tasya nānyo nihantāsti tvadṛte śatrukarśana..

अन्वय - *anvaya*

तेन च एव प्रहस्तादिः महान् नः स्वजनः हतः। तस्य न अन्यः निहन्ता अस्ति त्वत् ऋते शत्रुकर्शन।

tena ca eva prahastādiḥ mahān naḥ svajanaḥ hataḥ.
tasya na anyaḥ nihantā asti tvat ṛte śatrukarśana.

English Translation

"And certainly, by him, our great relative Prahasta and others were killed. O harasser of enemies! There is no other destroyer of him except you."

०३ २७० ०२६

शास्त्र - *śāstra*

स दंशितोऽभिनिर्याय त्वमद्य बलिनां वर।
रामादीन्समरे सर्वाञ्जहि शत्रूनरिंदम॥

sa daṃśito'bhiniryāya tvamadya balināṃ vara.
rāmādīnsamare sarvāñjahi śatrūnariṃdama..

अन्वय - *anvaya*

अरिंदम बलिनाम् वर अभिनिर्याय त्वम् दंशितः अद्य समरे सर्वान् रामादीन् शत्रून् जहि।

ariṃdama balināṃ vara abhiniryāya tvam daṃśitaḥ
adya samare sarvān rāmādīn śatrūn jahi.

English Translation

"O conqueror of enemies! O the best amongst mighty! Today, you march out and kill all Rāma and other enemies in battle, having armoured."

०३ २७० ०२७

शास्त्र - *śāstra*

दूषणावरजौ चैव वज्रवेगप्रमाथिनौ।
तौ त्वां बलेन महता सहितावनुयास्यतः॥

dūṣaṇāvarajau caiva vajravegapramāthinau.
tau tvāṃ balena mahatā sahitāvanuyāsyataḥ..

अन्वय - *anvaya*

वज्रवेगः प्रमाथी च इति दूषणस्य द्वौ आवरजौ। दूषणावरजौ च एव तौ वज्रवेगप्रमाथिनौ बलेन महता सहितौ त्वाम् अनुयास्यतः।

vajravegaḥ pramāthī ca iti dūṣaṇasya dvau āvarajau. dūṣaṇāvarajau ca eva tau vajravegapramāthinau balena mahatā sahitau tvām anuyāsyataḥ.

English Translation

"And indeed, those two younger brothers of Dūṣaṇa, Vajravega and Pramāthin, will follow you along with a great army."

०३ २७० ०२८

शास्त्र - *śāstra*

इत्युक्त्वा राक्षसपतिः कुम्भकर्णं तरस्विनम्।
संदिदेशेतिकर्तव्ये वज्रवेगप्रमाथिनौ॥

ityuktvā rākṣasapatiḥ kumbhakarṇaṃ tarasvinam.
saṃdideśetikartavye vajravegapramāthinau..

अन्वय - *anvaya*

इति कुम्भकर्णम् तरस्विनम् उक्त्वा राक्षसपतिः संदिदेश इतिकर्तव्ये वज्रवेगप्रमाथिनौ।

iti kumbhakarṇam tarasvinam uktvā rākṣasapatiḥ saṃdideśa itikartavye vajravegapramāthinau.

English Translation

Having spoken thus to energetic Kumbhakarṇa, the lord of demons appointed Vajravega and Pramāthin on duty.

०३ २७० ०२९

शास्त्र - *śāstra*

तथेत्युक्त्वा तु तौ वीरौ रावणं दूषणानुजौ।
कुम्भकर्णं पुरस्कृत्य तूर्णं निर्ययतुः पुरात्॥

tathetyuktvā tu tau vīrau rāvaṇaṃ dūṣaṇānujau.
kumbhakarṇaṃ puraskṛtya tūrṇaṃ niryayatuḥ purāt..

अन्वय - *anvaya*

तथा इति रावणम् उक्त्वा तु तौ वीरौ दूषणानुजौ कुम्भकर्णम् पुरस्कृत्य तूर्णम् निर्ययतुः पुरात्।

tathā iti rāvaṇam uktvā tu tau vīrau dūṣaṇānujau kumbhakarṇam puraskṛtya tūrṇam niryayatuḥ purāt.

English Translation

Having said - "So be it" to Rāvaṇa and honouring Kumbhakarṇa, the two warrior brothers of Dūṣaṇa went out from the city.

— १५ —

०३ २७१

असतो मा सद्गमय।
तमसो मा ज्योतिर्गमय।
मृत्योर्मामृतं गमय॥
ॐ शान्तिः शान्तिः शान्तिः॥

०३ २७१ ००१

शास्त्र - *śāstra*

मार्कण्डेय उवाच।
ततो विनिर्याय पुरात्कुम्भकर्णः सहानुगः।
अपश्यत्कपिसैन्यं तज्जितकाश्यग्रतः स्थितम्॥

mārkaṇḍeya uvāca.
tato viniryāya purātkumbhakarṇaḥ sahānugaḥ.
apaśyatkapisainyaṃ tajjitakāśyagrataḥ sthitam..

अन्वय - *anvaya*

ततः पुरात् विनिर्याय कुम्भकर्णः सहानुगः अपश्यत् तद् कपिसैन्यम् जितकाशि अग्रतः स्थितम्।

tataḥ purāt viniryāya kumbhakarṇaḥ sahānugaḥ apaśyat tad kapisainyam jitakāśi agrataḥ sthitam.

English Translation

Mārkaṇḍeya said: Then, having marched out from the city, Kumbhakarṇa and his companions saw that army of monkeys shining from conquering standing in front.

०३ २७१ ००२

शास्त्र - *śāstra*

तमभ्येत्याशु हरयः परिवार्य समन्ततः।
अभ्यघ्नंश्च महाकायैर्बहुभिर्जगतीरुहैः।
करजैरतुदंश्चान्ये विहाय भयमुत्तमम्॥

tamabhyetyāśu harayaḥ parivārya samantataḥ.
abhyaghnaṃśca mahākāyairbahubhirjagatīruhaiḥ.
karajairatudaṃścānye vihāya bhayamuttamam..

अन्वय - *anvaya*

तम् अभ्येत्य आशु परिवार्य समन्ततः अभ्यघ्नन् च हरयः महाकायैः बहुभिः जगतीरुहैः करजैः अतुदन् च अन्ये भयम् उत्तमम् विहाय।

tam abhyetya āśu parivārya samantataḥ abhyaghnan ca harayaḥ mahākāyaiḥ bahubhiḥ jagatīruhaiḥ karajaiḥ atudan ca anye bhayam uttamam vihāya.

English Translation

Having approached him and quickly surrounded from all sides, the monkeys struck with tall trees, and others bruised him with fingernails, getting rid of the greatest fears.

०३ २७१ ००३

शास्त्र - *śāstra*

बहुधा युध्यमानास्ते युद्धमार्गैः प्लवंगमाः।
नानाप्रहरणैर्भीमं राक्षसेन्द्रमताडयन्॥

bahudhā yudhyamānāste yuddhamārgaiḥ plavaṃgamāḥ.
nānāpraharaṇairbhīmaṃ rākṣasendramatāḍayan..

अन्वय - *anvaya*

बहुधा ते प्लवंगमाः युध्यमानाः युद्धमार्गैः नानाप्रहरणैः भीमम् राक्षसेन्द्रम् अताडयन्।

bahudhā te plavaṃgamāḥ yudhyamānāḥ yuddhamārgaiḥ nānāpraharaṇaiḥ bhīmam rākṣasendram atāḍayan.

English Translation

Those fighting monkeys struck the giant lord of demons with various war strategies and combats.

०३ २७१ ००४

शास्त्र - *śāstra*

स ताड्यमानः प्रहसन्भक्षयामास वानरान्।
पनसं च गवाक्षं च वज्रबाहुं च वानरम्॥

sa tāḍyamānaḥ prahasanbhakṣayāmāsa vānarān.
panasaṃ ca gavākṣaṃ ca vajrabāhuṃ ca vānaram..

अन्वय - *anvaya*

सः प्रहसन् ताड्यमानः भक्षयामास वानरान् पनसम् च गवाक्षम् च वज्रबाहुम् च वानरम्।

saḥ prahasan tāḍyamānaḥ bhakṣayāmāsa vānarān panasam ca gavākṣam ca vajrabāhum ca vānaram.

English Translation

That laughing demon being hit ate the monkeys Panasa, Gavākṣa, and Vajrabāhu.

०३ २७१ ००५

शास्त्र - *śāstra*

तद्दृष्ट्वा व्यथनं कर्म कुम्भकर्णस्य रक्षसः।
उदक्रोशन्परित्रस्तास्तारप्रभृतयस्तदा॥

taddṛṣṭvā vyathanaṃ karma kumbhakarṇasya rakṣasaḥ.
udakrośanparitrastāstāraprabhṛtayastadā..

अन्वय - *anvaya*

तद् व्यथनम् कर्म कुम्भकर्णस्य रक्षसः दृष्ट्वा परित्रस्ताः तारप्रभृतयः तदा उदक्रोशन्।

tad vyathanam karma kumbhakarṇasya rakṣasaḥ dṛṣṭvā paritrastāḥ tāraprabhṛtayaḥ tadā udakrośan.

English Translation

Seeing that deeply disturbing act of the demon Kumbhakarṇa, Tāra and other terrified monkeys cried out loudly.

०३ २७१ ००६

शास्त्र - *śāstra*

तं तारमुच्चैः क्रोशन्तमन्यांश्च हरियूथपान्।
अभिदुद्राव सुग्रीवः कुम्भकर्णमपेतभीः॥

taṃ tāramuccaiḥ krośantamanyāṃśca hariyūthapān.
abhidudrāva sugrīvaḥ kumbhakarṇamapetabhīḥ..

अन्वय - *anvaya*

सुग्रीवः अपेतभीः अभिदुद्राव तम् तारम् उच्चैः क्रोशन्तम् अन्यान् च हरियूथपान् कुम्भकर्णम्।

sugrīvaḥ apetabhīḥ abhidudrāva tam tāram uccaiḥ krośantam anyān ca hariyūthapān kumbhakarṇam.

English Translation

The fearless Sugrīva ran up towards the loudly crying Tāra, other monkeys, and Kumbhakarṇa.

०३ २७१ ००७

शास्त्र - *śāstra*

ततोऽभिपत्य वेगेन कुम्भकर्णं महामनाः।
शालेन जघ्निवान्मूर्ध्नि बलेन कपिकुञ्जरः॥

tato'bhipatya vegena kumbhakarṇaṃ mahāmanāḥ.
śālena jaghnivānmūrdhni balena kapikuñjaraḥ..

अन्वय - *anvaya*

ततः कुम्भकर्णम् वेगेन अभिपत्य महामनाः कपिकुञ्जरः जघ्निवान् शालेन मूर्ध्नि बलेन।

tataḥ kumbhakarṇam vegena abhipatya mahāmanāḥ kapikuñjaraḥ jaghnivān śālena mūrdhni balena.

English Translation

Then, flying towards Kumbhakarṇa with speed, the magnanimous eminent monkey forcefully hit him on the head with Śāla.

०३ २७१ ००८

शास्त्र - *śāstra*

स महात्मा महावेगः कुम्भकर्णस्य मूर्धनि।
बिभेद शालं सुग्रीवो न चैवाव्यथयत्कपिः॥

sa mahātmā mahāvegaḥ kumbhakarṇasya mūrdhani.
bibheda śālaṃ sugrīvo na caivāvyathayatkapiḥ..

अन्वय - *anvaya*

सः महात्मा महावेगः सुग्रीवः कुम्भकर्णस्य मूर्धनि शालम् बिभेद न च एव अव्यथयत् कपिः।

saḥ mahātmā mahāvegaḥ sugrīvaḥ kumbhakarṇasya mūrdhani śālam bibheda na ca eva avyathayat kapiḥ.

English Translation

That great speedy Sugrīva broke the Śāla on the head of Kumbhakarṇa, and the monkey did not even cause him to tremble.

०३ २७१ ००९

शास्त्र - *śāstra*

ततो विनद्य प्रहसञ्शालस्पर्शविबोधितः।
दोर्भ्यामादाय सुग्रीवं कुम्भकर्णोऽहरद्बलात्॥

tato vinadya prahasañśālasparśavibodhitaḥ.
dorbhyāmādāya sugrīvaṃ kumbhakarṇo'haradbalāt..

अन्वय - *anvaya*

ततः विनद्य दोर्भ्याम् आदाय प्रहसन् शालस्पर्शविबोधितः कुम्भकर्णः सुग्रीवम् अहरत् बलात्।

tataḥ vinadya dorbhyām ādāya prahasan śālasparśavibodhitaḥ kumbhakarṇaḥ sugrīvam aharat balāt.

English Translation

Then, having screamed at and grabbing him by his hands, the laughing Kumbhakarṇa, awakened by the touch of Śāla, captured Sugrīva forcefully.

०३ २७१ ०१०

शास्त्र - *śāstra*

ह्रियमाणं तु सुग्रीवं कुम्भकर्णेन रक्षसा।
अवेक्ष्याभ्यद्रवद्वीरः सौमित्रिर्मित्रनन्दनः॥

hriyamāṇaṃ tu sugrīvaṃ kumbhakarṇena rakṣasā.
avekṣyābhyadravadvīraḥ saumitrirmitranandanaḥ..

अन्वय - *anvaya*

ह्रियमाणम् तु सुग्रीवम् कुम्भकर्णेन रक्षसा अवेक्ष्य वीरः सौमित्रिः मित्रनन्दनः अभ्यद्रवत्।

hriyamāṇam tu sugrīvam kumbhakarṇena rakṣasā avekṣya vīraḥ saumitriḥ mitranandanaḥ abhyadravat.

English Translation

But having looked towards captured Sugrīva by the demon Kumbhakarṇa, the warrior son of Sumitrā and delighter of friends ran up to him.

०३ २७१ ०११

शास्त्र - *śāstra*

सोऽभिपत्य महावेगं रुक्मपुङ्खं महाशरम्।
प्राहिणोत्कुम्भकर्णाय लक्ष्मणः परवीरहा॥

so'bhipatya mahāvegaṃ rukmapuṅkhaṃ mahāśaram.
prāhiṇotkumbhakarṇāya lakṣmaṇaḥ paravīrahā..

अन्वय - *anvaya*

सः लक्ष्मणः परवीरहा महावेगम् रुक्मपुङ्खम् महाशरम् अभिपत्य प्राहिणोत् कुम्भकर्णाय।

saḥ lakṣmaṇaḥ paravīrahā mahāvegam rukmapuṅkham mahāśaram abhipatya prāhiṇot kumbhakarṇāya.

English Translation

The slayer of enemies Lakṣmaṇa flew towards Kumbhakarṇa and incited a powerful gold-shafted swift arrow.

०३ २७१ ०१२

शास्त्र - *śāstra*

स तस्य देहावरणं भित्त्वा देहं च सायकः।
जगाम दारयन्भूमिं रुधिरेण समुक्षितः॥

sa tasya dehāvaraṇaṃ bhittvā dehaṃ ca sāyakaḥ.
jagāma dārayanbhūmiṃ rudhireṇa samukṣitaḥ..

अन्वय - *anvaya*

तस्य देहावरणम् देहम् च भित्त्वा सः दारयन् सायकः जगाम भूमिम् रुधिरेण समुक्षितः।

tasya dehāvaraṇam deham ca bhittvā saḥ dārayan sāyakaḥ jagāma bhūmim rudhireṇa samukṣitaḥ.

English Translation

Having pierced his armour and body, that bursting arrow went to the ground sprinkled with blood.

०३ २७१ ०१३

शास्त्र - *śāstra*

तथा स भिन्नहृदयः समुत्सृज्य कपीश्वरम्।
कुम्भकर्णो महेष्वासः प्रगृहीतशिलायुधः।
अभिदुद्राव सौमित्रिमुद्यम्य महतीं शिलाम्॥

tathā sa bhinnahṛdayaḥ samutsṛjya kapīśvaram.
kumbhakarṇo maheṣvāsaḥ pragṛhītaśilāyudhaḥ.
abhidudrāva saumitrimudyamya mahatīṃ śilām..

अन्वय - *anvaya*

तथा समुत्सृज्य कपीश्वरम् सः भिन्नहृदयः कुम्भकर्णः महेष्वासः प्रगृहीतशिलायुधः महतीम् शिलाम् उद्यम्य अभिदुद्राव सौमित्रिम्।

tathā samutsṛjya kapīśvaram saḥ bhinnahṛdayaḥ kumbhakarṇaḥ maheṣvāsaḥ pragṛhītaśilāyudhaḥ mahatīm śilām udyamya abhidudrāva saumitrim.

English Translation

Then, having released the lord of the monkeys, the great archer Kumbhakarṇa, with a pierced heart holding a stone weapon, ran up to the son of Sumitrā, having lifted the great stone.

०३ २७१ ०१४

शास्त्र - *śāstra*

तस्याभिद्रवतस्तूर्णं क्षुराभ्यामुच्छ्रितौ करौ।
चिच्छेद निशिताग्राभ्यां स बभूव चतुर्भुजः॥

tasyābhidravatastūrṇaṃ kṣurābhyāmucchritau karau.
ciccheda niśitāgrābhyāṃ sa babhūva caturbhujaḥ..

अन्वय - *anvaya*

लक्ष्मणः तस्य तूर्णम् अभिद्रवतः उच्छ्रितौ करौ चिच्छेद निशिताग्राभ्याम् क्षुराभ्याम्। सः कुम्भकर्णः बभूव चतुर्भुजः।

lakṣmaṇaḥ tasya tūrṇam abhidravataḥ ucchritau karau ciccheda niśitāgrābhyām kṣurābhyām. saḥ kumbhakarṇaḥ babhūva caturbhujaḥ.

English Translation

Lakṣmaṇa cut off two lifted hands of the running one with sharpened blades attached to an arrow. Kumbhakarṇa became four-armed.

०३ २७१ ०१५

शास्त्र - *śāstra*

तानप्यस्य भुजान्सर्वान्प्रगृहीतशिलायुधान्।
क्षुरैश्चिच्छेद लघ्वस्त्रं सौमित्रिः प्रतिदर्शयन्॥

tānapyasya bhujānsarvānpragṛhītaśilāyudhān.
kṣuraiścicciccheda laghvastraṃ saumitriḥ pratidarśayan..

अन्वय - *anvaya*

तान् अपि अस्य भुजान् सर्वान् प्रगृहीतशिलायुधान् क्षुरैः चिच्छेद सौमित्रिः प्रतिदर्शयन् लघ्वस्त्रम्।

tān api asya bhujān sarvān pragṛhītaśilāyudhān kṣuraiḥ ciccheda saumitriḥ pratidarśayan laghvastram.

English Translation

Lakṣmaṇa, showing his light weapon, cut all those hands of him holding heavy stones with arrows.

०३ २७१ ०१६

शास्त्र - *śāstra*

स बभूवातिकायश्च बहुपादशिरोभुजः।
तं ब्रह्मास्त्रेण सौमित्रिर्ददाहाद्रिचयोपमम्॥

sa babhūvātikāyaśca bahupādaśirobhujaḥ.
taṃ brahmāstreṇa saumitrirdadāhādricayopamam..

अन्वय - *anvaya*

सः कुम्भकर्णः बभूव अतिकायः च बहुपादशिरोभुजः। सौमित्रिः तम् ब्रह्मास्त्रेण ददाह अद्रिचयोपमम्।

saḥ kumbhakarṇaḥ babhūva atikāyaḥ ca bahupādaśirobhujaḥ. saumitriḥ tam brahmāstreṇa dadāha adricayopamam.

English Translation

Kumbhakarṇa had a gigantic body with many heads, hands, and legs. Lakṣmaṇa burned him with a Brahmāstra like a mound of stone.

०३ २७१ ०१७

शास्त्र - *śāstra*

स पपात महावीर्यो दिव्यास्त्राभिहतो रणे।
महाशनिविनिर्दग्धः पादपोऽङ्कुरवानिव॥

sa papāta mahāvīryo divyāstrābhihato raṇe.
mahāśanivinirdagdhaḥ pādapo'ṅkuravāniva..

अन्वय - *anvaya*

सः महावीर्यः महाशनिविनिर्दग्धः दिव्यास्त्राभिहतः रणे पपात पादपः अङ्कुरवान् इव।

saḥ mahāvīryaḥ mahāśanivinirdagdhaḥ divyāstrābhihataḥ raṇe papāta pādapaḥ aṅkuravān iva.

English Translation

The great warrior, entirely consumed by the great arrow and killed by the divine missile in battle, fell like sprouts on a tree.

०३ २७१ ०१८

शास्त्र - *śāstra*

तं दृष्ट्वा वृत्रसंकाशं कुम्भकर्णं तरस्विनम्।
गतासुं पतितं भूमौ राक्षसाः प्राद्रवन्भयात्॥

taṃ dṛṣṭvā vṛtrasaṃkāśaṃ kumbhakarṇaṃ tarasvinam.
gatāsuṃ patitaṃ bhūmau rākṣasāḥ prādravanbhayāt..

अन्वय - *anvaya*

तम् गतासुम् वृत्रसंकाशम् कुम्भकर्णम् तरस्विनम् पतितम् भूमौ दृष्ट्वा राक्षसाः प्राद्रवन् भयात्।

tam gatāsum vṛtrasaṃkāśam kumbhakarṇam tarasvinam patitam bhūmau dṛṣṭvā rākṣasāḥ prādravan bhayāt.

English Translation

Seeing that dead, energetic Vṛtra resembling Kumbhakarṇa fallen on the ground, the demons ran away from fear.

०३ २७१ ०१९

शास्त्र - *śāstra*

तथा तान्द्रवतो योधान्दृष्ट्वा तौ दूषणानुजौ।
अवस्थाप्याथ सौमित्रिं संक्रुद्धावभ्यधावताम्॥

tathā tāndravato yodhāndṛṣṭvā tau dūṣaṇānujau.
avasthāpyātha saumitriṃ saṃkruddhāvabhyadhāvatām..

अन्वय - *anvaya*

तथा तान् द्रवतः योधान् दृष्ट्वा तौ संक्रुद्धौ दूषणानुजौ अवस्थाप्य अथ सौमित्रिम् अभ्यधावताम्।

tathā tān dravataḥ yodhān dṛṣṭvā tau saṃkruddhau dūṣaṇānujau avasthāpya atha saumitrim abhyadhāvatām.

English Translation

Then, seeing those running warriors, the two enraged brothers of Dūṣaṇa arrayed and rushed towards the son of Sumitrā.

०३ २७१ ०२०

शास्त्र - *śāstra*

तावाद्रवन्तौ संक्रुद्धौ वज्रवेगप्रमाथिनौ।
प्रतिजग्राह सौमित्रिर्विनद्योभौ पतत्रिभिः॥

tāvādravantau saṃkruddhau vajravegapramāthinau.
pratijagrāha saumitrirvinadyobhau patatribhiḥ..

अन्वय - *anvaya*

तौ उभौ आद्रवन्तौ संक्रुद्धौ वज्रवेगप्रमाथिनौ सौमित्रिः विनद्य पतत्रिभिः प्रतिजग्राह।

tau ubhau ādravantau saṃkruddhau vajravegapramāthinau saumitriḥ vinadya patatribhiḥ pratijagrāha.

English Translation

The son of Sumitrā shouted and encountered both those approaching enraged Vajravega and Pramāthin.

०३ २७१ ०२१

शास्त्र - *śāstra*

ततः सुतुमुलं युद्धमभवल्लोमहर्षणम्।
दूषणानुजयोः पार्थ लक्ष्मणस्य च धीमतः॥

tataḥ sutumulaṃ yuddhamabhavallomaharṣaṇam.
dūṣaṇānujayoḥ pārtha lakṣmaṇasya ca dhīmataḥ..

अन्वय - *anvaya*

पार्थ ततः सुतुमुलम् लोमहर्षणम् युद्धम् अभवत् दूषणानुजयोः लक्ष्मणस्य च धीमतः।

pārtha tataḥ sutumulam lomaharṣaṇam yuddham abhavat dūṣaṇānujayoḥ lakṣmaṇasya ca dhīmataḥ.

English Translation

O son of Pṛthā! Then, a boisterous hair-bristling battle ensued between the younger brother of Dūṣaṇa and the intelligent Lakṣmaṇa.

०३ २७१ ०२२

शास्त्र - *śāstra*

महता शरवर्षेण राक्षसौ सोऽभ्यवर्षत।
तौ चापि वीरौ संक्रुद्धावुभौ तौ समवर्षताम्॥

mahatā śaravarṣeṇa rākṣasau so'bhyavarṣata.
tau cāpi vīrau saṃkruddhāvubhau tau samavarṣatām..

अन्वय - *anvaya*

महता शरवर्षेण राक्षसौ सः अभ्यवर्षत। तौ च अपि वीरौ संक्रुद्धौ उभौ समवर्षताम्।

mahatā śaravarṣeṇa rākṣasau saḥ abhyavarṣata. tau ca api vīrau saṃkruddhau ubhau samavarṣatām.

English Translation

He covered both the demons with a great shower of arrows, and those enraged warriors also showered down.

०३ २७१ ०२३

शास्त्र - *śāstra*

मुहूर्तमेवमभवद्वज्रवेगप्रमाथिनोः।
सौमित्रेश्च महाबाहोः संप्रहारः सुदारुणः॥

muhūrtamevamabhavadvajravegapramāthinoḥ.
saumitreśca mahābāhoḥ saṃprahāraḥ sudāruṇaḥ..

अन्वय - *anvaya*

मुहूर्तम् एवम् सम्प्रहारः सुदारुणः अभवत् वज्रवेगप्रमाथिनोः सौमित्रेः च महाबाहोः।

muhūrtam evam samprahāraḥ sudāruṇaḥ abhavat vajravegapramāthinoḥ saumitreḥ ca mahābāhoḥ.

English Translation

In this way, there was a terrible mutual battle between the long-armed son of Sumitrā and Vajravega and Pramāthin at that moment.

०३ २७१ ०२४

शास्त्र - *śāstra*

अथाद्रिशृङ्गमादाय हनूमान्मारुतात्मजः।
अभिद्रुत्याददे प्राणान्वज्रवेगस्य रक्षसः॥

athādriśṛṅgamādāya hanūmānmārutātmajaḥ.
abhidrutyādade prāṇānvajravegasya rakṣasaḥ..

अन्वय - *anvaya*

अथ अद्रिशृङ्गम् आदाय अभिद्रुत्य आददे प्राणान् वज्रवेगस्य रक्षसः हनूमान् मारुतात्मजः।

atha adriśṛṅgam ādāya abhidrutya ādade prāṇān vajravegasya rakṣasaḥ hanūmān mārutātmajaḥ.

English Translation

Then, having taken a mountain peak and rushed towards him, the son of wind Hanūmat took away breaths of the demon Vajravega.

०३ २७१ ०२५

शास्त्र - *śāstra*

नीलश्च महता ग्राव्णा दूषणावरजं हरिः।
प्रमाथिनमभिद्रुत्य प्रममाथ महाबलः॥

nīlaśca mahatā grāvṇā dūṣaṇāvarajaṃ hariḥ.
pramāthinamabhidrutya pramamātha mahābalaḥ..

अन्वय - *anvaya*

हरिः नीलः महाबलः च महता ग्राव्णा दूषणावरजम् प्रमाथिनम् अभिद्रुत्य प्रममाथ।

hariḥ nīlaḥ mahābalaḥ ca mahatā grāvṇā dūṣaṇāvarajam pramāthinam abhidrutya pramamātha.

English Translation

And the mighty monkey Nīla ran towards and crushed the younger brother of Dūṣaṇa with a large rock.

०३ २७१ ०२६

शास्त्र - *śāstra*

ततः प्रावर्तत पुनः संग्रामः कटुकोदयः।
रामरावणसैन्यानामन्योन्यमभिधावताम्॥

tataḥ prāvartata punaḥ saṃgrāmaḥ kaṭukodayaḥ.
rāmarāvaṇasainyānāmanyonyamabhidhāvatām..

अन्वय - *anvaya*

ततः प्रावर्तत पुनः संग्रामः कटुकोदयः रामरावणसैन्यानाम् अन्योन्यम् अभिधावताम्।

tataḥ prāvartata punaḥ saṃgrāmaḥ kaṭukodayaḥ rāmarāvaṇasainyānām anyonyam abhidhāvatām.

English Translation

Then, the terrific mutual battle resumed again between the attacking armies of Rāma and Rāvaṇa.

०३ २७१ ०२७

शास्त्र - *śāstra*

शतशो नैर्ऋतान्वन्या जघ्नुर्वन्यांश्च नैर्ऋताः।
नैर्ऋतास्तत्र वध्यन्ते प्रायशो न तु वानराः॥

śataśo nairṛtānvanyā jaghnurvanyāṃśca nairṛtāḥ.
nairṛtāstatra vadhyante prāyaśo na tu vānarāḥ..

अन्वय - *anvaya*

शतशः नैर्ऋतान् वन्याः जघ्नुः वन्यान् च नैर्ऋताः। नैर्ऋताः तत्र वध्यन्ते प्रायशः न तु वानराः।

śataśaḥ nairṛtān vanyāḥ jaghnuḥ vanyān ca nairṛtāḥ.
nairṛtāḥ tatra vadhyante prāyaśaḥ na tu vānarāḥ.

English Translation

Hundreds of forest-dwelleing Vānaras striked Rākṣasas and Rākṣasas striked Vānaras. Mostly, the Rākṣasas were killed there, but not the Vānaras.

— १६ —

०३ २७२

असतो मा सद्गमय।
तमसो मा ज्योतिर्गमय।
मृत्योर्मामृतं गमय॥
ॐ शान्तिः शान्तिः शान्तिः॥

०३ २७२ ००१

शास्त्र - *śāstra*

मार्कण्डेय उवाच।
ततः श्रुत्वा हतं संख्ये कुम्भकर्णं सहानुगम्।
प्रहस्तं च महेष्वासं धूम्राक्षं चातितेजसम्॥

mārkaṇḍeya uvāca.
tataḥ śrutvā hataṃ saṃkhye kumbhakarṇaṃ sahānugam.
prahastaṃ ca maheṣvāsaṃ dhūmrākṣaṃ cātitejasam..

अन्वय - *anvaya*

ततः हतम् संख्ये कुम्भकर्णम् सहानुगम् प्रहस्तम् च महेष्वासम् धूम्राक्षम् च अतितेजसम् रावणः श्रुतः।

tataḥ hatam saṃkhye kumbhakarṇam sahānugam prahastam ca maheṣvāsam dhūmrākṣam ca atitejasam rāvaṇaḥ śrutaḥ.

English Translation

Mārkaṇḍeya said: Then, Rāvaṇa heard about the death of Kumbhakarṇa along with his followers, the great archer Prahasta, and the exceedingly brilliant Dhūmrākṣa.

०३ २७२ ००२

शास्त्र - *śāstra*

पुत्रमिन्द्रजितं शूरं रावणः प्रत्यभाषत।
जहि राममिमत्रघ्न सुग्रीवं च सलक्ष्मणम्॥

putramindrajitaṃ śūraṃ rāvaṇaḥ pratyabhāṣata.
jahi rāmamamitraghna sugrīvaṃ ca salakṣmaṇam..

अन्वय - *anvaya*

पुत्रम् इन्द्रजितम् शूरम् रावणः प्रत्यभाषत। जहि रामम् अमित्रघ्न सुग्रीवम् च सलक्ष्मणम्।

putram indrajitam śūram rāvaṇaḥ pratyabhāṣata. jahi rāmam amitraghna sugrīvam ca salakṣmaṇam.

English Translation

Rāvaṇa told his valourous son Indrajit and told him - "O slayer of enemies! Kill Rāma and Sugrīva with Lakṣmaṇa."

०३ २७२ ००३

शास्त्र - *śāstra*

त्वया हि मम सत्पुत्र यशो दीप्तमुपार्जितम्।
जित्वा वज्रधरं संख्ये सहस्राक्षं शचीपतिम्॥

tvayā hi mama satputra yaśo dīptamupārjitam.
jitvā vajradharaṃ saṃkhye sahasrākṣaṃ śacīpatim..

अन्वय - *anvaya*

सत्पुत्र सहस्राक्षम् शचीपतिम् वज्रधरम् इन्द्रम् संख्ये जित्वा त्वया हि मम यशः दीप्तम् उपार्जितम्।

satputra sahasrākṣam śacīpatim vajradharam indram saṃkhye jitvā tvayā hi mama yaśaḥ dīptam upārjitam.

English Translation

"O, good son! You have procured my blazing glory because you have won over the bearer of Vajra, thousand-eyed lord of might Indra in battle."

०३ २७२ ००४

शास्त्र - *śāstra*

अन्तर्हितः प्रकाशो वा दिव्यैर्दत्तवरैः शरैः।
जहि शत्रूनमित्रघ्न मम शस्त्रभृतां वर॥

antarhitaḥ prakāśo vā divyairdattavaraiḥ śaraiḥ.
jahi śatrūnamitraghna mama śastrabhṛtāṃ vara..

अन्वय - *anvaya*

मम शस्त्रभृताम् वर अमित्रघ्न अन्तर्हितः प्रकाशः वा त्वम् दिव्यैः दत्तवरैः शरैः शत्रून् जहि।

mama śastrabhṛtām vara amitraghna antarhitaḥ prakāśaḥ vā tvam divyaiḥ dattavaraiḥ śaraiḥ śatrūn jahi.

English Translation

"O slayer of enemies! O, the best amongst my weapon bearers! You, hidden or visibly, kill the enemies with the divine arrows obtained by a boon."

०३ २७२ ००५

शास्त्र - *śāstra*

रामलक्ष्मणसुग्रीवाः शरस्पर्शं न तेऽनघ।
समर्थाः प्रतिसंसोढुं कुतस्तदनुयायिनः॥

rāmalakṣmaṇasugrīvāḥ śarasparśaṃ na te'nagha.
samarthāḥ pratisaṃsoḍhuṃ kutastadanuyāyinaḥ..

अन्वय - *anvaya*

अनघ रामलक्ष्मणसुग्रीवाः न ते शरस्पर्शम् समर्थाः। तेषाम् अनुयायिनः कुतः प्रतिसंसोढुम्।

anagha rāmalakṣmaṇasugrīvāḥ na te śarasparśam samarthāḥ. teṣām anuyāyinaḥ kutaḥ pratisaṃsoḍhum.

English Translation

“O sinless! Rāma, Lakṣmaṇa, and Sugrīva are not a match for the touch of your arrow. From where are their followers able to bear back?”

०३ २७२ ००६

शास्त्र - *śāstra*

अकृता या प्रहस्तेन कुम्भकर्णेन चानघ।
खरस्यापचितिः संख्ये तां गच्छस्व महाभुज॥

akṛtā yā prahastena kumbhakarṇena cānagha.
kharasyāpacitiḥ saṃkhye tāṃ gacchasva mahābhuja..

अन्वय - *anvaya*

अनघ या अकृता प्रहस्तेन कुम्भकर्णेन च ताम् खरस्य अपचितिः। संख्ये गच्छस्व महाभुज।

anagha yā akṛtā prahastena kumbhakarṇena ca tām kharasya apacitiḥ. saṃkhye gacchasva mahābhuja.

English Translation

“O sinless! Prahasta and Kumbhakarṇa did not get revenge for Khara. O long-armed! Go in the battle.”

०३ २७२ ००७

शास्त्र - *śāstra*

त्वमद्य निशितैर्बाणैर्हत्वा शत्रून्ससैनिकान्।
प्रतिनन्दय मां पुत्र पुरा बद्ध्वेव वासवम्॥

tvamadya niśitairbāṇairhatvā śatrūnsasainikān.
pratinandaya māṃ putra purā baddhveva vāsavam..

अन्वय - *anvaya*

पुत्र त्वम् अद्य निशितैः बाणैः शत्रून् ससैनिकान् हत्वा माम् प्रतिनन्दय पुरा बद्ध्वा इव वासवम् इन्द्रम्।

putra tvam adya niśitaiḥ bāṇaiḥ śatrūn sasainikān hatvā mām pratinandaya purā baddhvā iva vāsavam indram.

English Translation

"O son! Today, you delight me, like having bound the chief of Vasus Indra earlier, having killed the enemies and their armies with sharpened arrows."

०३ २७२ ००८

शास्त्र - *śāstra*

इत्युक्तः स तथेत्युक्त्वा रथमास्थाय दंशितः।
प्रययाविन्द्रजिद्राजंस्तूर्णमायोधनं प्रति॥

ityuktaḥ sa tathetyuktvā rathamāsthāya daṃśitaḥ.
prayayāvindrajidrājaṃstūrṇamāyodhanaṃ prati..

अन्वय - *anvaya*

राजन् युधिष्ठिर इति उक्तः सः दंशितः इन्द्रजित् तथा इति उक्त्वा रथम् आस्थाय तूर्णम् आयोधनम् प्रति प्रययौ।

rājan yudhiṣṭhira iti uktaḥ saḥ daṃśitaḥ indrajit tathā iti uktvā ratham āsthāya tūrṇam āyodhanam prati prayayau.

English Translation

O King Yudhiṣṭhira! Indrajit, who was thus spoken, having said - "So be it", armoured and quickly advanced towards the battle, having mounted a chariot.

०३ २७२ ००९

शास्त्र - *śāstra*

तत्र विश्राव्य विस्पष्टं नाम राक्षसपुंगवः।
आह्वयामास समरे लक्ष्मणं शुभलक्षणम्॥

tatra viśrāvya vispaṣṭaṃ nāma rākṣasapuṃgavaḥ.
āhvayāmāsa samare lakṣmaṇaṃ śubhalakṣaṇam..

अन्वय - *anvaya*

तत्र लक्ष्मणम् शुभलक्षणम् नाम विस्पष्टम् विश्रावयति राक्षसपुंगवः समरे आह्वानम् करोति च।

tatra lakṣmaṇam śubhalakṣaṇam nāma vispaṣṭam viśrāvayati rākṣasapuṃgavaḥ samare āhvānam karoti ca.

English Translation

There, the eminent demon very clearly mentioned the auspicious name of Lakṣmaṇa and challenged him in a battle.

०३ २७२ ०१०

शास्त्र - *śāstra*

तं लक्ष्मणोऽप्यभ्यधावत्प्रगृह्य सशरं धनुः।
त्रासयंस्तलघोषेण सिंहः क्षुद्रमृगं यथा॥

taṃ lakṣmaṇo'pyabhyadhāvatpragṛhya saśaraṃ dhanuḥ.
trāsayaṃstalaghoṣeṇa siṃhaḥ kṣudramṛgaṃ yathā..

अन्वय - *anvaya*

लक्ष्मणः अपि सशरम् धनुः प्रगृह्य त्रासयन् तलयोः घोषेण सिंहः क्षुद्रमृगम् यथा तम् अभ्यधावत्।

lakṣmaṇaḥ api saśaram dhanuḥ pragṛhya trāsayan talayoḥ ghoṣeṇa siṃhaḥ kṣudramṛgam yathā tam abhyadhāvat.

English Translation

Lakṣmaṇa, whose sound of the feet caused to tremble, also ran up towards him with his bow and arrows like a lion running towards a small deer.

०३ २७२ ०११

शास्त्र - *śāstra*

तयोः समभवद्युद्धं सुमहज्जयगृद्धिनोः।
दिव्यास्त्रविदुषोस्तीव्रमन्योन्यस्पर्धिनोस्तदा॥

tayoḥ samabhavadyuddhaṃ sumahajjayagṛddhinoḥ.
divyāstraviduṣostīvramanyonyaspardhinostadā..

अन्वय - *anvaya*

तदा युद्धम् तीव्रम् सुमहत् समभवत् तयोः जयगृद्धिनोः दिव्यास्त्रविदुषोः अन्योन्यस्पर्धिनोः।

tadā yuddham tīvram sumahat samabhavat tayoḥ jayagṛddhinoḥ divyāstraviduṣoḥ anyonyaspardhinoḥ.

English Translation

At that time, an exceptional battle happened between victory-eager, mutually rivalling knowers of the divine weapons.

०३ २७२ ०१२

शास्त्र - *śāstra*

रावणिस्तु यदा नैनं विशेषयति सायकैः।
ततो गुरुतरं यत्नमातिष्ठद्बलिनां वरः॥

rāvaṇistu yadā nainaṃ viśeṣayati sāyakaiḥ.
tato gurutaraṃ yatnamātiṣṭhadbalināṃ varaḥ..

अन्वय - *anvaya*

बलिनाम् वरः रावणिः इन्द्रजित् तु यदा एनम् लक्ष्मणम् न विशेषयति सायकैः ततः गुरुतरम् यत्नम् आतिष्ठत्।

balināṃ varaḥ rāvaṇiḥ indrajit tu yadā enam lakṣmaṇam na viśeṣayati sāyakaiḥ tataḥ gurutaram yatnam ātiṣṭhat.

English Translation

But when the son of Rāvaṇa, the best amongst the warriors, could not excel over him with arrows, he undertook more significant effort.

०३ २७२ ०१३

शास्त्र - *śāstra*

तत एनं महावेगैरर्दयामास तोमरैः।
तानागतान्स चिच्छेद सौमित्रिर्निशितैः शरैः।
ते निकृत्ताः शरैस्तीक्ष्णैर्न्यपतन्वसुधातले॥

tata enaṃ mahāvegairardayāmāsa tomaraiḥ.
tānāgatānsa ciccheda saumitrirniśitaiḥ śaraiḥ.
te nikṛttāḥ śaraistīkṣṇairnyapatanvasudhātale..

अन्वय - *anvaya*

ततः इन्द्रजित् एनम् महावेगैः अर्दयामास तोमरैः। तान् आगतान् सः सौमित्रिः चिच्छेद निशितैः शरैः। ते निकृत्ताः शरैः तीक्ष्णैः न्यपतन् वसुदातले।

tataḥ indrajit enam mahāvegaiḥ ardayāmāsa tomaraiḥ. tān āgatān saḥ saumitriḥ ciccheda niśitaiḥ śaraiḥ. te nikṛttāḥ śaraiḥ tīkṣṇaiḥ nyapatan vasudātale.

English Translation

Then, he struck him with swift javelins. Lakṣmaṇa cut the incoming ones with sharp arrows. Those cut by sharp arrows fell on the surface of the Earth.

०३ २७२ ०१४

शास्त्र - *śāstra*

तमङ्गदो वालिसुतः श्रीमानुद्यम्य पादपम्।
अभिद्रुत्य महावेगस्ताडयामास मूर्धनि॥

tamaṅgado vālisutaḥ śrīmānudyamya pādapam.
abhidrutya mahāvegastāḍayāmāsa mūrdhani..

अन्वय - *anvaya*

अङ्गदः वालिसुतः महावेगः श्रीमान् पादपम् उद्यम्य तम् अभिद्रुत्य ताडयामास मूर्धनि।

aṅgadaḥ vālisutaḥ mahāvegaḥ śrīmān pādapam udyamya tam abhidrutya tāḍayāmāsa mūrdhani.

English Translation

The speedy and glorious son of Vālin, Aṅgada, lifted a tree, ran towards him and hit him on the head.

०३ २७२ ०१५

शास्त्र - *śāstra*

तस्येन्द्रजिदसंभ्रान्तः प्रासेनोरसि वीर्यवान्।
प्रहर्तुमैच्छत्तं चास्य प्रासं चिच्छेद लक्ष्मणः॥

tasyendrajidasaṃbhrāntaḥ prāsenorasi vīryavān.
prahartumaicchattaṃ cāsya prāsaṃ ciccheda lakṣmaṇaḥ..

अन्वय - *anvaya*

तस्य इन्द्रजित् वीर्यवान् असम्भ्रान्तः प्रासेन उरसि प्रहर्तुम् ऐच्छत्। तम् च अस्य प्रासम् चिच्छेद लक्ष्मणः।

tasya indrajit vīryavān asambhrāntaḥ prāsena urasi prahartum aicchat. tam ca asya prāsam ciccheda lakṣmaṇaḥ.

English Translation

The valorous and unagitated Indrajit wanted to attack him in the chest with a dart, and Lakṣmaṇa broke his dart.

०३ २७२ ०१६

शास्त्र - *śāstra*

तमभ्याशगतं वीरमङ्गदं रावणात्मजः।
गदयाताडयत्सव्ये पार्श्वे वानरपुंगवम्॥

tamabhyāśagataṃ vīramaṅgadaṃ rāvaṇātmajaḥ.
gadayātāḍayatsavye pārśve vānarapuṃgavam..

अन्वय - *anvaya*

रावणात्मजः तम् अभ्याशगतम् वीरम् अङ्गदम् वानरपुंगवम् गदया अताडयत् सव्ये पार्श्वे।

rāvaṇātmajaḥ tam abhyāśagatam vīram aṅgadam vānarapuṃgavam gadayā atāḍayat savye pārśve.

English Translation

The son of Rāvaṇa hit the warrior Aṅgada, chief of monkeys, coming near on the left side.

०३ २७२ ०१७

शास्त्र - *śāstra*

तमचिन्त्य प्रहारं स बलवान्वालिनः सुतः।
ससर्जेन्द्रजितः क्रोधाच्छालस्कन्धममित्रजित्॥

tamacintya prahāraṃ sa balavānvālinaḥ sutaḥ.
sasarjendrajitaḥ krodhācchālaskandhamamitrajit..

अन्वय - *anvaya*

तम् प्रहारम् अचिन्त्य सः अमित्रजित् बलवान् वालिनः सुतः शालस्कन्धम् ससर्ज इन्द्रजितः क्रोधात्।

tam prahāram acintya saḥ amitrajit balavān vālinaḥ sutaḥ śālaskandham sasarja indrajitaḥ krodhāt.

English Translation

Having realised that blow, the conqueror of enemies and mighty son of Vālin threw a trunk of Śāla from the anger on Indrajit.

०३ २७२ ०१८

शास्त्र - *śāstra*

सोऽङ्गदेन रुषोत्सृष्टो वधायेन्द्रजितस्तरुः।
जघानेन्द्रजितः पार्थ रथं साश्वं ससारथिम्॥

so'ṅgadena ruṣotsṛṣṭo vadhāyendrajitastaruḥ.
jaghānendrajitaḥ pārtha rathaṃ sāśvaṃ sasārathim..

अन्वय - *anvaya*

पार्थ युधिष्ठिर सः उत्सृष्टः तरुः अङ्गदेन रुषा इन्द्रजितः वधाय जघान इन्द्रजितः रथम् साश्वम् ससारथिम्।

pārtha yudhiṣṭhira saḥ utsṛṣṭaḥ taruḥ aṅgadena ruṣā indrajitaḥ vadhāya jaghāna indrajitaḥ ratham sāśvam sasārathim.

English Translation

O son of Pṛthā, that tree thrown by enraged Aṅgada for killing Indrajit hit Indrajit's chariot with horses and charioteer.

०३ २७२ ०१९

शास्त्र - *śāstra*

ततो हताश्वात्प्रस्कन्द्य रथात्स हतसारथिः।
तत्रैवान्तर्दधे राजन्मायया रावणात्मजः॥

tato hatāśvātpraskandya rathātsa hatasārathiḥ.
tatraivāntardadhe rājanmāyayā rāvaṇātmajaḥ..

अन्वय - *anvaya*

राजन् ततः हताश्वात् रथात् प्रस्कन्द्य सः हतसारथिः रावणात्मजः तत्र एव मायया अन्तर्दधे।

rājan tataḥ hatāśvāt rathāt praskandya saḥ hatasārathiḥ rāvaṇātmajaḥ tatra eva māyayā antardadhe.

English Translation

O King! Then, having jumped out of the chariot with the dead horse, the son of Rāvaṇa, whose charioteer was killed, disappeared there itself by illusion.

०३ २७२ ०२०

शास्त्र - *śāstra*

अन्तर्हितं विदित्वा तं बहुमायं च राक्षसम्।
रामस्तं देशमागम्य तत्सैन्यं पर्यरक्षत॥

antarhitaṃ viditvā taṃ bahumāyaṃ ca rākṣasam.
rāmastaṃ deśamāgamya tatsainyaṃ paryarakṣata..

अन्वय - *anvaya*

तम् च बहुमायम् राक्षसम् अन्तर्हितम् विदित्वा रामः तम् देशम् आगम्य तत्सैन्यम् पर्यरक्षत।

tam ca bahumāyam rākṣasam antarhitam viditvā rāmaḥ tam deśam āgamya tatsainyam paryarakṣata.

English Translation

Knowing about that hidden, deceitful demon, Rāma came to that spot and protected his army.

०३ २७२ ०२१

शास्त्र - *śāstra*

स राममुद्दिश्य शरैस्ततो दत्तवरैस्तदा।
विव्याध सर्वगात्रेषु लक्ष्मणं च महारथम्॥

sa rāmamuddiśya śaraistato dattavaraistadā.
vivyādha sarvagātreṣu lakṣmaṇaṃ ca mahāratham..

अन्वय - *anvaya*

ततः सः रामम् लक्ष्मणम् च महारथम् उद्दिश्य शरैः दत्तवरैः तदा विव्याध सर्वगात्रेषु।

tataḥ saḥ rāmam lakṣmaṇam ca mahāratham uddiśya śaraiḥ dattavaraiḥ tadā vivyādha sarvagātreṣu.

English Translation

Then he aimed at and pierced Rāma and the great charioteer Lakṣmaṇa through all body parts at that time with divine arrows granted by a boon.

०३ २७२ ०२२

शास्त्र - *śāstra*

तमदृश्यं शरैः शूरौ माययान्तर्हितं तदा।
योधयामासतुरुभौ रावणिं रामलक्ष्मणौ॥

tamadṛśyaṃ śaraiḥ śūrau māyayāntarhitaṃ tadā.
yodhayāmāsaturubhau rāvaṇiṃ rāmalakṣmaṇau..

अन्वय - *anvaya*

तम् रावणिम् अदृश्यम् मायया अन्तर्हितम् तदा शरैः योधयामासतुः उभौ शूरौ रामलक्ष्मणौ।

tam rāvaṇim adṛśyam māyayā antarhitam tadā śaraiḥ yodhayāmāsatuḥ ubhau śūrau rāmalakṣmaṇau.

English Translation

At that time, both brave Rāma and Lakṣmaṇa fought the deceitfully hidden and invisible son of Rāvaṇa with arrows.

०३ २७२ ०२३

शास्त्र - *śāstra*

स रुषा सर्वगात्रेषु तयोः पुरुषसिंहयोः।
व्यसृजत्सायकान्भूयः शतशोऽथ सहस्रशः॥

sa ruṣā sarvagātreṣu tayoḥ puruṣasiṃhayoḥ.
vyasṛjatsāyakānbhūyaḥ śataśo'tha sahasraśaḥ..

अन्वय - *anvaya*

सः रुषा सर्वगात्रेषु तयोः पुरुषसिंहयोः व्यसृजत् सायकान् भूयः शतशः अथ सहस्रशः।

saḥ ruṣā sarvagātreṣu tayoḥ puruṣasiṃhayoḥ vyasṛjat sāyakān bhūyaḥ śataśaḥ atha sahasraśaḥ.

English Translation

He angrily shot hundreds and thousands of arrows repeatedly at all the body parts of those heroes.

०३ २७२ ०२४

शास्त्र - *śāstra*

तमदृश्यं विचिन्वन्तः सृजन्तमनिशं शरान्।
हरयो विविशुर्व्योम प्रगृह्य महतीः शिलाः॥

tamadṛśyaṃ vicinvantaḥ sṛjantamaniśaṃ śarān.
harayo viviśurvyoma pragṛhya mahatīḥ śilāḥ..

अन्वय - *anvaya*

तम् अदृश्यम् अनिशम् सृजन्तम् शरान् विचिन्वन्तः हरयः विविशुः व्योम महतीः शिलाः प्रगृह्य।

tam adṛśyam aniśam sṛjantam śarān vicinvantaḥ harayaḥ viviśuḥ vyoma mahatīḥ śilāḥ pragṛhya.

English Translation

The monkeys, looking for the invisible uninterrupted shooter of arrows, seized large rocks and entered the sky.

०३ २७२ ०२५

शास्त्र - *śāstra*

तांश्च तौ चाप्यदृश्यः स शरैर्विव्याध राक्षसः।
स भृशं ताडयन्वीरो रावणिर्मायायावृतः॥

tāṃśca tau cāpyadṛśyaḥ sa śarairvivyādha rākṣasaḥ.
sa bhṛśaṃ tāḍayanvīro rāvaṇirmāyayāvṛtaḥ..

अन्वय - *anvaya*

तान् हरीन् च तौ रामलक्ष्मणौ च अपि अदृश्यः सः राक्षसः शरैः विव्याध। सः भृशम् ताडयन् वीरः रावणिः मायया आवृतः।

tān harīn ca tau rāmalakṣmaṇau ca api adṛśyaḥ saḥ rākṣasaḥ śaraiḥ vivyādha. saḥ bhṛśam tāḍayan vīraḥ rāvaṇiḥ māyayā āvṛtaḥ.

English Translation

That invisible demon, the warrior son of Rāvaṇa, who was excessively striking and hidden by illusion, pierced those monkeys and both Rāma and Lakṣmaṇa also with arrows.

०३ २७२ ०२६

शास्त्र - *śāstra*

तौ शरैराचितौ वीरौ भ्रातरौ रामलक्ष्मणौ।
पेततुर्गगनाद्भूमिं सूर्याचन्द्रमसाविव॥

tau śarairācitau vīrau bhrātarau rāmalakṣmaṇau.
petaturgaganādbhūmiṃ sūryācandramasāviva..

अन्वय - *anvaya*

तौ शरैः आचितौ वीरौ भ्रातरौ रामलक्ष्मणौ पेततुः गगनात् भूमिम् सूर्यः च चन्द्रमाः च इव।

tau śaraiḥ ācitau vīrau bhrātarau rāmalakṣmaṇau petatuḥ gaganāt bhūmim sūryaḥ ca candramāḥ ca iva.

English Translation

Those two warrior brothers covered by arrows, Rāma and Lakṣmaṇa, fell from the sky to the ground like the sun and the moon.

— १७ —

०३ २७३

असतो मा सद्गमय।
तमसो मा ज्योतिर्गमय।
मृत्योर्मामृतं गमय॥
ॐ शान्तिः शान्तिः शान्तिः॥

०३ २७३ ००१

शास्त्र - *śāstra*

मार्कण्डेय उवाच।
तावुभौ पतितौ दृष्ट्वा भ्रातरावमितौजसौ।
बबन्ध रावणिर्भूयः शरैर्दत्तवरैस्तदा॥

mārkaṇḍeya uvāca.
tāvubhau patitau dṛṣṭvā bhrātarāvamitaujasau.
babandha rāvaṇirbhūyaḥ śarairdattavaraistadā..

अन्वय - *anvaya*

तौ उभौ पतितौ भ्रातरौ अमितौजसौ दृष्ट्वा बबन्ध रावणिः भूयः शरैः दत्तवरैः तदा।

tau ubhau patitau bhrātarau amitaujasau dṛṣṭvā babandha rāvaṇiḥ bhūyaḥ śaraiḥ dattavaraiḥ tadā.

English Translation

Mārkaṇḍeya said: At that time, having seen both the fallen brothers with unbounded might, the son of Rāvaṇa tied them again with arrows given by a boon.

०३ २७३ ००२

शास्त्र - *śāstra*

तौ वीरौ शरजालेन बद्धाविन्द्रजिता रणे।
रेजतुः पुरुषव्याघ्रौ शकुन्ताविव पञ्जरे॥

tau vīrau śarajālena baddhāvindrajitā raṇe.
rejatuḥ puruṣavyāghrau śakuntāviva pañjare..

अन्वय - *anvaya*

तौ वीरौ शरजालेन बद्धौ पुरुषव्याघ्रौ इन्द्रजिता रणे शकुन्तौ इव पञ्जरे रेजतुः।

tau vīrau śarajālena baddhau puruṣavyāghrau indrajitā raṇe śakuntau iva pañjare rejatuḥ.

English Translation

Those two warrior tiger-amongst-men bounded with a net of arrows by Indrajit in the battle shone like two blue jays in a cage.

०३ २७३ ००३

शास्त्र - *śāstra*

तौ दृष्ट्वा पतितौ भूमौ शतशः सायकैश्चितौ।
सुग्रीवः कपिभिः सार्धं परिवार्य ततः स्थितः॥

tau dṛṣṭvā patitau bhūmau śataśaḥ sāyakaiścitau.
sugrīvaḥ kapibhiḥ sārdhaṃ parivārya tataḥ sthitaḥ..

अन्वय - *anvaya*

तौ पतितौ भूमौ चितौ शतशः सायकैः दृष्ट्वा कपिभिः सार्धम् परिवार्य ततः स्थितः सुग्रीवः।

tau patitau bhūmau citau śataśaḥ sāyakaiḥ dṛṣṭvā kapibhiḥ sārdham parivārya tataḥ sthitaḥ sugrīvaḥ.

English Translation

Having seen those two fallen on the ground, covered with hundreds of arrows, Sugrīva stood there, covered with monkeys.

०३ २७३ ००४

शास्त्र - *śāstra*

सुषेणमैन्दद्विविदैः कुमुदेनाङ्गदेन च।
हनूमन्नीलतारैश्च नलेन च कपीश्वरः॥

suṣeṇamaindadvividaiḥ kumudenāṅgadena ca.
hanūmannīlatāraiśca nalena ca kapīśvaraḥ..

अन्वय - *anvaya*

सुषेणेन मैन्देन द्विविदेन कुमुदेन अङ्गदेन हनूमता नीलेन तारेण नलेन च कपीश्वरः सुग्रीवः आसीत्।

suṣeṇena maindena dvividena kumudena aṅgadena hanūmatā nīlena tāreṇa nalena ca kapīśvaraḥ sugrīvaḥ āsīt.

English Translation

The lord of monkeys, Sugrīva, was with Suṣeṇa, Mainda, Dvivida, Kumuda, Hanūmat, Nīla, Tāra, and Nala.

०३ २७३ ००५

शास्त्र - *śāstra*

ततस्तं देशमागम्य कृतकर्मा विभीषणः।
बोधयामास तौ वीरौ प्रज्ञास्त्रेण प्रबोधितौ॥

tatastaṃ deśamāgamya kṛtakarmā vibhīṣaṇaḥ.
bodhayāmāsa tau vīrau prajñāstreṇa prabodhitau..

अन्वय - *anvaya*

ततः तम् देशम् आगम्य कृतकर्मा विभीषणः बोधयामास प्रज्ञास्त्रेण तौ वीरौ। तौ वीरौ प्रबोधितौ।

tataḥ tam deśam āgamya kṛtakarmā vibhīṣaṇaḥ bodhayāmāsa prajñāstreṇa tau vīrau. tau vīrau prabodhitau.

English Translation

Then, having arrived at that place, the accomplished Vibhīṣaṇa awoke the two warriors with Prajñāstra.

०३ २७३ ००६

शास्त्र - *śāstra*

विशल्यौ चापि सुग्रीवः क्षणेनोभौ चकार तौ।
विशल्यया महौषध्या दिव्यमन्त्रप्रयुक्तया॥

viśalyau cāpi sugrīvaḥ kṣaṇenobhau cakāra tau.
viśalyayā mahauṣadhyā divyamantraprayuktayā..

अन्वय - *anvaya*

सुग्रीवः च अपि क्षणेन उभौ तौ विशल्यौ विशल्यया महौषध्या दिव्यमन्त्रप्रयुक्तया चकार।

sugrīvaḥ ca api kṣaṇena ubhau tau viśalyau viśalyayā mahauṣadhyā divyamantraprayuktayā cakāra.

English Translation

And Sugrīva also instantaneously freed both of them from arrow wounds with the great Viśalyā medicinal plant yoked with the divine syllables.

०३ २७३ ००७

शास्त्र - *śāstra*

तौ लब्धसंज्ञौ नृवरौ विशल्यावुदतिष्ठताम्।
गततन्द्रीक्लमौ चास्तां क्षणेनोभौ महारथौ॥

tau labdhasaṃjñau nṛvarau viśalyāvudatiṣṭhatām.
gatatandrīklamau cāstāṃ kṣaṇenobhau mahārathau..

अन्वय - *anvaya*

तौ लब्धसंज्ञौ गततन्द्रीक्लमौ नृवरौ विशल्यौ उभौ महारथौ क्षणेन उदतिष्ठताम् आस्ताम् च।

tau labdhasaṃjñau gatatandrīklamau nṛvarau viśalyau ubhau mahārathau kṣaṇena udatiṣṭhatām āstām ca.

English Translation

Those best warriors freed from arrow wounds regained consciousness and were relieved from exhaustion and fatigue, so they stood up and sat.

०३ २७३ ००८

शास्त्र - *śāstra*

ततो विभीषणः पार्थ राममिक्ष्वाकुनन्दनम्।
उवाच विज्वरं दृष्ट्वा कृताञ्जलिरिदं वचः॥

tato vibhīṣaṇaḥ pārtha rāmamikṣvākunandanam.
uvāca vijvaraṃ dṛṣṭvā kṛtāñjaliridaṃ vacaḥ..

अन्वय - *anvaya*

पार्थ ततः रामम् इक्ष्वाकुनन्दनम् विज्वरम् दृष्ट्वा विभीषणः कृताञ्जलिः इदम् वचः उवाच।

pārtha tataḥ rāmam ikṣvākunandanam vijvaram dṛṣṭvā vibhīṣaṇaḥ kṛtāñjaliḥ idam vacaḥ uvāca.

English Translation

O son of Pṛthā, then having seen Rāma, the scion of Ikṣvāku, freed from pain, Vibhīṣaṇa, standing with both his hands joined in reverence, said these words.

०३ २७३ ००९

शास्त्र - *śāstra*

अयमम्भो गृहीत्वा तु राजराजस्य शासनात्।
गुह्यकोऽभ्यागतः श्वेतात्त्वत्सकाशमरिंदम॥

ayamambho gṛhītvā tu rājarājasya śāsanāt.
guhyako'bhyāgataḥ śvetāttvatsakāśamariṃdama..

अन्वय - *anvaya*

अरिंदम अयम् अम्भः गृहीत्वा तु गुह्यकः अभ्यागतः राजराजस्य कुबेरस्य शासनात् श्वेतात् त्वत्सकाशम्।

ariṃdama ayam ambhaḥ gṛhītvā tu guhyakaḥ abhyāgataḥ rājarājasya kuberasya śāsanāt śvetāt tvatsakāśam.

English Translation

"O conqueror of enemies! A Guhyaka has arrived in your vicinity, grabbing this water by the command of the emperor of emperors Kubera from the Śveta mountains."

०३ २७३ ०१०

शास्त्र - *śāstra*

इदमम्भः कुबेरस्ते महाराजः प्रयच्छति।
अन्तर्हितानां भूतानां दर्शनार्थं परंतप॥

idamambhaḥ kuberaste mahārājaḥ prayacchati.
antarhitānāṃ bhūtānāṃ darśanārthaṃ paraṃtapa..

अन्वय - *anvaya*

परंतप इदम् अन्तर्हितानाम् भूतानाम् दर्शनार्थम् अम्भः महाराजः कुबेरः ते प्रयच्छति।

paraṃtapa idam antarhitānām bhūtānām darśanārtham ambhaḥ mahārājaḥ kuberaḥ te prayacchati.

English Translation

"O destroyer of foes! The emperor Kubera offers this water to you to see hidden beings."

०३ २७३ ०११

शास्त्र - *śāstra*

अनेन स्पृष्टनयनो भूतान्यन्तर्हितान्युत।
भवान्द्रक्ष्यति यस्मै च भवानेतत्प्रदास्यति॥

anena spṛṣṭanayano bhūtānyantarhitānyuta.
bhavāndrakṣyati yasmai ca bhavānetatpradāsyati..

अन्वय - *anvaya*

स्पृष्टनयनः भवान् यस्मै च भवान् एतद् प्रदास्यति अनेन भूतानि अन्तर्हितानि उत द्रक्ष्यति।

spṛṣṭanayanaḥ bhavān yasmai ca bhavān etad pradāsyati anena bhūtāni antarhitāni uta drakṣyati.

English Translation

“Your honour, having touched this to the eyes, and to whoever your honour will give this, will see even the hidden beings with this.”

०३ २७३ ०१२

शास्त्र - *śāstra*

तथेति रामस्तद्वारि प्रतिगृह्याथ सत्कृतम्।
चकार नेत्रयोः शौचं लक्ष्मणश्च महामनाः॥

tatheti rāmastadvāri pratigṛhyātha satkṛtam.
cakāra netrayoḥ śaucaṃ lakṣmaṇaśca mahāmanāḥ..

अन्वय - *anvaya*

तथा इति उक्त्वा रामः लक्ष्मणः च महामनाः तद् वारि प्रतिगृह्य अथ सत्कृतम् नेत्रयोः शौचम् चकार।

tathā iti uktvā rāmaḥ lakṣmaṇaḥ ca mahāmanāḥ tad vāri pratigṛhya atha satkṛtam netrayoḥ śaucam cakāra.

English Translation

Having said "Yes" and taking that water, Rāma and magnanimous Lakṣmaṇa did the honorary purification of the eyes.

०३ २७३ ०१३

शास्त्र - *śāstra*

सुग्रीवजाम्बवन्तौ च हनूमानङ्गदस्तथा।
मैन्दद्विविदनीलाश्च प्रायः प्लवगसत्तमाः॥

sugrīvajāmbavantau ca hanūmānaṅgadastathā.
maindadvividanīlāśca prāyaḥ plavagasattamāḥ..

अन्वय - *anvaya*

सुग्रीवः जाम्बवान् हनूमान् अङ्गदः मैन्दः द्विविदः नीलाः च प्रायः प्लवगसत्तमाः चकार।

sugrīvaḥ jāmbavān hanūmān aṅgadaḥ maindaḥ dvividaḥ nīlāḥ ca prāyaḥ plavagasattamāḥ cakāra.

English Translation

And mostly the best of monkeys, Sugrīva, Jāmbavat, Hanūmat, Aṅgada, Mainda, Dvivida, and Nīla did.

०३ २७३ ०१४

शास्त्र - *śāstra*

तथा समभवच्चापि यदुवाच विभीषणः।
क्षणेनातीन्द्रियाण्येषां चक्षूंष्यासन्युधिष्ठिर॥

tathā samabhavaccāpi yaduvāca vibhīṣaṇaḥ.
kṣaṇenātīndriyāṇyeṣāṃ cakṣūṃṣyāsanyudhiṣṭhira..

अन्वय - *anvaya*

युधिष्ठिर तथा समभवत् च अपि यद् उवाच विभीषणः। क्षणेन अतीन्द्रियाणि एषाम् चक्षूंषि आसन्।

yudhiṣṭhira tathā samabhavat ca api yad uvāca vibhīṣaṇaḥ. kṣaṇena atīndriyāṇi eṣām cakṣūṃṣi āsan.

English Translation

O Yudhiṣṭhira! And then what Vibhīṣaṇa said happened. In an instant, there were super senses in their eyes.

०३ २७३ ०१५

शास्त्र - *śāstra*

इन्द्रजित्कृतकर्मा तु पित्रे कर्म तदात्मनः।
निवेद्य पुनरागच्छत्त्वरयाजिशिरः प्रति॥

indrajitkṛtakarmā tu pitre karma tadātmanaḥ.
nivedya punarāgacchattvarayājiśiraḥ prati..

अन्वय - *anvaya*

पित्रे तु कर्म तदा आत्मनः निवेद्य इन्द्रजित् कृतकर्मा पुनरागच्छत् त्वरया आजिमुखम् प्रति।

pitre tu karma tadā ātmanaḥ nivedya indrajit kṛtakarmā punarāgacchat tvarayā ājimukham prati.

English Translation

But the accomplished Indrajit, having communicated to his father about this action of him, swiftly came towards the front of the battle again.

०३ २७३ ०१६

शास्त्र - *śāstra*

तमापतन्तं संक्रुद्धं पुनरेव युयुत्सया।
अभिदुद्राव सौमित्रिर्विभीषणमते स्थितः॥

tamāpatantaṃ saṃkruddhaṃ punareva yuyutsayā.
abhidudrāva saumitrirvibhīṣaṇamate sthitaḥ..

अन्वय - *anvaya*

तम् आपतन्तम् संक्रुद्धम् पुनरेव अभिदुद्राव युयुत्सया सौमित्रिः विभीषणमते स्थितः।

tam āpatantam saṃkruddham punareva abhidudrāva yuyutsayā saumitriḥ vibhīṣaṇamate sthitaḥ.

English Translation

The son of Sumitrā, standing on the advice of Vibhīṣaṇa, again ran up towards the angrily approaching one with a desire to fight.

०३ २७३ ०१७

शास्त्र - *śāstra*

अकृताह्निकमेवैनं जिघांसुर्जितकाशिनम्।
शरैर्जघान संक्रुद्धः कृतसंज्ञोऽथ लक्ष्मणः॥

akṛtāhnikamevainaṃ jighāṃsurjitakāśinam.
śarairjaghāna saṃkruddhaḥ kṛtasaṃjño'tha lakṣmaṇaḥ..

अन्वय - *anvaya*

अथ अकृतम् आह्निकम् एव एनम् जितकाशिनम् शरैः जघान संक्रुद्धः कृतसंज्ञः लक्ष्मणः जिघांसुः।

atha akṛtam āhnikam eva enam jitakāśinam śaraiḥ jaghāna saṃkruddhaḥ kṛtasaṃjñaḥ lakṣmaṇaḥ jighāṃsuḥ.

English Translation

Thus, the angry Lakṣmaṇa, desirous of striking and one to whom a sign has been

given, struck him who was looking like a conqueror whose daily religious ceremony was still not done.

०३ २७३ ०१८

शास्त्र - *śāstra*

तयोः समभवद्युद्धं तदान्योन्यं जिगीषतोः।
अतीव चित्रमाश्चर्यं शक्रप्रह्लादयोरिव॥

tayoḥ samabhavadyuddhaṃ tadānyonyaṃ jigīṣatoḥ.
atīva citramāścaryaṃ śakraprahlādayoriva..

अन्वय - *anvaya*

तदा अन्योन्यम् तयोः जिगीषतोः शक्रप्रह्लादयोः इव समभवत् युद्धम् अतीव चित्रम् आश्चर्यम्।

tadā anyonyam tayoḥ jigīṣatoḥ śakraprahlādayoḥ iva samabhavat yuddham atīva citram āścaryam.

English Translation

At that time, a mutual exceedingly wonderful bright battle happened amongst those desirous of winning, like Śakra and Prahlāda.

०३ २७३ ०१९

शास्त्र - *śāstra*

अविध्यदिन्द्रजित्तीक्ष्णैः सौमित्रिं मर्मभेदिभिः।
सौमित्रिश्चानलस्पर्शैरविध्यद्रावणिं शरैः॥

avidhyadindrajittīkṣṇaiḥ saumitriṃ marmabhedibhiḥ.
saumitriścānalasparśairavidhyadrāvaṇiṃ śaraiḥ..

अन्वय - *anvaya*

सौमित्रिम् अविध्यत् इन्द्रजित् तीक्ष्णैः मर्मभेदिभिः। सौमित्रिः च अनलस्पर्शैः शरैः अविध्यत् रावणिम्।

saumitrim avidhyat indrajit tīkṣṇaiḥ marmabhedibhiḥ. saumitriḥ ca analasparśaiḥ śaraiḥ avidhyat rāvaṇim.

English Translation

Indrajit pierced Lakṣmaṇa with sharp arrows, and Lakṣmaṇa also pierced Indrajit with fiery arrows.

०३ २७३ ०२०

शास्त्र - *śāstra*

सौमित्रिशरसंस्पर्शाद्रावणिः क्रोधमूर्छितः।
असृजल्लक्ष्मणायाष्टौ शरानाशीविषोपमान्॥

saumitriśarasaṃsparśādrāvaṇiḥ krodhamūrchitaḥ. asṛjallakṣmaṇāyāṣṭau śarānāśīviṣopamān..

अन्वय - *anvaya*

सौमित्रिशरस्य संस्पर्शात् रावणिः क्रोधमूर्छितः असृजत् लक्ष्मणाय अष्टौ शरान् आशीविषोपमान्।

saumitriśarasya saṃsparśāt rāvaṇiḥ krodhamūrchitaḥ asṛjat lakṣmaṇāya aṣṭau śarān āśīviṣopamān.

English Translation

The son of Rāvaṇa, angered by the touch of the arrow from Lakṣmaṇa, drew snake-venom like eight arrows for Lakṣmaṇa.

०३ २७३ ०२१

शास्त्र - *śāstra*

तस्यासून्पावकस्पर्शैः सौमित्रिः पत्रिभिस्त्रिभिः।
यथा निरहरद्वीरस्तन्मे निगदतः शृणु॥

tasyāsūnpāvakasparśaiḥ saumitriḥ patribhistribhiḥ.
yathā niraharadvīrastanme nigadataḥ śṛṇu..

अन्वय - *anvaya*

यथा तस्य इन्द्रजितः असून् वीरः सौमित्रिः पावकस्पर्शैः पत्त्रिभिः त्रिभिः निरहरत् तद् मे निगदतः शृणु।

yathā tasya indrajitaḥ asūn vīraḥ saumitriḥ pāvakasparśaiḥ pattribhiḥ tribhiḥ niraharat tad me nigadataḥ śṛṇu.

English Translation

Listen to my telling of how the brave son of Sumitrā pulled out his breaths with three arrows whose touch was like a fire.

०३ २७३ ०२२

शास्त्र - *śāstra*

एकेनास्य धनुष्मन्तं बाहुं देहादपातयत्।
द्वितीयेन सनाराचं भुजं भूमौ न्यपातयत्॥

ekenāsya dhanuṣmantaṃ bāhuṃ dehādapātayat.
dvitīyena sanārācaṃ bhujaṃ bhūmau nyapātayat..

अन्वय - *anvaya*

एकेन अस्य धनुष्मन्तम् बाहुम् देहात् अपातयत्। द्वितीयेन सनाराचम् भुजम् भूमौ न्यपातयत्।

ekena asya dhanuṣmantam bāhum dehāt apātayat.
dvitīyena sanārācam bhujam bhūmau nyapātayat.

English Translation

With one, his bow-bearing arm was cut off from the body. With the second, his arrow-bearing arm fell to the ground.

०३ २७३ ०२३

शास्त्र - *śāstra*

तृतीयेन तु बाणेन पृथुधारेण भास्वता।
जहार सुनसं चारु शिरो भ्राजिष्णुकुण्डलम्॥

tṛtīyena tu bāṇena pṛthudhāreṇa bhāsvatā.
jahāra sunasaṃ cāru śiro bhrājiṣṇukuṇḍalam..

अन्वय - *anvaya*

तृतीयेन तु बाणेन पृथुधारेण भास्वता जहार सुनसम् चारु भ्राजिष्णुकुण्डलम् शिरः।

tṛtīyena tu bāṇena pṛthudhāreṇa bhāsvatā jahāra sunasam cāru bhrājiṣṇukuṇḍalam śiraḥ.

English Translation

But with the third broad-shafted luminous arrow, he severed the lovely head with a beautiful nose and splendid earrings.

०३ २७३ ०२४

शास्त्र - *śāstra*

विनिकृत्तभुजस्कन्धं कबन्धं भीमदर्शनम्।
तं हत्वा सूतमप्यस्त्रैर्जघान बलिनां वरः॥

vinikṛttabhujaskandhaṃ kabandhaṃ bhīmadarśanam.
taṃ hatvā sūtamapyastrairjaghāna balināṃ varaḥ..

अन्वय - *anvaya*

यस्मात् स्कन्धात् भुजौ विनिकृत्तौ तम् विनिकृत्तभुजस्कन्धम् कबन्धम् भीमदर्शनम् हत्वा बलिनाम् वरः जघान सूतम् अपि अस्त्रैः।

yasmāt skandhāt bhujau vinikṛttau tam vinikṛttabhujaskandham kabandham bhīmadarśanam hatvā balinām varaḥ jaghāna sūtam api astraiḥ.

English Translation

Having killed that frightful-looking headless trunk whose arms were cut off from the shoulders, the best amongst the mighty also slayed the charioteer with arrows.

०३ २७३ ०२५

शास्त्र - *śāstra*

लङ्कां प्रवेशयामासुर्वाजिनस्तं रथं तदा।
ददर्श रावणस्तं च रथं पुत्रविनाकृतम्॥

laṅkāṃ praveśayāmāsurvājinastaṃ rathaṃ tadā.
dadarśa rāvaṇastaṃ ca rathaṃ putravinākṛtam..

अन्वय - *anvaya*

लङ्काम् प्रवेशयामासुः वाजिनः तम् रथम् तदा। रावणः च ददर्श तम् रथम् पुत्रविनाकृतम्।

laṅkām praveśayāmāsuḥ vājinaḥ tam ratham tadā.
rāvaṇaḥ ca dadarśa tam ratham putravinākṛtam.

English Translation

Then, the horses entered Laṅkā with that chariot, and Rāvaṇa saw that chariot that was made sonless.

०३ २७३ ०२६

शास्त्र - *śāstra*

स पुत्रं निहतं दृष्ट्वा त्रासात्संभ्रान्तलोचनः।
रावणः शोकमोहार्तो वैदेहीं हन्तुमुद्यतः॥

sa putraṃ nihataṃ dṛṣṭvā trāsātsaṃbhrāntalocanaḥ.
rāvaṇaḥ śokamohārto vaidehīṃ hantumudyataḥ..

अन्वय - *anvaya*

निहतम् पुत्रम् दृष्ट्वा सः त्रासात् सम्भ्रान्तलोचनः रावणः शोकमोहार्तः वैदेहीम् हन्तुम् उद्यतः।

nihatam putram dṛṣṭvā saḥ trāsāt sambhrāntalocanaḥ rāvaṇaḥ śokamohārtaḥ vaidehīm hantum udyataḥ.

English Translation

Having seen the lost son, the anguished, perplexed and pained Rāvaṇa, whose eyes were filled with agitation from terror, rose to kill Vaidehī.

०३ २७३ ०२७

शास्त्र - *śāstra*

अशोकवनिकास्थां तां रामदर्शनलालसाम्।
खड्गमादाय दुष्टात्मा जवेनाभिपपात ह॥

aśokavanikāsthāṃ tāṃ rāmadarśanalālasām.
khaḍgamādāya duṣṭātmā javenābhipapāta ha..

अन्वय - *anvaya*

खड्गम् आदाय दुष्टात्मा रावणः जवेन अभिपपात ह अशोकवनिकास्थाम् ताम् रामदर्शनलालसाम् सीताम्।

khaḍgam ādāya duṣṭātmā rāvaṇaḥ javena abhipapāta ha aśokavanikāsthām tām rāmadarśanalālasām sītām.

English Translation

Having taken a sword, the evil-minded Rāvaṇa swiftly rushed towards her, who was situated in the Aśoka groves, desirous of seeing Rāma.

०३ २७३ ०२८

शास्त्र - *śāstra*

तं दृष्ट्वा तस्य दुर्बुद्धेरविन्ध्यः पापनिश्चयम्।
शमयामास संक्रुद्धं श्रूयतां येन हेतुना॥

taṃ dṛṣṭvā tasya durbuddheravindhyaḥ pāpaniścayam.
śamayāmāsa saṃkruddhaṃ śrūyatāṃ yena hetunā..

अन्वय - *anvaya*

तम् दृष्ट्वा अविन्ध्यः तस्य दुर्बुद्धेः पापनिश्चयम् संक्रुद्धम् शमयामास। श्रूयताम् येन हेतुना।

tam dṛṣṭvā avindhyaḥ tasya durbuddheḥ pāpaniścayam saṃkruddham śamayāmāsa. śrūyatām yena hetunā.

English Translation

Seeing him angry and having evil purposes in his mind, Avindhya calmed him. Let the reason be heard.

०३ २७३ ०२९

शास्त्र - *śāstra*

महाराज्ये स्थितो दीप्ते न स्त्रियं हन्तुमर्हसि।
हतैवैषा यदा स्त्री च बन्धनस्था च ते गृहे॥

mahārājye sthito dīpte na striyaṃ hantumarhasi.
hataivaiṣā yadā strī ca bandhanasthā ca te gṛhe..

अन्वय - *anvaya*

महाराज्ये दीप्ते स्थितः न स्त्रियम् हन्तुम् अर्हसि हता बन्धनस्था च एव एषा यदा स्त्री ते गृहे च।

mahārājye dīpte sthitaḥ na striyam hantum arhasi
hatā bandhanasthā ca eva eṣā yadā strī te gṛhe ca.

English Translation

“You, while being situated in a splendid kingdom, should not deign to kill a woman

and certainly when the woman is staying bound and killed in your house."

०३ २७३ ०३०

शास्त्र - *śāstra*

न चैषा देहभेदेन हता स्यादिति मे मतिः।
जहि भर्तारमेवास्या हते तस्मिन्हता भवेत्॥

na caiṣā dehabhedena hatā syāditi me matiḥ.
jahi bhartāramevāsyā hate tasminhatā bhavet..

अन्वय - *anvaya*

न च एषा देहभेदेन हता स्यात् इति मे मतिः। जहि भर्तारम् एव। हते तस्मिन् अस्या हता भवेत्।

na ca eṣā dehabhedena hatā syāt iti me matiḥ. jahi bhartāram eva. hate tasmin asyā hatā bhavet.

English Translation

"And she shall not be killed by injury of body. You kill her husband only. When he is killed, it shall be the death of her."

०३ २७३ ०३१

शास्त्र - *śāstra*

न हि ते विक्रमे तुल्यः साक्षादपि शतक्रतुः।
असकृद्धि त्वया सेन्द्रास्त्रासितास्त्रिदशा युधि॥

na hi te vikrame tulyaḥ sākṣādapi śatakratuḥ.
asakṛddhi tvayā sendrāstrāsitāstridaśā yudhi..

अन्वय - *anvaya*

न हि ते विक्रमे तुल्यः साक्षात् अपि शतक्रतुः इन्द्रः। असकृत् हि त्वया सेन्द्राः त्रिदशाः युधि त्रासिताः।

na hi te vikrame tulyaḥ sākṣāt api śatakratuḥ indraḥ. asakṛt hi tvayā sendrāḥ trayastriṃśataḥ yudhi trāsitāḥ.

English Translation

"Even Indra himself is not equal to you in terms of your strength. In battle, you have repeatedly frightened the thirty gods, including Indra."

०३ २७३ ०३२

शास्त्र - *śāstra*

एवं बहुविधैर्वाक्यैरविन्ध्यो रावणं तदा।
क्रुद्धं संशमयामास जगृहे च स तद्वचः॥

evaṃ bahuvidhairvākyairavindhyo rāvaṇaṃ tadā. kruddhaṃ saṃśamayāmāsa jagṛhe ca sa tadvacaḥ..

अन्वय - *anvaya*

एवम् बहुविधैः वाक्यैः अविन्ध्यः रावणम् तदा क्रुद्धम् संशमयामास जगृहे च सः तद् वचः।

evam bahuvidhaiḥ vākyaiḥ avindhyaḥ rāvaṇam tadā kruddham saṃśamayāmāsa jagṛhe ca saḥ tad vacaḥ.

English Translation

At that moment, Avindya ceased angry Rāvaṇa with many such sentences, and Rāvaṇa followed those words.

०३ २७३ ०३३

शास्त्र - *śāstra*

निर्याणे स मतिं कृत्वा निधायासिं क्षपाचरः।
आज्ञापयामास तदा रथो मे कल्प्यतामिति॥

niryāṇe sa matiṃ kṛtvā nidhāyāsiṃ kṣapācaraḥ.
ājñāpayāmāsa tadā ratho me kalpyatāmiti..

अन्वय - *anvaya*

निर्याणे मतिम् कृत्वा असिम् निधाय सः क्षपाचरः तदा आज्ञापयामास रथः मे कल्प्यताम् इति।

niryāṇe matim kṛtvā asim nidhāya saḥ kṣapācaraḥ tadā ājñāpayāmāsa rathaḥ me kalpyatām iti.

English Translation

Having decided to go out and having put the sword down, the demon commanded - "My chariot must be prepared."

— १८ —

०३ २७४

असतो मा सद्गमय।
तमसो मा ज्योतिर्गमय।
मृत्योर्मामृतं गमय॥
ॐ शान्तिः शान्तिः शान्तिः॥

०३ २७४ ००१

शास्त्र - *śāstra*

मार्कण्डेय उवाच।
ततः क्रुद्धो दशग्रीवः प्रिये पुत्रे निपातिते।
निर्ययौ रथमास्थाय हेमरत्नविभूषितम्॥

mārkaṇḍeya uvāca.
tataḥ kruddho daśagrīvaḥ priye putre nipātite.
niryayau rathamāsthāya hemaratnavibhūṣitam..

अन्वय - *anvaya*

प्रिये पुत्रे निपातिते ततः क्रुद्धः दशग्रीवः रथम् हेमरत्नविभूषितम् आस्थाय निर्ययौ।

priye putre nipātite tataḥ kruddhaḥ daśagrīvaḥ ratham hemaratnavibhūṣitam āsthāya niryayau.

English Translation

Mārkaṇḍeya said: When the beloved son was killed, the angry Daśagrīva mounted a chariot adorned with gold and jewels and went out.

०३ २७४ ००२

शास्त्र - *śāstra*

संवृतो राक्षसैर्घोरैर्विविधायुधपाणिभिः।
अभिदुद्राव रामं स पोथयन्हरियूथपान्॥

saṃvṛto rākṣasairghorairvividhāyudhapāṇibhiḥ.
abhidudrāva rāmaṃ sa pothayanhariyūthapān..

अन्वय - *anvaya*

संवृतः राक्षसैः घोरैः विविधायुधपाणिभिः सः रावणः पोथयन् हरियूथनाथान् रामम् अभिदुद्राव।

saṃvṛtaḥ rākṣasaiḥ ghoraiḥ vividhāyudhapāṇibhiḥ saḥ rāvaṇaḥ pothayan hariyūthanāthān rāmam abhidudrāva.

English Translation

He, protected by frightful demons, ran towards Rāma, crushing leaders of herds of monkeys.

०३ २७४ ००३

शास्त्र - *śāstra*

तमाद्रवन्तं संक्रुद्धं मैन्दनीलनलाङ्गदाः।
हनूमाञ्जाम्बवांश्चैव ससैन्याः पर्यवारयन्॥

tamādravantaṃ saṃkruddhaṃ maindanīlanalāṅgadāḥ.
hanūmāñjāmbavāṃścaiva sasainyāḥ paryavārayan..

अन्वय - *anvaya*

मैन्दः नीलः नलः अङ्गदः हनूमान् जाम्बवान् च एव ससैन्याः पर्यवारयन्ति तम् आद्रवन्तम् संक्रुद्धम्।

maindaḥ nīlaḥ nalaḥ aṅgadaḥ hanūmān jāmbavān ca eva sasainyāḥ paryavārayanti tam ādravantam saṃkruddham.

English Translation

Mainda, Nīla, Nala, Aṅgada, Hanūmat, and indeed Jāmbavat surrounded the one who was angrily rushing towards them along with their armies.

०३ २७४ ००४

शास्त्र - *śāstra*

ते दशग्रीवसैन्यं तदृक्षवानरयूथपाः।
द्रुमैर्विध्वंसयां चक्रुर्दशग्रीवस्य पश्यतः॥

te daśagrīvasainyaṃ tadṛkṣavānarayūthapāḥ.
drumairvidhvaṃsayāṃ cakrurdaśagrīvasya paśyataḥ..

अन्वय - *anvaya*

दशग्रीवस्य पश्यतः ते ऋक्षवानरयूथपाः तद् दशग्रीवसैन्यम् द्रुमैः विध्वंसयाञ्चक्रुः।

daśagrīvasya paśyataḥ te ṛkṣavānarayūthapāḥ tad daśagrīvasainyam drumaiḥ vidhvaṃsayāñcakruḥ.

English Translation

While he was watching, the bears and monkey leaders annihilated the army of Daśagrīva with trees.

०३ २७४ ००५

शास्त्र - *śāstra*

ततः स्वसैन्यमालोक्य वध्यमानमरातिभिः।
मायावी व्यदधान्मायां रावणो राक्षसेश्वरः॥

tataḥ svasainyamālokya vadhyamānamarātibhiḥ.
māyāvī vyadadhānmāyāṃ rāvaṇo rākṣaseśvaraḥ..

अन्वय - *anvaya*

ततः स्वसैन्यम् वध्यमानम् अरातिभिः आलोक्य मायावी रावणः राक्षसेश्वरः मायाम् व्यदधान्।

tataḥ svasainyam vadhyamānam arātibhiḥ ālokya māyāvī rāvaṇaḥ rākṣaseśvaraḥ māyām vyadadhān.

English Translation

Then, having seen his army being destroyed by enemies, the illusory lord of the demons, Rāvaṇa, granted deceptory powers to them.

०३ २७४ ००६

शास्त्र - *śāstra*

तस्य देहाद्विनिष्क्रान्ताः शतशोऽथ सहस्रशः।
राक्षसाः प्रत्यदृश्यन्त शरशक्त्यृष्टिपाणयः॥

tasya dehādviniṣkrāntāḥ śataśo'tha sahasraśaḥ.
rākṣasāḥ pratyadṛśyanta śaraśaktyṛṣṭipāṇayaḥ..

अन्वय - *anvaya*

अथ तस्य देहात् विनिष्क्रान्ताः शतशः सहस्रशः राक्षसाः शरशक्त्यृष्टिपाणयः प्रत्यदृश्यन्त।

atha tasya dehāt viniṣkrāntāḥ śataśaḥ sahasraśaḥ rākṣasāḥ śaraśaktyṛṣṭipāṇayaḥ pratyadṛśyanta.

English Translation

Thus, hundreds and thousands of demons were seen coming out from his body with their hands holding spears, arrows, and darts.

०३ २७४ ००७

शास्त्र - *śāstra*

तान्रामो जघ्निवान्सर्वान्दिव्येनास्त्रेण राक्षसान्।
अथ भूयोऽपि मायां स व्यदधाद्राक्षसाधिपः॥

tānrāmo jaghnivānsarvāndivyenāstreṇa rākṣasān.
atha bhūyo'pi māyāṃ sa vyadadhādrākṣasādhipaḥ..

अन्वय - *anvaya*

रामः जघ्निवान् तान् सर्वान् राक्षसान् दिव्येन अस्त्रेण। अथ भूयः अपि सः राक्षसाधिपः मायाम् व्यदधात्।

rāmaḥ jaghnivān tān sarvān rākṣasān divyena astreṇa. atha bhūyaḥ api saḥ rākṣasādhipaḥ māyām vyadadhāt.

English Translation

Rāma killed all those demons with a divine weapon. Then, the chief of demons again granted deceptory powers to them.

०३ २७४ ००८

शास्त्र - *śāstra*

कृत्वा रामस्य रूपाणि लक्ष्मणस्य च भारत।
अभिदुद्राव रामं च लक्ष्मणं च दशाननः॥

kṛtvā rāmasya rūpāṇi lakṣmaṇasya ca bhārata.
abhidudrāva rāmaṃ ca lakṣmaṇaṃ ca daśānanaḥ..

अन्वय - *anvaya*

भारत युधिष्ठिर रामस्य लक्ष्मणस्य च रूपाणि कृत्वा दशाननः अभिदुद्राव रामम् च लक्ष्मणम् च।

bhārata yudhiṣṭhira rāmasya lakṣmaṇasya ca rūpāṇi kṛtvā daśānanaḥ abhidudrāva rāmam ca lakṣmaṇam ca.

English Translation

O scion of Bharata! Having taken the forms of Rāma and Lakṣmaṇa, the ten-headed Rāvaṇa ran towards Rāma and Lakṣmaṇa.

०३ २७४ ००९

शास्त्र - *śāstra*

ततस्ते राममर्छन्तो लक्ष्मणं च क्षपाचराः।
अभिपेतुस्तदा राजन्प्रगृहीतोच्चकार्मुकाः॥

tataste rāmamarchanto lakṣmaṇaṃ ca kṣapācarāḥ.
abhipetustadā rājanpragṛhītoccakārmukāḥ..

अन्वय - *anvaya*

राजन् ततः तदा ते प्रगृहीतोच्चकार्मुकाः क्षपाचराः ऋच्छन्तः रामम् लक्ष्मणम् च अभिपेतुः।

rājan tataḥ tadā te pragṛhītoccakārmukāḥ kṣapācarāḥ ṛcchantaḥ rāmam lakṣmaṇam ca abhipetuḥ.

English Translation

O King! Then, at that time, those moving demons, holding their bows high, rushed towards Rāma and Lakṣmaṇa.

०३ २७४ ०१०

शास्त्र - *śāstra*

तां दृष्ट्वा राक्षसेन्द्रस्य मायामिक्ष्वाकुनन्दनः।
उवाच रामं सौमित्रिरसंभ्रान्तो बृहद्वचः॥

tāṃ dṛṣṭvā rākṣasendrasya māyāmikṣvākunandanaḥ.
uvāca rāmaṃ saumitrirasaṃbhrānto bṛhadvacaḥ..

अन्वय - *anvaya*

ताम् राक्षसेन्द्रस्य मायाम् दृष्ट्वा इक्ष्वाकुनन्दनः असम्भ्रान्तः सौमित्रिः बृहत् वचः रामम् उवाच।

tām rākṣasendrasya māyām dṛṣṭvā ikṣvākunandanaḥ asambhrāntaḥ saumitriḥ bṛhat vacaḥ rāmam uvāca.

English Translation

Having seen this delusion of the lord of demons, the unperplexed scion of Ikṣvāku and son of Sumitrā said these words loudly to Rāma.

०३ २७४ ०११

शास्त्र - *śāstra*

जहीमान्राक्षसान्पापानात्मनः प्रतिरूपकान्।
जघान रामस्तांश्चान्यानात्मनः प्रतिरूपकान्॥

jahīmānrākṣasānpāpānātmanaḥ pratirūpakān.
jaghāna rāmastāṃścānyānātmanaḥ pratirūpakān..

अन्वय - *anvaya*

जहि इमान् राक्षसान् पापान् आत्मनः प्रतिरूपकान् इति। जघान रामः तान् च अन्यान् आत्मनः प्रतिरूपकान्।

jahi imān rākṣasān pāpān ātmanaḥ pratirūpakān iti.
jaghāna rāmaḥ tān ca anyān ātmanaḥ pratirūpakān.

English Translation

"You kill these wicked demons having the appearance of yourself." And Rāma killed those others having the appearance of himself.

०३ २७४ ०१२

शास्त्र - *śāstra*

ततो हर्यश्वयुक्तेन रथेनादित्यवर्चसा।
उपतस्थे रणे रामं मातलिः शक्रसारथिः॥

tato haryaśvayuktena rathenādityavarcasā.
upatasthe raṇe rāmaṃ mātaliḥ śakrasārathiḥ..

अन्वय - *anvaya*

ततः हर्यश्वयुक्तेन रथेन आदित्यवर्चसा रणे रामम् मातलिः शक्रसारथिः उपतस्थे।

tataḥ haryaśvayuktena rathena ādityavarcasā raṇe rāmam mātaliḥ śakrasārathiḥ upatasthe.

English Translation

Then, Mātali, the charioteer of Indra, with a chariot having the lustre of the Sun and yoked

by bay horses, presented himself to Rāma in the battle.

०३ २७४ ०१३

शास्त्र - *śāstra*

मातलिरुवाच
अयं हर्यश्वयुग्जैत्रो मघोनः स्यन्दनोत्तमः।
अनेन शक्रः काकुत्स्थ समरे दैत्यदानवान्।
शतशः पुरुषव्याघ्र रथोदारेण जघ्निवान्॥

mātaliruvāca.
ayaṃ haryaśvayugjaitro maghonaḥ syandanottamaḥ.
anena śakraḥ kākutstha samare daityadānavān.
śataśaḥ puruṣavyāghra rathodāreṇa jaghnivān..

अन्वय - *anvaya*

पुरुषव्याघ्र काकुत्स्थ अयम् स्यन्दनोत्तमः हर्यश्वयुक् जैत्रः मघोनः। अनेन रथोदारेण शक्रः समरे दैत्यदानवान् शतशः जघ्निवान्।

puruṣavyāghra kākutstha ayam syandanottamaḥ haryaśvayuk jaitraḥ maghonaḥ. anena rathodāreṇa śakraḥ samare daityadānavān śataśaḥ jaghnivān.

English Translation

Mātali said: O tiger amongst man! O descendant of Kakustha! This is the excellent victorious war chariot of Indra drawn by bay horses. With this best of chariots, Indra killed hundreds of Daityas and Dānavas in battle.

०३ २७४ ०१४

शास्त्र - *śāstra*

तदनेन नरव्याघ्र मया यत्तेन संयुगे।
स्यन्दनेन जहि क्षिप्रं रावणं मा चिरं कृथाः॥

tadanena naravyāghra mayā yattena saṃyuge.
syandanena jahi kṣipraṃ rāvaṇaṃ mā ciraṃ kṛthāḥ..

अन्वय - *anvaya*

नरव्याघ्र अनेन स्यन्दनेन मया यत्तेन संयुगे जहि तद् क्षिप्रम् रावणम्। मा चिरम् कृथाः।

naravyāghra anena syandanena mayā yattena saṃyuge jahi tad kṣipram rāvaṇam. mā ciram kṛthāḥ.

English Translation

O tiger amongst men! With this chariot being yoked by me in battle, you quickly kill Rāvaṇa. Do not delay!

०३ २७४ ०१५

शास्त्र - *śāstra*

इत्युक्तो राघवस्तथ्यं वचोऽशङ्कत मातलेः।
मायेयं राक्षसस्येति तमुवाच विभीषणः॥

ityukto rāghavastathyaṃ vaco'śaṅkata mātaleḥ.
māyeyaṃ rākṣasasyeti tamuvāca vibhīṣaṇaḥ..

अन्वय - *anvaya*

इति उक्तः राघवः मातलेः तथ्यम् वचः अशङ्कत। माया इयम् राक्षसस्य इति तम् उवाच विभीषणः।

iti uktaḥ rāghavaḥ mātaleḥ tathyam vacaḥ aśaṅkata.
māyā iyam rākṣasasya iti tam uvāca vibhīṣaṇaḥ.

English Translation

Mārkaṇḍeya said: Rāghava, who was spoken to this way, suspected the truth of Mātali's words. Vibhīṣaṇa told him - "This is a deceit of the demon."

०३ २७४ ०१६

शास्त्र - *śāstra*

नेयं माया नरव्याघ्र रावणस्य दुरात्मनः।
तदातिष्ठ रथं शीघ्रमिममैन्द्रं महाद्युते॥

neyaṃ māyā naravyāghra rāvaṇasya durātmanaḥ.
tadātiṣṭha rathaṃ śīghramimamaindraṃ mahādyute..

अन्वय - *anvaya*

न इयम् माया नरव्याघ्र रावणस्य दुरात्मनः। तदा शीघ्रम् आतिष्ठ रथम् इमम् ऐन्द्रम् महाद्युते। इति मातलिः उवाच।

na iyam māyā naravyāghra rāvaṇasya durātmanaḥ. tadā śīghram ātiṣṭha ratham imam aindram mahādyute. iti mātaliḥ uvāca.

English Translation

Mātali said - "O glorious one! This is not an illusion of the evil Rāvaṇa. In that case, quickly mount this chariot of Indra."

०३ २७४ ०१७

शास्त्र - *śāstra*

ततः प्रहृष्टः काकुत्स्थस्तथेत्युक्त्वा विभीषणम्।
रथेनाभिपपाताशु दशग्रीवं रुषान्वितः॥

tataḥ prahṛṣṭaḥ kākutsthastathetyuktvā vibhīṣaṇam.
rathenābhipapātāśu daśagrīvaṃ ruṣānvitaḥ..

अन्वय - *anvaya*

ततः तथा इति विभीषणम् उक्त्वा रथेन आशु अभिपपात दशग्रीवम् प्रहृष्टः काकुत्स्थः रुषान्वितः।

tataḥ tathā iti vibhīṣaṇam uktvā rathena āśu abhipapāta daśagrīvam prahṛṣṭaḥ kākutsthaḥ ruṣānvitaḥ.

English Translation

Then, having said "Yes" to Vibhīṣaṇa, the delighted descendant of Kakustha quickly rushed towards Rāvaṇa, filled with anger.

०३ २७४ ०१८

शास्त्र - *śāstra*

हाहाकृतानि भूतानि रावणे समभिद्रुते।
सिंहनादाः सपटहा दिवि दिव्याश्च नानदन्॥

hāhākṛtāni bhūtāni rāvaṇe samabhidrute.
siṃhanādāḥ sapaṭahā divi divyāśca nānadan..

अन्वय - *anvaya*

रावणे समभिद्रुते हाहाकृतानि भूतानि सिंहनादाः च सपटहाः दिव्याः दिवि अनानदन्।

rāvaṇe samabhidrute hāhākṛtāni bhūtāni siṃhanādāḥ ca sapaṭahāḥ divyāḥ divi anānadan.

English Translation

When Rāvaṇa was attacked, crying beings, divine lions and war drums violently howled in the sky.

०३ २७४ ०१९

शास्त्र - *śāstra*

स रामाय महाघोरं विससर्ज निशाचरः।
शूलमिन्द्राशनिप्रख्यं ब्रह्मदण्डमिवोद्यतम्॥

sa rāmāya mahāghoraṃ visasarja niśācaraḥ.
śūlamindrāśaniprakhyaṃ brahmadaṇḍamivodyatam..

अन्वय - *anvaya*

सः निशाचरः रामाय महाघोरम् विससर्ज शूलम् इन्द्राशनिप्रख्यम् ब्रह्मदण्डम् इव उद्यतम्।

saḥ niśācaraḥ rāmāya mahāghoram visasarja śūlam indrāśaniprakhyam brahmadaṇḍam iva udyatam.

English Translation

The demon shot a dreadful spear for Rāma like Indra's thunderbolt and an elevated staff of Brahmā.

०३ २७४ ०२०

शास्त्र - *śāstra*

तच्छूलमन्तरा रामश्चिच्छेद निशितैः शरैः।
तद्दृष्ट्वा दुष्करं कर्म रावणं भयमाविशत्॥

tacchūlamantarā rāmaścicchеda niśitaiḥ śaraiḥ.
taddṛṣṭvā duṣkaraṃ karma rāvaṇaṃ bhayamāviśat..

अन्वय - *anvaya*

तद् शूलम् अन्तरा रामः चिच्छेद निशितैः शरैः। तद् दुष्करम् कर्म दृष्ट्वा रावणम् भयम् आविशत्।

tad śūlam antarā rāmaḥ cicchеda niśitaiḥ śaraiḥ. tad duṣkaram karma dṛṣṭvā rāvaṇam bhayam āviśat.

English Translation

Rāma cut that spear in the middle with sharp arrows. Fear entered Rāvaṇa, seeing that difficult action.

०३ २७४ ०२१

शास्त्र - *śāstra*

ततः क्रुद्धः ससर्जाशु दशग्रीवः शिताञ्शरान्।
सहस्रायुतशो रामे शस्त्राणि विविधानि च॥

tataḥ kruddhaḥ sasarjāśu daśagrīvaḥ śitāñśarān.
sahasrāyutaśo rāme śastrāṇi vividhāni ca..

अन्वय - *anvaya*

ततः क्रुद्धः दशग्रीवः ससर्ज आशु रामे शितान् शरान् सहस्रायुतशः शस्त्राणि विविधानि च।

tataḥ kruddhaḥ daśagrīvaḥ sasarja āśu rāme śitān śarān sahasrāyutaśaḥ śastrāṇi vividhāni ca.

English Translation

Then, the angry Daśagrīva discharged myriads of thousands of sharp arrows and various weapons on Rāma.

०३ २७४ ०२२

शास्त्र - *śāstra*

ततो भुशुण्डीः शूलांश्च मुसलानि परश्वधान्।
शक्तीश्च विविधाकाराः शतघ्नीश्च शितक्षुराः॥

tato bhuśuṇḍīḥ śūlāṃśca musalāni paraśvadhān.
śaktīśca vividhākārāḥ śataghnīśca śitakṣurāḥ..

अन्वय - *anvaya*

ततः भुशुण्डीः शूलान् मुसलानि परश्वधान् शक्तीः विविधाकाराः शतघ्नीः शितक्षुराः।

tataḥ bhuśuṇḍīḥ śūlān musalāni paraśvadhān śaktīḥ vividhākārāḥ śataghnīḥ śitakṣurāḥ.

English Translation

Then Bhuśuṇḍi, spears, maces, axes, darts, differently shaped deadly weapons, and bladed arrows.

०३ २७४ ०२३

शास्त्र - *śāstra*

तां मायां विकृतां दृष्ट्वा दशग्रीवस्य रक्षसः।
भयात्प्रदुद्रुवुः सर्वे वानराः सर्वतोदिशम्॥

tāṃ māyāṃ vikṛtāṃ dṛṣṭvā daśagrīvasya rakṣasaḥ.
bhayātpradudruvuḥ sarve vānarāḥ sarvatodiśam..

अन्वय - *anvaya*

ताम् मायाम् विकृताम् दृष्ट्वा सर्वे वानराः सर्वतोदिशम् दशग्रीवस्य रक्षसः भयात् प्रदुद्रुवुः।

tām māyām vikṛtām dṛṣṭvā sarve vānarāḥ sarvatodiśam daśagrīvasya rakṣasaḥ bhayāt pradudruvuḥ.

English Translation

Having seen such a transforming illusion, all the monkeys fled in every direction out of fear of the ten-headed demon.

०३ २७४ ०२४

शास्त्र - *śāstra*

ततः सुपत्रं सुमुखं हेमपुङ्खं शरोत्तमम्।
तूणादादाय काकुत्स्थो ब्रह्मास्त्रेण युयोज ह॥

tataḥ supatraṃ sumukhaṃ hemapuṅkhaṃ śarottamam.
tūṇādādāya kākutstho brahmāstreṇa yuyoja ha..

अन्वय - *anvaya*

ततः सुपत्रम् सुमुखम् हेमपुङ्खम् शरोत्तमम् तूणात् आदाय काकुत्स्थः ब्रह्मास्त्रेण युयोज ह।

tataḥ supattram sumukham hemapuṅkham śarottamam tūṇāt ādāya kākutsthaḥ brahmāstreṇa yuyoja ha.

English Translation

Then, having taken a well-pointed, well-feathered gold-feathered best of the arrows from the quiver, the descendant of Kakustha harnessed it with a Brahmāstra.

०३ २७४ ०२५

शास्त्र - *śāstra*

तं बाणवर्यं रामेण ब्रह्मास्त्रेणाभिमन्त्रितम्।
जहृषुर्देवगन्धर्वा दृष्ट्वा शक्रपुरोगमाः॥

taṃ bāṇavaryaṃ rāmeṇa brahmāstreṇābhimantritam.
jahṛṣurdevagandharvā dṛṣṭvā śakrapurogamāḥ..

अन्वय - *anvaya*

रामेण ब्रह्मास्त्रेण तम् बाणवर्यम् अभिमन्त्रितम् दृष्ट्वा देवगन्धर्वाः शक्रपुरोगमाः जहृषुः।

rāmeṇa brahmāstreṇa tam bāṇavaryam abhimantritam dṛṣṭvā devagandharvāḥ śakrapurogamāḥ jahṛṣuḥ.

English Translation

Seeing the best of arrows consecrated with Brahmāstra by Rāma, the Gods and the Gandharvas headed by Indra rejoiced.

०३ २७४ ०२६

शास्त्र - *śāstra*

अल्पावशेषमायुश्च ततोऽमन्यन्त रक्षसः।
ब्रह्मास्त्रोदीरणाच्छत्रोर्देवगन्धर्वकिंनराः॥

alpāvaśeṣamāyuśca tato'manyanta rakṣasaḥ.
brahmāstrodīraṇācchatrordevagandharvakiṃnarāḥ..

अन्वय - *anvaya*

ततः च रक्षसः अल्पावशेषम् आयुः ब्रह्मास्त्रोदीरणात् शत्रोः देवगन्धर्वकिंनराः अमन्यन्त।

tataḥ ca rakṣasaḥ alpāvaśeṣam āyuḥ brahmāstrodīraṇāt śatroḥ devagandharvakiṃnarāḥ amanyanta.

English Translation

Thus, the Devas, Gandharvas, and Kiṃnaras thought that very little life was left of that demon due to the discharging of Brahmāstra by his enemy.

०३ २७४ ०२७

शास्त्र - *śāstra*

ततः ससर्ज तं रामः शरमप्रतिमौजसम्।
रावणान्तकरं घोरं ब्रह्मदण्डमिवोद्यतम्॥

tataḥ sasarja taṃ rāmaḥ śaramapratimaujasam.
rāvaṇāntakaraṃ ghoraṃ brahmadaṇḍamivodyatam..

अन्वय - *anvaya*

ततः रामः ससर्ज तम् शरम् अप्रतिमौजसम् रावणान्तकरम् घोरम् ब्रह्मदण्डम् इव उद्यतम्।

tataḥ rāmaḥ sasarja tam śaram apratimaujasam rāvaṇāntakaram ghoram brahmadaṇḍam iva udyatam.

English Translation

Then, Rāma discharged that terrific arrow, doer of Rāvaṇa's death and looking like a

raised staff of Lord Brahmā, with unparalleled brilliance.

०३ २७४ ०२८

शास्त्र - *śāstra*

स तेन राक्षसश्रेष्ठः सरथः साश्वसारथिः।
प्रजज्वाल महाज्वालेनाग्निनाभिपरिष्कृतः॥

sa tena rākṣasaśreṣṭhaḥ sarathaḥ sāśvasārathiḥ.
prajajvāla mahājvālenāgninābhipariṣkṛtaḥ..

अन्वय - *anvaya*

तेन सः राक्षसश्रेष्ठः सरथः साश्वसारथिः महाज्वालेन अग्निना अभिपरिष्कृतः प्रजज्वाल।

tena saḥ rākṣasaśreṣṭhaḥ sarathaḥ sāśvasārathiḥ mahājvālena agninā abhipariṣkṛtaḥ prajajvāla.

English Translation

With that, the best of demons, his chariot, charioteer, and horses, flamed up surrounded with a blazingly great fire.

०३ २७४ ०२९

शास्त्र - *śāstra*

ततः प्रहृष्टास्त्रिदशाः सगन्धर्वाः सचारणाः।
निहतं रावणं दृष्ट्वा रामेणाक्लिष्टकर्मणा॥

tataḥ prahṛṣṭāstridaśāḥ sagandharvāḥ sacāraṇāḥ.
nihataṃ rāvaṇaṃ dṛṣṭvā rāmeṇāklisṭakarmaṇā..

अन्वय - *anvaya*

ततः निहतम् रावणम् दृष्ट्वा प्रहृष्टाः त्रिदशाः सगन्धर्वाः सचारणाः रामेण अक्लिष्टकर्मणा।

tataḥ nihatam rāvaṇam dṛṣṭvā prahṛṣṭāḥ trayatriṃśataḥ sagandharvāḥ sacāraṇāḥ rāmeṇa akliṣṭakarmaṇā.

English Translation

Then, having seen the slayed Rāvaṇa, the thirty Gods with Gandharvas and Cāraṇas rejoiced by Rāma's unparalleled task.

०३ २७४ ०३०

शास्त्र - *śāstra*

तत्यजुस्तं महाभागं पञ्च भूतानि रावणम्।
भ्रंशितः सर्वलोकेषु स हि ब्रह्मास्त्रतेजसा॥

tatyajustaṃ mahābhāgaṃ pañca bhūtāni rāvaṇam.
bhraṃśitaḥ sarvalokeṣu sa hi brahmāstratejasā..

अन्वय - *anvaya*

पञ्च भूतानि तत्यजुः तम् महाभागम् रावणम्। भ्रंशितः सर्वलोकेषु सः हि ब्रह्मास्त्रतेजसा।

pañca bhūtāni tatyajuḥ tam mahābhāgam rāvaṇam.
bhraṃśitaḥ sarvalokeṣu saḥ hi brahmāstratejasā.

English Translation

The five elements abandoned the prosperous Rāvaṇa. He indeed was fallen in all the worlds by the brilliance of the Brahmāstra.

०३ २७४ ०३१

शास्त्र - *śāstra*

शरीरधातवो ह्यस्य मांसं रुधिरमेव च।
नेशुर्ब्रह्मास्त्रनिर्दग्धा न च भस्माप्यदृश्यत॥

śarīradhātavo hyasya māṃsaṃ rudhirameva ca.
neśurbrahmāstranirdagdhā na ca bhasmāpyadṛśyata..

अन्वय - *anvaya*

शरीरधातवः हि अस्य मांसम् रुधिरम् एव च नेशुः ब्रह्मास्त्रनिर्दग्धाः न च भस्म अपि अदृश्यत।

śarīradhātavaḥ hi asya māṃsam rudhiram eva ca neśuḥ brahmāstranirdagdhāḥ na ca bhasma api adṛśyata.

English Translation

The elements of his body, flesh, and blood were also all destroyed and completely burnt by Brahmāstra, and even the ashes were not visible.

— १९ —

०३ २७५

असतो मा सद्गमय।
तमसो मा ज्योतिर्गमय।
मृत्योर्मामृतं गमय॥
ॐ शान्तिः शान्तिः शान्तिः॥

०३ २७५ ००१

शास्त्र - *śāstra*

मार्कण्डेय उवाच।
स हत्वा रावणं क्षुद्रं राक्षसेन्द्रं सुरद्विषम्।
बभूव हृष्टः ससुहृद्रामः सौमित्रिणा सह॥

mārkaṇḍeya uvāca.
sa hatvā rāvaṇaṃ kṣudraṃ rākṣasendraṃ suradviṣam.
babhūva hṛṣṭaḥ sasuhṛdrāmaḥ saumitriṇā saha..

अन्वय - *anvaya*

रावणम् क्षुद्रम् राक्षसेन्द्रम् सुरद्विषम् हत्वा सः ससुहृत् रामः सौमित्रिणा सह हृष्टः बभूव।

rāvaṇam kṣudram rākṣasendram suradviṣam hatvā saḥ sasuhṛt rāmaḥ saumitriṇā saha hṛṣṭaḥ babhūva.

English Translation

Mārkaṇḍeya said: Having slain the vile God-hating lord of the demons, Rāma, along with Lakṣmaṇa and their friends, was delighted.

०३ २७५ ००२

शास्त्र - *śāstra*

ततो हते दशग्रीवे देवाः सर्षिपुरोगमाः।
आशीर्भिर्जययुक्ताभिरानर्चुस्तं महाभुजम्॥

tato hate daśagrīve devāḥ sarṣipurogamāḥ.
āśīrbhirjayayuktābhirānarcustaṃ mahābhujam..

अन्वय - *anvaya*

ततः हते दशग्रीवे देवाः सर्षिपुरोगमाः आशीर्भिः जययुक्ताभिः आनर्चुः तम् महाभुजम्।

tataḥ hate daśagrīve devāḥ sarṣipurogamāḥ āśīrbhiḥ jayayuktābhiḥ ānarcuḥ tam mahābhujam.

English Translation

Then, when the ten-headed demon was killed, the Gods, accompanied by Ṛṣis, praised the one having long arms.

०३ २७५ ००३

शास्त्र - *śāstra*

रामं कमलपत्राक्षं तुष्टुवुः सर्वदेवताः।
गन्धर्वाः पुष्पवर्षैश्च वाग्भिश्च त्रिदशालयाः॥

rāmaṃ kamalapatrākṣaṃ tuṣṭuvuḥ sarvadevatāḥ.
gandharvāḥ puṣpavarṣaiśca vāgbhiśca tridaśālayāḥ..

अन्वय - *anvaya*

रामम् कमलपत्राक्षम् तुष्टुवुः सर्वदेवताः गन्धर्वाः त्रिदशालयाः पुष्पवर्षैः च वाग्भिः च।

rāmam kamalapatrākṣam tuṣṭuvuḥ sarvadevatāḥ
gandharvāḥ tridaśālayāḥ puṣpavarṣaiḥ ca vāgbhiḥ ca.

English Translation

All the Gods and Gandharvas living in heaven praised Rāma, whose eyes were like lotus leaves, with a shower of flowers and good words.

०३ २७५ ००४

शास्त्र - *śāstra*

पूजयित्वा यथा रामं प्रतिजग्मुर्यथागतम्।
तन्महोत्सवसंकाशमासीदाकाशमच्युत॥

pūjayitvā yathā rāmaṃ pratijagmuryathāgatam.
tanmahotsavasaṃkāśamāsīdākāśamacyuta..

अन्वय - *anvaya*

अच्युत यथा रामम् पूजयित्वा यथागतम् प्रतिजग्मुः। तद् आकाशम् महोत्सवसंकाशम् आसीत्।

acyuta yathā rāmam pūjayitvā yathāgatam pratijagmuḥ. tad ākāśam mahotsavasaṃkāśam āsīt.

English Translation

O imperishable one! Having honoured Rāma accordingly, they went from wherever they came. The sky resembled a great festival.

०३ २७५ ००५

शास्त्र - *śāstra*

ततो हत्वा दशग्रीवं लङ्कां रामो महायशाः।
विभीषणाय प्रददौ प्रभुः परपुरंजयः॥

tato hatvā daśagrīvaṃ laṅkāṃ rāmo mahāyaśāḥ.
vibhīṣaṇāya pradadau prabhuḥ parapuraṃjayaḥ..

अन्वय - *anvaya*

ततः दशग्रीवम् लङ्काम् हत्वा रामः प्रभुः महायशाः परपुरंजयः विभीषणाय प्रददौ।

tataḥ daśagrīvam laṅkām hatvā rāmaḥ prabhuḥ mahāyaśāḥ parapuraṃjayaḥ vibhīṣaṇāya pradadau.

English Translation

Then, having killed Daśagrīva in Laṅkā, the celebrated victor of a foreign city, Lord Rāma, gave it away to Vibhīṣaṇa.

०३ २७५ ००६

शास्त्र - *śāstra*

ततः सीतां पुरस्कृत्य विभीषणपुरस्कृताम्।
अविन्ध्यो नाम सुप्रज्ञो वृद्धामात्यो विनिर्ययौ॥

tataḥ sītāṃ puraskṛtya vibhīṣaṇapuraskṛtām.
avindhyo nāma suprajño vṛddhāmātyo viniryayau..

अन्वय - *anvaya*

ततः विभीषणपुरस्कृताम् सीताम् पुरस्कृत्य अविन्ध्यः नाम सुप्रज्ञः वृद्धामात्यः विनिर्ययौ।

tataḥ vibhīṣaṇapuraskṛtām sītām puraskṛtya avindhyaḥ nāma suprajñaḥ vṛddhāmātyaḥ viniryayau.

English Translation

Then, having honoured Sītā, who was accompanied by Vibhīṣaṇa, the very wise elderly minister named Avindhya came forth.

०३ २७५ ००७

शास्त्र - *śāstra*

उवाच च महात्मानं काकुत्स्थं दैन्यमास्थितम्।
प्रतीच्छ देवीं सद्वृत्तां महात्मञ्जानकीमिति॥

uvāca ca mahātmānaṃ kākutsthaṃ dainyamāsthitam.
pratīccha devīṃ sadvṛttāṃ mahātmañjānakīmiti..

अन्वय - *anvaya*

सः उवाच च महात्मानम् काकुत्स्थम् दैन्यम् आस्थितम्। प्रतीच्छ देवीम् सद्वृत्ताम् महात्मन् जानकीम् इति।

saḥ uvāca ca mahātmānam kākutstham dainyam āsthitam. pratīccha devīm sadvṛttām mahātman jānakīm iti.

English Translation

And he said this to the great soul Rāma, who was in misery - "O noble man! May you accept the well-conducted queen Jānakī."

०३ २७५ ००८

शास्त्र - *śāstra*

एतच्छ्रुत्वा वचस्तस्मादवतीर्य रथोत्तमात्।
बाष्पेणापिहितां सीतां ददर्शेक्ष्वाकुनन्दनः॥

etacchrutvā vacastasmādavatīrya rathottamāt.
bāṣpeṇāpihitāṃ sītāṃ dadarśekṣvākunandanaḥ..

अन्वय - *anvaya*

एतद् वचः श्रुत्वा तस्मात् रथोत्तमात् अवतीर्य बाष्पेण अपिहिताम् सीताम् ददर्श इक्ष्वाकुनन्दनः।

etad vacaḥ śrutvā tasmāt rathottamāt avatīrya bāṣpeṇa apihitām sītām dadarśa ikṣvākunandanaḥ.

English Translation

Having heard these words and descending from that best of the chariots, the scion of Ikṣvāku, Rāma, saw Sītā, covered with tears.

०३ २७५ ००९

शास्त्र - *śāstra*

तां दृष्ट्वा चारुसर्वाङ्गीं यानस्थां शोककर्शिताम्।
मलोपचितसर्वाङ्गीं जटिलां कृष्णवाससम्॥

tāṃ dṛṣṭvā cārusarvāṅgīṃ yānasthāṃ śokakarśitām.
malopacitasarvāṅgīṃ jaṭilāṃ kṛṣṇavāsasam..

अन्वय - *anvaya*

ताम् चारुसर्वाङ्गीम् यानस्थाम् शोककर्शिताम् मलोपचितसर्वाङ्गीम् जटिलाम् कृष्णवाससम् ददर्श।

tām cārusarvāṅgīm yānasthām śokakarśitām malopacitasarvāṅgīm jaṭilām kṛṣṇavāsasam dadarśa.

English Translation

He saw her, whose every limb was beautiful, situated in a Yāna, having become thin from sorrow, hair twisted together, and in dark clothes.

०३ २७५ ०१०

शास्त्र - *śāstra*

उवाच रामो वैदेहीं परामर्शविशङ्कितः।
गच्छ वैदेहि मुक्ता त्वं यत्कार्यं तन्मया कृतम्॥

uvāca rāmo vaidehīṃ parāmarśaviśaṅkitaḥ.
gaccha vaidehi muktā tvaṃ yatkāryaṃ tanmayā kṛtam..

अन्वय - *anvaya*

उवाच रामः परामर्शविशङ्कितः वैदेहीम्। वैदेहि गच्छ। मुक्ता त्वम्। यद् कार्यम् तद् मया कृतम्।

uvāca rāmaḥ parāmarśaviśaṅkitaḥ vaidehīm. vaidehi gaccha. muktā tvam. yad kāryam tad mayā kṛtam.

English Translation

Rāma, uncertain of violation, said this to Vaidehī - "O Vaidehī! Go. You have been freed. Whatever was supposed to be done has been done by me."

०३ २७५ ०११

शास्त्र - *śāstra*

मामासाद्य पतिं भद्रे न त्वं राक्षसवेश्मनि।
जरां व्रजेथा इति मे निहतोऽसौ निशाचरः॥

māmāsādya patiṃ bhadre na tvaṃ rākṣasaveśmani.
jarāṃ vrajethā iti me nihato'sau niśācaraḥ..

अन्वय - *anvaya*

माम् पतिम् आसाद्य भद्रे न त्वम् राक्षसवेश्मनि जराम् व्रजेथाः। मे निहतः असौ निशाचरः।

mām patim āsādya bhadre na tvam rākṣasaveśmani jarām vrajethāḥ. me nihataḥ asau niśācaraḥ.

English Translation

"O good lady! Having obtained me as your husband, you shall not grow old in the mansion of a demon. I have killed this demon."

०३ २७५ ०१२

शास्त्र - *śāstra*

कथं ह्यस्मद्विधो जातु जानन्धर्मविनिश्चयम्।
परहस्तगतां नारीं मुहूर्तमपि धारयेत्॥

kathaṃ hyasmadvidho jātu jānandharmaviniścayam.
parahastagatāṃ nārīṃ muhūrtamapi dhārayet..

अन्वय - *anvaya*

कथम् हि अस्मद्विधः जातु जानन् धर्मविनिश्चयम् परहस्तगताम् नारीम् मुहूर्तम् अपि धारयेत्।

katham hi asmadvidhaḥ jātu jānan dharmaviniścayam parahastagatām nārīm muhūrtam api dhārayet.

English Translation

"How, indeed, does someone who is a knower of firm resolution of righteousness carry a woman who was being in the hands of another person even for a moment?"

०३ २७५ ०१३

शास्त्र - *śāstra*

सुवृत्तामसुवृत्तां वाप्यहं त्वामद्य मैथिलि।
नोत्सहे परिभोगाय श्वावलीढं हविर्यथा॥

suvṛttāmasuvṛttāṃ vāpyahaṃ tvāmadya maithili.
notsahe paribhogāya śvāvalīḍhaṃ haviryathā..

अन्वय - *anvaya*

सुवृत्ताम् असुवृत्ताम् वा अपि अहम् त्वाम् अद्य मैथिलि न उत्सहे परिभोगाय शुना अवलीढम् हविः यथा।

suvṛttām asuvṛttām vā api aham tvām adya maithili
na utsahe paribhogāya śunā avalīḍham haviḥ yathā.

English Translation

"O Maithilī! Virtuous or even unvirtuous, I cannot bear you for enjoyment today, just like an oblation licked by a dog."

०३ २७५ ०१४

शास्त्र - *śāstra*

ततः सा सहसा बाला तच्छ्रुत्वा दारुणं वचः।
पपात देवी व्यथिता निकृत्ता कदली यथा॥

tataḥ sā sahasā bālā tacchrutvā dāruṇaṃ vacaḥ.
papāta devī vyathitā nikṛttā kadalī yathā..

अन्वय - *anvaya*

ततः तद् दारुणम् वचः श्रुत्वा सा देवी बाला पपात सहसा व्यथिता निकृत्ता कदली यथा।

tataḥ tad dāruṇam vacaḥ śrutvā sā devī bālā papāta
sahasā vyathitā nikṛttā kadalī yathā.

English Translation

Then, having heard those harsh words, the young princess immediately fell to the ground just like a cut banana tree.

०३ २७५ ०१५

शास्त्र - *śāstra*

यो ह्यस्या हर्षसंभूतो मुखरागस्तदाभवत्।
क्षणेन स पुनर्भ्रष्टो निःश्वासादिव दर्पणे॥

yo hyasyā harṣasaṃbhūto mukharāgastadābhavat.
kṣaṇena sa punarbhraṣṭo niḥśvāsādiva darpaṇe..

अन्वय - *anvaya*

यः हि अस्या हर्षसम्भूतः मुखरागः तदा अभवत् सः क्षणेन पुनर्भ्रष्टः निःश्वासात् इव दर्पणे।

yaḥ hi asyā harṣasambhūtaḥ mukharāgaḥ tadā abhavat
saḥ kṣaṇena punarbhraṣṭaḥ niḥśvāsāt iva darpaṇe.

English Translation

The colour of her face, which was undoubtedly possessed of happiness, had again ruined immediately like breathing out on a mirror.

०३ २७५ ०१६

शास्त्र - *śāstra*

ततस्ते हरयः सर्वे तच्छ्रुत्वा रामभाषितम्।
गतासुकल्पा निश्चेष्टा बभूवुः सहलक्ष्मणाः॥

tataste harayaḥ sarve tacchrutvā rāmabhāṣitam.
gatāsukalpā niśceṣṭā babhūvuḥ sahalakṣmaṇāḥ..

अन्वय - *anvaya*

ततः तद् रामभाषितम् श्रुत्वा ते सर्वे हरयः सहलक्ष्मणाः गतासुकल्पाः निश्चेष्टाः बभूवुः।

tataḥ tad rāmabhāṣitam śrutvā te sarve harayaḥ
sahalakṣmaṇāḥ gatāsukalpāḥ niśceṣṭāḥ babhūvuḥ.

English Translation

Thus, having heard that speech of Rāma, all those monkeys, along with Lakṣmaṇa, were motionless like someone whose time had passed.

०३ २७५ ०१७

शास्त्र - *śāstra*

ततो देवो विशुद्धात्मा विमानेन चतुर्मुखः।
पितामहो जगत्स्रष्टा दर्शयामास राघवम्॥

tato devo viśuddhātmā vimānena caturmukhaḥ.
pitāmaho jagatsraṣṭā darśayāmāsa rāghavam..

अन्वय - *anvaya*

ततः देवः विशुद्धात्मा विमानेन चतुर्मुखः पितामहः जगत्स्रष्टा दर्शयामास राघवम्।

tataḥ devaḥ viśuddhātmā vimānena caturmukhaḥ pitāmahaḥ jagatsraṣṭā darśayāmāsa rāghavam.

English Translation

Then, the virtuous four-faced, with a Vimāna, creator of the world Lord Brahmā, showed himself to Rāma.

०३ २७५ ०१८

शास्त्र - *śāstra*

शक्रश्चाग्निश्च वायुश्च यमो वरुण एव च।
यक्षाधिपश्च भगवांस्तथा सप्तर्षयोऽमलाः॥

śakraścāgniśca vāyuśca yamo varuṇa eva ca.
yakṣādhipaśca bhagavāṃstathā saptarṣayo'malāḥ..

अन्वय - *anvaya*

शक्रः च अग्निः च वायुः च यमः वरुणः एव च यक्षाधिपः च भगवान् तथा सप्तर्षयः अमलाः दर्शयामास राघवम्।

śakraḥ ca agniḥ ca vāyuḥ ca yamaḥ varuṇaḥ eva ca yakṣādhipaḥ ca bhagavān tathā saptarṣayaḥ amalāḥ darśayāmāsa rāghavam.

English Translation

And also, Indra, Agni, Vāyu, Yama, Varuna, Lord Kubera, and the pure seven Ṛṣis showed themselves to Rāghava.

०३ २७५ ०१९

शास्त्र - *śāstra*

राजा दशरथश्चैव दिव्यभास्वरमूर्तिमान्।
विमानेन महार्हेण हंसयुक्तेन भास्वता॥

rājā daśarathaścaiva divyabhāsvaramūrtimān.
vimānena mahārheṇa haṃsayuktena bhāsvatā..

अन्वय - *anvaya*

राजा दशरथः च एव दिव्यभास्वरमूर्तिमान् विमानेन महार्हेण हंसयुक्तेन भास्वता दर्शयामास राघवम्।

rājā daśarathaḥ ca eva divyabhāsvaramūrtimān vimānena mahārheṇa haṃsayuktena bhāsvatā darśayāmāsa rāghavam.

English Translation

And certainly, King Daśaratha, formed of divine brilliance, with his splendid luminous vehicle drawn by swans, revealed himself to Rāma.

०३ २७५ ०२०

शास्त्र - *śāstra*

ततोऽन्तरिक्षं तत्सर्वं देवगन्धर्वसंकुलम्।
शुशुभे तारकाचित्रं शरदीव नभस्तलम्॥

tato'ntarikṣaṃ tatsarvaṃ devagandharvasaṃkulam.
śuśubhe tārakācitraṃ śaradīva nabhastalam..

अन्वय - *anvaya*

ततः अन्तरिक्षम् तद् सर्वम् देवगन्धर्वसंकुलम् शुशुभे शरदि इव तारकाचित्रम् नभस्तलम्।

tataḥ antarikṣam tad sarvam devagandharvasaṃkulam śuśubhe śaradi iva tārakācitram nabhastalam.

English Translation

Thus, the sky, possessed of all those Gods and Gandharvas, shined like the sky's surface speckled with stars.

०३ २७५ ०२१

शास्त्र - *śāstra*

तत उत्थाय वैदेहि तेषां मध्ये यशस्विनी।
उवाच वाक्यं कल्याणी रामं पृथुलवक्षसम्॥

tata utthāya vaidehi teṣāṃ madhye yaśasvinī.
uvāca vākyaṃ kalyāṇī rāmaṃ pṛthulavakṣasam..

अन्वय - *anvaya*

ततः तेषाम् मध्ये उत्थाय वैदेही यशस्विनी कल्याणी उवाच वाक्यम् रामम् पृथुलवक्षसम्।

tataḥ teṣām madhye utthāya vaidehī yaśasvinī kalyāṇī uvāca vākyam rāmam pṛthulavakṣasam.

English Translation

Then, standing in the middle of them, the splendid auspicious Vaidehī said these words to the broad-chested Rāma.

०३ २७५ ०२२

शास्त्र - *śāstra*

राजपुत्र न ते कोपं करोमि विदिता हि मे।
गतिः स्त्रीणां नराणां च शृणु चेदं वचो मम॥

rājaputra na te kopaṃ karomi viditā hi me.
gatiḥ strīṇāṃ narāṇāṃ ca śṛṇu cedaṃ vaco mama..

अन्वय - *anvaya*

राजपुत्र न ते कोपम् करोमि। विदिता हि मया गतिः स्त्रीणाम् नराणाम् च। शृणु च इदम् वचः मम।

rājaputra na te kopam karomi. viditā hi mayā gatiḥ strīṇām narāṇām ca. śṛṇu ca idam vacaḥ mama.

English Translation

"O prince! I am not angry with you. I certainly know the manner between men and women. Listen to these words of mine."

०३ २७५ ०२३

शास्त्र - *śāstra*

अन्तश्चरति भूतानां मातरिश्वा सदागतिः।
स मे विमुञ्चतु प्राणान्यदि पापं चराम्यहम्॥

antaścarati bhūtānāṃ mātariśvā sadāgatiḥ.
sa me vimuñcatu prāṇānyadi pāpaṃ carāmyaham..

अन्वय - *anvaya*

मातरिश्वा सदागतिः वायुः अन्तश्चरति भूतानाम्। सः विमुञ्चतु मे प्राणान् यदि पापम् चरामि अहम्।

mātariśvā sadāgatiḥ vāyuḥ antaścarati bhūtānām. saḥ vimuñcatu me prāṇān yadi pāpam carāmi aham.

English Translation

"The wind god, always in motion, moves between all the beings. May he take away my breaths if I have sinned."

०३ २७५ ०२४

शास्त्र - *śāstra*

अग्निरापस्तथाकाशं पृथिवी वायुरेव च।
विमुञ्चन्तु मम प्राणान्यदि पापं चराम्यहम्॥

agnirāpastathākāśaṃ pṛthivī vāyureva ca.
vimuñcantu mama prāṇānyadi pāpaṃ carāmyaham..

अन्वय - *anvaya*

अग्निः आपः तथा आकाशम् पृथिवी वायुः एव च विमुञ्चन्तु मम प्राणान् यदि पापम् चरामि अहम्।

agniḥ āpaḥ tathā ākāśam pṛthivī vāyuḥ eva ca vimuñcantu mama prāṇān yadi pāpam carāmi aham.

English Translation

"May the fire, water, sky, earth, and wind take away my breaths if I sinned."

०३ २७५ ०२५

शास्त्र - *śāstra*

ततोऽन्तरिक्षे वागासीत्सर्वा विश्रावयन्दिशः।
पुण्या संहर्षणी तेषां वानराणां महात्मनाम्॥

tato'ntarikṣe vāgāsītsarvā viśrāvayandiśaḥ.
puṇyā saṃharṣaṇī teṣāṃ vānarāṇāṃ mahātmanām..

अन्वय - *anvaya*

ततः अन्तरिक्षे विश्रावयन्ती पुण्या तेषाम् वानराणाम् महात्मनाम् संहर्षणी वाक् आसीत् सर्वा दिशः।

tataḥ antarikṣe viśrāvayantī puṇyā teṣām vānarāṇām mahātmanām saṃharṣaṇī vāk āsīt sarvā diśaḥ.

English Translation

Then, from all the directions, an auspicious voice was heard everywhere, which caused delight amongst the great monkeys.

०३ २७५ ०२६

शास्त्र - *śāstra*

वायुरुवाच
भो भो राघव सत्यं वै वायुरस्मि सदागतिः।
अपापा मैथिली राजन्संगच्छ सह भार्यया॥

vāyuruvāca.
bho bho rāghava satyaṃ vai vāyurasmi sadāgatiḥ.
apāpā maithilī rājansaṃgaccha saha bhāryayā..

अन्वय - *anvaya*

भोः भोः राघव सत्यम् वै। वायुः अस्मि सदागतिः। राजन् अपापा मैथिली। संगच्छ सह भार्यया।

bhoḥ bhoḥ rāghava satyam vai. vāyuḥ asmi sadāgatiḥ. rājan apāpā maithilī. saṃgaccha saha bhāryayā.

English Translation

Vāyu said: O Rāghava! This is indeed the truth. I am the always-moving god of the wind. O King! Maithilī is sinless. Unite with your wife.

०३ २७५ ०२७

शास्त्र - *śāstra*

अग्निरुवाच
अहमन्तःशरीरस्थो भूतानां रघुनन्दन।
सुसूक्ष्ममपि काकुत्स्थ मैथिली नापराध्यति॥

agniruvāca.
ahamantaḥśarīrastho bhūtānāṃ raghunandana.
susūkṣmamapi kākutstha maithilī nāparādhyati..

अन्वय - *anvaya*

रघुनन्दन अहम् अन्तःशरीरस्थः भूतानाम्। काकुत्स्थ सुसूक्ष्मम् अपि मैथिली न अपराध्यति।

raghunandana aham antaḥśarīrasthaḥ bhūtānām.
kākutstha susūkṣmam api maithilī na aparādhyati.

English Translation

Agni said: O scion of Raghu! I am situated inside the bodies of all the beings. O descendant of Kakustha! Maithilī has not sinned even the tiniest.

०३ २७५ ०२८

शास्त्र - *śāstra*

वरुण उवाच।
रसा वै मत्प्रसूता हि भूतदेहेषु राघव।
अहं वै त्वां प्रब्रवीमि मैथिली प्रतिगृह्यताम्॥

varuṇa uvāca.
rasā vai matprasūtā hi bhūtadeheṣu rāghava.
ahaṃ vai tvāṃ prabravīmi maithilī pratigṛhyatām..

अन्वय - *anvaya*

रसाः वै मत्प्रसूताः हि भूतदेहेषु राघव। अहम् वै त्वाम् प्रब्रवीमि मैथिली प्रतिगृह्यताम्॥

rasāḥ vai matprasūtāḥ hi bhūtadeheṣu rāghava. aham vai tvām prabravīmi maithilī pratigṛhyatām..

English Translation

Varuṇa said: O Rāghava! I indeed produce all the bodily fluids. I certainly proclaim to you that Maithilī must be taken as your wife.

०३ २७५ ०२९

शास्त्र - *śāstra*

ब्रह्मोवाच
पुत्र नैतदिहाश्चर्यं त्वयि राजर्षिधर्मिणि।
साधो सद्वृत्तमार्गस्थे शृणु चेदं वचो मम॥

brahmovāca
putra naitadihāścaryaṃ tvayi rājarṣidharmiṇi.
sādho sadvṛttamārgasthe śṛṇu cedaṃ vaco mama..

अन्वय - *anvaya*

पुत्र इह एतद् न आश्चर्यम् त्वयि राजर्षिधर्मिणि सद्वृत्तमार्गस्थे। साधो शृणु च इदम् वचः मम।

putra iha etad na āścaryam tvayi rājarṣidharmiṇi sadvṛttamārgasthe. sādho śṛṇu ca idam vacaḥ mama.

English Translation

Brahmā said: O son! This here is not surprising, as you follow the laws of royal descent and stay on the right path of good conduct. O, good man! Listen to these words of mine.

०३ २७५ ०३०

शास्त्र - *śāstra*

शत्रुरेष त्वया वीर देवगन्धर्वभोगिनाम्।
यक्षाणां दानवानां च महर्षीणां च पातितः॥

śatrureṣa tvayā vīra devagandharvabhoginām.
yakṣāṇāṃ dānavānāṃ ca maharṣīṇāṃ ca pātitaḥ..

अन्वय - *anvaya*

वीर एषः शत्रुः देवानाम् गन्धर्वाणाम् भोगिनाम् यक्षाणाम् दानवानाम् महर्षीणाम् च त्वया पातितः।

vīra eṣaḥ śatruḥ devānām gandharvāṇām bhoginām
yakṣāṇām dānavānām maharṣīṇām ca tvayā pātitaḥ.

English Translation

O brave one! This enemy of Devas, Gandharvas, Serpents, Yakṣas, Dānavas, and great Ṛṣis was fallen by you.

०३ २७५ ०३१

शास्त्र - *śāstra*

अवध्यः सर्वभूतानां मत्प्रसादात्पुराभवत्।
कस्माच्चित्कारणात्पापः कंचित्कालमुपेक्षितः॥

avadhyaḥ sarvabhūtānāṃ matprasādātpurābhavat.
kasmāccitkāraṇātpāpaḥ kaṃcitkālamupekṣitaḥ..

अन्वय - *anvaya*

अवध्यः सर्वभूतानाम् मत्प्रसादात् पुरा अभवत्। कस्मात्चित् कारणात् पापः कंचित् कालम् उपेक्षितः।

avadhyaḥ sarvabhūtānām matprasādāt purā abhavat.
kasmātcit kāraṇāt pāpaḥ kaṃcit kālam upekṣitaḥ.

English Translation

He was inviolable earlier amongst all the beings from my grace. The vile one was overlooked for some time for some reason.

०३ २७५ ०३२

शास्त्र - *śāstra*

वधार्थमात्मनस्तेन हृता सीता दुरात्मना।
नलकूबरशापेन रक्षा चास्याः कृता मया॥

vadhārthamātmanastena hṛtā sītā durātmanā.
nalakūbaraśāpena rakṣā cāsyāḥ kṛtā mayā..

अन्वय - *anvaya*

आत्मनः वधार्थम् तेन दुरात्मना सीता हृता। नलकूबरशापेन रक्षा च अस्याः कृता मया।

ātmanaḥ vadhārtham tena durātmanā sītā hṛtā.
nalakūbaraśāpena rakṣā ca asyāḥ kṛtā mayā.

English Translation

Sītā was abducted by that vile one for his destruction. I did the protection of her with a curse from Nalakūbara.

०३ २७५ ०३३

शास्त्र - *śāstra*

यदि ह्यकामामासेवेत्स्त्रियमन्यामपि ध्रुवम्।
शतधास्य फलेद्देह इत्युक्तः सोऽभवत्पुरा॥

yadi hyakāmāmāsevetstriyamanyāmapi dhruvam.
śatadhāsya phaleddeha ityuktaḥ so'bhavatpurā..

अन्वय - *anvaya*

यदि हि आसेवेत् अकामाम् स्त्रियम् अन्याम् अपि ध्रुवम् शतधा अस्य फलेत् देह इति उक्तः सः अभवत् पुरा।

yadi hi āsevet akāmām striyam anyām api dhruvam
śatadhā asya phalet deha iti uktaḥ saḥ abhavat purā.

English Translation

He was told earlier - "If he shall try to enjoy any other undesirous woman, his body shall certainly burst into hundreds of pieces."

०३ २७५ ०३४

शास्त्र - *śāstra*

नात्र शङ्का त्वया कार्या प्रतीच्छेमां महाद्युते।
कृतं त्वया महत्कार्यं देवानाममरप्रभ॥

nātra śaṅkā tvayā kāryā pratīcchemāṃ mahādyute.
kṛtaṃ tvayā mahatkāryaṃ devānāmamaraprabha..

अन्वय - *anvaya*

न अत्र शङ्का त्वया कार्या। प्रतीच्छ इमाम् महाद्युते। कृतम् त्वया महत्कार्यम् देवानाम् अमरप्रभ।

na atra śaṅkā tvayā kāryā. pratīccha imām mahādyute. kṛtam tvayā mahatkāryam devānām amaraprabha.

English Translation

Here, the action that you should take is not to be suspected. O glorious one! Accept her. O immortal-like man! You have performed a significant action for the gods.

०३ २७५ ०३५

शास्त्र - *śāstra*

दशरथ उवाच।
प्रीतोऽस्मि वत्स भद्रं ते पिता दशरथोऽस्मि ते।
अनुजानामि राज्यं च प्रशाधि पुरुषोत्तम॥

daśaratha uvāca.
prīto'smi vatsa bhadraṃ te pitā daśaratho'smi te.
anujānāmi rājyaṃ ca praśādhi puruṣottama..

अन्वय - *anvaya*

प्रीतः अस्मि। वत्स भद्रम् ते। पिता दशरथः अस्मि ते। अनुजानामि राज्यम् च प्रशाधि पुरुषोत्तम।

prītaḥ asmi. vatsa bhadram te. pitā daśarathaḥ asmi te. anujānāmi rājyam ca praśādhi puruṣottama.

English Translation

Daśaratha said: I am delighted. O dear child! I am your father, Daśaratha. I permit you. O best of man! Reign the kingdom.

०३ २७५ ०३६

शास्त्र - *śāstra*

राम उवाच।
अभिवादये त्वां राजेन्द्र यदि त्वं जनको मम।
गमिष्यामि पुरीं रम्यामयोध्यां शासनात्तव॥

rāma uvāca.
abhivādaye tvāṃ rājendra yadi tvaṃ janako mama.
gamiṣyāmi purīṃ ramyāmayodhyāṃ śāsanāttava..

अन्वय - *anvaya*

अभिवादये त्वाम् राजेन्द्र यदि त्वम् जनकः मम। गमिष्यामि पुरीम् रम्याम् अयोध्याम् शासनात् तव।

abhivādaye tvām rājendra yadi tvam janakaḥ mama.
gamiṣyāmi purīm ramyām ayodhyām śāsanāt tava.

English Translation

Rāma said: O emperor! If you are my father, I greet you. I will go to the beautiful city of Ayodhyā by your command.

०३ २७५ ०३७

शास्त्र - *śāstra*

मार्कण्डेय उवाच।
तमुवाच पिता भूयः प्रहृष्टो मनुजाधिप।
गच्छायोध्यां प्रशाधि त्वं राम रक्तान्तलोचन॥

mārkaṇḍeya uvāca.
tamuvāca pitā bhūyaḥ prahṛṣṭo manujādhipa.
gacchāyodhyāṃ praśādhi tvaṃ rāma raktāntalocana..

अन्वय - *anvaya*

मनुजाधिप युधिष्ठिर पिता भूयः प्रहृष्टः तम् रामम् उवाच। गच्छ अयोध्याम् प्रशाधि त्वम् राम रक्तान्तलोचन।

manujādhipa yudhiṣṭhira pitā bhūyaḥ prahṛṣṭaḥ tam rāmam uvāca. gaccha ayodhyām praśādhi tvam rāma raktāntalocana.

English Translation

Mārkaṇḍeya said: O leader of men! His delighted father again said to Rāma - "O Rāma! O one with inflamed corner of eyes! You go and rule to Ayodhyā."

०३ २७५ ०३८

शास्त्र - *śāstra*

ततो देवान्नमस्कृत्य सुहृद्भिरभिनन्दितः।
महेन्द्र इव पौलोम्या भार्यया स समेयिवान्॥

tato devānnamaskṛtya suhṛdbhirabhinanditaḥ.
mahendra iva paulomyā bhāryayā sa sameyivān..

अन्वय - *anvaya*

ततः देवान् नमस्कृत्य सः सुहृद्भिः अभिनन्दितः महेन्द्रः इव पौलोम्या समेयिवान् भार्यया।

tataḥ devān namaskṛtya saḥ suhṛdbhiḥ abhinanditaḥ mahendraḥ iva paulomyā sameyivān bhāryayā.

English Translation

Then, having saluted the Gods, he, greeted by friends, united with his wife like Mahendra with Paulomī.

०३ २७५ ०३९

शास्त्र - *śāstra*

ततो वरं ददौ तस्मै अविन्ध्याय परंतपः। त्रिजटां चार्थमानाभ्यां योजयामास राक्षसीम्॥

tato varaṃ dadau tasmai avindhyāya paraṃtapaḥ. trijaṭāṃ cārthamānābhyāṃ yojayāmāsa rākṣasīm..

अन्वय - *anvaya*

ततः तस्मै अविन्ध्याय परंतपः वरम् ददौ राक्षसीम् च त्रिजटाम् अर्थेन मानेन च योजयामास।

tataḥ tasmai avindhyāya paraṃtapaḥ varam dadau rākṣasīm ca trijaṭām arthena mānena ca yojayāmāsa.

English Translation

The destroyer of foes granted a boon to Avindhya and endowed Trijaṭā with opulence and honour.

०३ २७५ ०४०

शास्त्र - *śāstra*

तमुवाच ततो ब्रह्मा देवैः शक्रमुखैर्वृतः।
कौसल्यामातरिष्टांस्ते वरानद्य ददानि कान्॥

tamuvāca tato brahmā devaiḥ śakramukhairvṛtaḥ.
kausalyāmātariṣṭāṃste varānadya dadāni kān..

अन्वय - *anvaya*

ततः ब्रह्मा देवैः शक्रमुखैः वृतः तम् उवाच। कौसल्यामातर् कान् इष्टान् वरान् ते अद्य ददानि।

tataḥ brahmā devaiḥ śakramukhaiḥ vṛtaḥ tam uvāca.
kausalyāmātar kān iṣṭān varān te adya dadāni.

English Translation

Then, Lord Brahmā, surrounded by gods beginning with Indra, said to him - "O one whose mother is Kausalyā! What desirous boon I must give you today?"

०३ २७५ ०४१

शास्त्र - *śāstra*

वव्रे रामः स्थितिं धर्मे शत्रुभिश्चापराजयम्।
राक्षसैर्निहतानां च वानराणां समुद्भवम्॥

vavre rāmaḥ sthitiṃ dharme śatrubhiścāparājayam.
rākṣasairnihatānāṃ ca vānarāṇāṃ samudbhavam..

अन्वय - *anvaya*

रामः वव्रे स्थितिम् धर्मे शत्रुभिः च अपराजयम् राक्षसैः च निहतानाम् वानराणाम् समुद्भवम्।

rāmaḥ vavre sthitim dharme śatrubhiḥ ca aparājayam
rākṣasaiḥ ca nihatānām vānarāṇām samudbhavam.

English Translation

Rāma chose firm standing in righteousness, invincibility with enemies, and revival of monkeys slayed by demons.

०३ २७५ ०४२

शास्त्र - *śāstra*

ततस्ते ब्रह्मणा प्रोक्ते तथेति वचने तदा।
समुत्तस्थुर्महाराज वानरा लब्धचेतसः॥

tataste brahmaṇā prokte tatheti vacane tadā.
samuttasthurmahārāja vānarā labdhacetasaḥ..

अन्वय - *anvaya*

महाराज ततः प्रोक्ते वचने तथा इति ब्रह्मणा तदा समुत्तस्थुः ते वानराः लब्धचेतसः।

mahārāja tataḥ prokte vacane tathā iti brahmaṇā tadā samuttasthuḥ te vānarāḥ labdhacetasaḥ.

English Translation

O, great King! Thus, when "So be it" was spoken by Brahmā, then those monkeys who had obtained consciousness all stood up.

०३ २७५ ०४३

शास्त्र - *śāstra*

सीता चापि महाभागा वरं हनुमते ददौ।
रामकीर्त्या समं पुत्र जीवितं ते भविष्यति॥

sītā cāpi mahābhāgā varaṃ hanumate dadau.
rāmakīrtyā samaṃ putra jīvitaṃ te bhaviṣyati..

अन्वय - *anvaya*

सीता च अपि महाभागा वरम् हनुमते ददौ। रामकीर्त्या समम् पुत्र जीवितम् ते भविष्यति।

sītā ca api mahābhāgā varam hanumate dadau.
rāmakīrtyā samam putra jīvitam te bhaviṣyati.

English Translation

And the illustrious Sītā also granted a boon to Hanūmat - "O son! Your duration of life will be same as the fame of Rāma."

०३ २७५ ०४४

शास्त्र - *śāstra*

दिव्यास्त्वामुपभोगाश्च मत्प्रसादकृताः सदा।
उपस्थास्यन्ति हनुमन्निति स्म हरिलोचन॥

divyāstvāmupabhogāśca matprasādakṛtāḥ sadā.
upasthāsyanti hanumanniti sma harilocana..

अन्वय - *anvaya*

हनुमन् हरिलोचन दिव्याः च उपभोगाः मत्प्रसादकृताः सदा त्वाम् उपस्थास्यन्ति इति स्म।

divyāḥ ca upabhogāḥ matprasādakṛtāḥ sadā tvām upasthāsyanti hanuman iti sma harilocana.

English Translation

"O brown-eyed Hanūmat! And the divine enjoyments done by my favour will forever stand by your side."

०३ २७५ ०४५

शास्त्र - *śāstra*

ततस्ते प्रेक्षमाणानां तेषामक्लिष्टकर्मणाम्।
अन्तर्धानं ययुर्देवाः सर्वे शक्रपुरोगमाः॥

tataste prekṣamāṇānāṃ teṣāmakliṣṭakarmaṇām.
antardhānaṃ yayurdevāḥ sarve śakrapurogamāḥ..

अन्वय - *anvaya*

ततः ते सर्वे देवाः शक्रपुरोगमा प्रेक्षमाणानाम् तेषाम् अक्लिष्टकर्मणाम् अन्तर्धानम् ययुः।

tataḥ te sarve devāḥ śakrapurogamā prekṣamāṇānām teṣām akliṣṭakarmaṇām antardhānam yayuḥ.

English Translation

Then, while those who did unparalleled deeds were watching, all the gods headed by Indra disappeared.

०३ २७५ ०४६

शास्त्र - *śāstra*

दृष्ट्वा तु रामं जानक्या समेतं शक्रसारथिः।
उवाच परमप्रीतः सुहृन्मध्य इदं वचः॥

dṛṣṭvā tu rāmaṃ jānakyā sametaṃ śakrasārathiḥ.
uvāca paramaprītaḥ suhṛnmadhya idaṃ vacaḥ..

अन्वय - *anvaya*

रामम् तु जानक्या समेतम् दृष्ट्वा शक्रसारथिः परमप्रीतः सुहृन्मध्यः इदम् वचः उवाच।

rāmam tu jānakyā sametam dṛṣṭvā śakrasārathiḥ paramaprītaḥ suhṛnmadhyaḥ idam vacaḥ uvāca.

English Translation

But seeing Rāma united with Jānakī, the exceedingly rejoicing charioteer of Indra standing between allies said these words.

०३ २७५ ०४७

शास्त्र - *śāstra*

देवगन्धर्वयक्षाणां मानुषासुरभोगिनाम्।
अपनीतं त्वया दुःखमिदं सत्यपराक्रम॥

devagandharvayakṣāṇāṃ mānuṣāsurabhoginām.
apanītaṃ tvayā duḥkhamidaṃ satyaparākrama..

अन्वय - *anvaya*

सत्यपराक्रम देवानाम् गन्धर्वाणाम् यक्षाणाम् मानुषाणाम् सुराणाम् भोगिनाम् अपनीतम् त्वया इदम् दुःखम्।

satyaparākrama devānām gandharvāṇām yakṣāṇām mānuṣāṇām surāṇām bhoginām apanītam tvayā idam duḥkham.

English Translation

"O truly brave! This sorrow of Devas, Gandharvas, Yakṣas, humans, Suras, and serpents was removed by you."

०३ २७५ ०४८

शास्त्र - *śāstra*

सदेवासुरगन्धर्वा यक्षराक्षसपन्नगाः।
कथयिष्यन्ति लोकास्त्वां यावद्भूमिर्धरिष्यति॥

sadevāsuragandharvā yakṣarākṣasapannagāḥ.
kathayiṣyanti lokāstvāṃ yāvadbhūmirdhariṣyati..

अन्वय - *anvaya*

सदेवाः सुराः गन्धर्वाः यक्षाः राक्षसाः पन्नगाः लोकाः त्वाम् कथयिष्यन्ति यावत् भूमिः धरिष्यति।

sadevāḥ surāḥ gandharvāḥ yakṣāḥ rākṣasāḥ pannagāḥ lokāḥ tvām kathayiṣyanti yāvat bhūmiḥ dhariṣyati.

English Translation

All the people, along with Devas, Suras, Gandharvas, and serpents, will talk about you as long as the earth is possessed.

०३ २७५ ०४९

शास्त्र - *śāstra*

इत्येवमुक्त्वानुज्ञाप्य रामं शस्त्रभृतां वरम्।
संपूज्यापाक्रमत्तेन रथेनादित्यवर्चसा॥

ityevamuktvānujñāpya rāmaṃ śastrabhṛtāṃ varam.
saṃpūjyāpākramattena rathenādityavarcasā..

अन्वय - *anvaya*

इति एवम् उक्त्वा अनुज्ञाप्य रामम् शस्त्रभृताम् वरम् सम्पूज्य अपाक्रमत् तेन रथेन आदित्यवर्चसा।

iti evam uktvā anujñāpya rāmam śastrabhṛtām varam
sampūjya apākramat tena rathena ādityavarcasā.

English Translation

Having spoken this way, asking for permission to depart, and greatly honouring the best warrior, Rāma, he went away with his chariot that had brilliance like the Sun.

०३ २७५ ०५०

शास्त्र - *śāstra*

ततः सीतां पुरस्कृत्य रामः सौमित्रिणा सह।
सुग्रीवप्रमुखैश्चैव सहितः सर्ववानरैः॥

tataḥ sītāṃ puraskṛtya rāmaḥ saumitriṇā saha.
sugrīvapramukhaiścaiva sahitaḥ sarvavānaraiḥ..

अन्वय - *anvaya*

ततः सीताम् पुरस्कृत्य रामः सौमित्रिणा सह सुग्रीवप्रमुखैः च एव सहितः सर्ववानरैः।

tataḥ sītām puraskṛtya rāmaḥ saumitriṇā saha
sugrīvapramukhaiḥ ca eva sahitaḥ sarvavānaraiḥ.

English Translation

Then, having put Sītā in front, there was Rāma along with Lakṣmaṇa and certainly along with all monkeys headed by Sugrīva.

०३ २७५ ०५१

शास्त्र - *śāstra*

विधाय रक्षां लङ्कायां विभीषणपुरस्कृतः।
संततार पुनस्तेन सेतुना मकरालयम्॥

vidhāya rakṣāṃ laṅkāyāṃ vibhīṣaṇapuraskṛtaḥ.
saṃtatāra punastena setunā makarālayam..

अन्वय - *anvaya*

रक्षाम् लङ्कायाम् विधाय विभीषणपुरस्कृतः संततार पुनः तेन सेतुना मकरालयम्।

rakṣām laṅkāyām vidhāya vibhīṣaṇapuraskṛtaḥ saṃtatāra punaḥ tena setunā makarālayam.

English Translation

Having granted the protection of Laṅkā, the one who Vibhīṣaṇa attended, again crossed the ocean by that bridge.

०३ २७५ ०५२

शास्त्र - *śāstra*

पुष्पकेण विमानेन खेचरेण विराजता।
कामगेन यथा मुख्यैरमात्यैः संवृतो वशी॥

puṣpakeṇa vimānena khecareṇa virājatā.
kāmagena yathā mukhyairamātyaiḥ saṃvṛto vaśī..

अन्वय - *anvaya*

सः संततार पुष्पकेण विमानेन खेचरेण विराजता कामगेन यथा मुख्यैः अमात्यैः संवृतः वशी।

saḥ saṃtatāra puṣpakeṇa vimānena khecareṇa virājatā kāmagena yathā mukhyaiḥ amātyaiḥ saṃvṛtaḥ vaśī.

English Translation

He crossed with the glittering flying Puṣpaka Vimāna, moving as it pleased, just as a King surrounded by prominent ministers.

०३ २७५ ०५३

शास्त्र - *śāstra*

ततस्तीरे समुद्रस्य यत्र शिश्ये स पार्थिवः।
तत्रैवोवास धर्मात्मा सहितः सर्ववानरैः॥

tatastīre samudrasya yatra śiśye sa pārthivaḥ.
tatraivovāsa dharmātmā sahitaḥ sarvavānaraiḥ..

अन्वय - *anvaya*

ततः तीरे समुद्रस्य यत्र शिश्ये सः पार्थिवः तत्र एव उवास धर्मात्मा सहितः सर्ववानरैः।

tataḥ tīre samudrasya yatra śiśye saḥ pārthivaḥ tatra eva uvāsa dharmātmā sahitaḥ sarvavānaraiḥ.

English Translation

Then, where the King slept on the ocean's shore, the virtuous one and all the monkeys stayed there only.

०३ २७५ ०५४

शास्त्र - *śāstra*

अथैनान्राघवः काले समानीयाभिपूज्य च।
विसर्जयामास तदा रत्नैः संतोष्य सर्वशः॥

athainānrāghavaḥ kāle samānīyābhipūjya ca.
visarjayāmāsa tadā ratnaiḥ saṃtoṣya sarvaśaḥ..

अन्वय - *anvaya*

अथ एनान् काले समानीय अभिपूज्य च राघवः तदा रत्नैः सर्वशः संतोष्य विसर्जयामास।

atha enān kāle samānīya abhipūjya ca rāghavaḥ tadā ratnaiḥ sarvaśaḥ saṃtoṣya visarjayāmāsa.

English Translation

Then, on time, having gathered and greatly honoured them, at that time, Rāghava sent them away with jewels, having satisfied everyone.

०३ २७५ ०५५

शास्त्र - *śāstra*

गतेषु वानरेन्द्रेषु गोपुच्छर्क्षेषु तेषु च।
सुग्रीवसहितो रामः किष्किन्धां पुनरागमत्॥

gateṣu vānarendreṣu gopuccharkṣeṣu teṣu ca.
sugrīvasahito rāmaḥ kiṣkindhāṃ punarāgamat..

अन्वय - *anvaya*

गतेषु च वानरेन्द्रेषु गोपुच्छर्क्षेषु तेषु सुग्रीवसहितः रामः किष्किन्धाम् पुनरागमत्।

gateṣu ca vānarendreṣu gopuccharkṣeṣu teṣu sugrīvasahitaḥ rāmaḥ kiṣkindhām punarāgamat.

English Translation

And when those chiefs of monkeys, monkeys, and bears went, Rāma again came to Kiṣkindhā along with Sugrīva.

०३ २७५ ०५६

शास्त्र - *śāstra*

विभीषणेनानुगतः सुग्रीवसहितस्तदा।
पुष्पकेण विमानेन वैदेह्या दर्शयन्वनम्॥

vibhīṣaṇenānugataḥ sugrīvasahitastadā.
puṣpakeṇa vimānena vaidehyā darśayanvanam..

अन्वय - *anvaya*

विभीषणेन अनुगतः सुग्रीवसहितः तदा पुष्पकेण विमानेन वैदेह्या वनम् दर्शायामास।

vibhīṣaṇena anugataḥ sugrīvasahitaḥ tadā puṣpakeṇa vimānena vaidehyā vanam darśayāmāsa.

English Translation

At that time, the one followed by Vibhīṣaṇa and accompanied by Sugrīva showed the forest to Vaidehī with the Puṣpaka Vimāna.

०३ २७५ ०५७

शास्त्र - *śāstra*

किष्किन्धां तु समासाद्य रामः प्रहरतां वरः।
अङ्गदं कृतकर्माणं यौवराज्येऽभ्यषेचयत्॥

kiṣkindhāṃ tu samāsādya rāmaḥ praharatāṃ varaḥ.
aṅgadaṃ kṛtakarmāṇaṃ yauvarājye'bhyaṣecayat..

अन्वय - *anvaya*

किष्किन्धाम् तु समासाद्य रामः प्रहरताम् वरः अङ्गदम् कृतकर्माणम् यौवराज्ये अभ्यषेचयत्।

kiṣkindhām tu samāsādya rāmaḥ praharatām varaḥ aṅgadam kṛtakarmāṇam yauvarājye abhyaṣecayat.

English Translation

Having arrived at Kiṣkindhā, Rāma, the best amongst fighters, consecrated the accomplished Aṅgada in succession.

०३ २७५ ०५८

शास्त्र - *śāstra*

ततस्तैरेव सहितो रामः सौमित्रिणा सह।
यथागतेन मार्गेण प्रययौ स्वपुरं प्रति॥

tatastaireva sahito rāmaḥ saumitriṇā saha.
yathāgatena mārgeṇa prayayau svapuraṃ prati..

अन्वय - *anvaya*

ततः तैः एव सहितः रामः सौमित्रिणा सह यथागतेन मार्गेण प्रययौ स्वपुरम् प्रति।

tataḥ taiḥ eva sahitaḥ rāmaḥ saumitriṇā saha yathāgatena mārgeṇa prayayau svapuram prati.

English Translation

Then, along with them, Rāma, accompanied by Lakṣmaṇa, advanced towards their city.

०३ २७५ ०५९

शास्त्र - *śāstra*

अयोध्यां स समासाद्य पुरीं राष्ट्रपतिस्ततः।
भरताय हनूमन्तं दूतं प्रस्थापयत्तदा॥

ayodhyāṃ sa samāsādya purīṃ rāṣṭrapatistataḥ.
bharatāya hanūmantaṃ dūtaṃ prasthāpayattadā..

अन्वय - *anvaya*

अयोध्याम् पुरीम् समासाद्य सः राष्ट्रपतिः ततः भरताय हनूमन्तम् दूतम् प्रास्थापयत् तदा।

ayodhyām purīm samāsādya saḥ rāṣṭrapatiḥ tataḥ bharatāya hanūmantam dūtam prāsthāpayat tadā.

English Translation

Having approached the city of Ayodhyā, the sovereign King dispatched messenger Hanūmat for Bharata.

०३ २७५ ०६०

शास्त्र - *śāstra*

लक्षयित्वेङ्गितं सर्वं प्रियं तस्मै निवेद्य च।
वायुपुत्रे पुनः प्राप्ते नन्दिग्राममुपागमत्॥

lakṣayitveṅgitaṃ sarvaṃ priyaṃ tasmai nivedya ca.
vāyuputre punaḥ prāpte nandigrāmamupāgamat..

अन्वय - *anvaya*

हनुमान् सर्वम् प्रियम् इङ्गितम् अलक्षयत् भरतम् च न्यवेदयत्। वायुपुत्रे पुनः प्राप्ते रामः नन्दिग्रामम् उपागमत्।

hanumān sarvam priyam iṅgitam alakṣayat bharatam ca nyavedayat. vāyuputre punaḥ prāpte rāmaḥ nandigrāmam upāgamat.

English Translation

When the son of Vāyu had arrived again, having observed all the signs of the dear one and communicating with him, Rāma arrived at Nandigrāma.

०३ २७५ ०६१

शास्त्र - *śāstra*

स तत्र मलदिग्धाङ्गं भरतं चीरवाससम्।
अग्रतः पादुके कृत्वा ददर्शासीनमासने॥

sa tatra maladigdhāṅgaṃ bharataṃ cīravāsasam.
agrataḥ pāduke kṛtvā dadarśāsīnamāsane..

अन्वय - *anvaya*

तत्र मलदिग्धाङ्गम् भरतम् चीरवाससम् आसीनम् आसने अग्रतः पादुके कृत्वा ददर्श सः रामः।

tatra maladigdhāṅgam bharatam cīravāsasam āsīnam āsane agrataḥ pāduke kṛtvā dadarśa saḥ rāmaḥ.

English Translation

There, he saw Bharata, whose clothes were tattered and limbs smeared with dirt, seated and putting slippers in front.

०३ २७५ ०६२

शास्त्र - *śāstra*

समेत्य भरतेनाथ शत्रुघ्नेन च वीर्यवान्।
राघवः सहसौमित्रिर्मुमुदे भरतर्षभ॥

sametya bharatenātha śatrughnena ca vīryavān.
rāghavaḥ sahasaumitrirmumude bharatarṣabha..

अन्वय - *anvaya*

अथ समेत्य वीर्यवान् राघवः सहसौमित्रिः मुमुदे भरतेन शत्रुघ्नेन च भरतर्षभ।

atha sametya vīryavān rāghavaḥ sahasaumitriḥ mumude bharatena śatrughnena ca bharatarṣabha.

English Translation

O chief of Bharata! Then, having come near, the valourous Rāma, accompanied by Lakṣmaṇa, delighted with Bharata and Śatrughna.

०३ २७५ ०६३

शास्त्र - *śāstra*

तथा भरतशत्रुघ्नौ समेतौ गुरुणा तदा।
वैदेह्या दर्शनेनोभौ प्रहर्षं समवापतुः॥

tathā bharataśatrughnau sametau guruṇā tadā.
vaidehyā darśanenobhau praharṣaṃ samavāpatuḥ..

अन्वय - *anvaya*

तथा भरतशत्रुघ्नौ समेतौ गुरुणा तदा वैदेह्याः दर्शनेन उभौ प्रहर्षम् समवापतुः।

tathā bharataśatrughnau sametau guruṇā tadā vaidehyāḥ darśanena ubhau praharṣam samavāpatuḥ.

English Translation

Likewise, at that time, along with their Guru, both Bharata and Śatrughna experienced extreme joy with the sight of Vaidehī.

०३ २७५ ०६४

शास्त्र - *śāstra*

तस्मै तद्भरतो राज्यमागतायाभिसत्कृतम्।
न्यासं निर्यातयामास युक्तः परमया मुदा॥

tasmai tadbharato rājyamāgatāyābhisatkṛtam.
nyāsaṃ niryātayāmāsa yuktaḥ paramayā mudā..

अन्वय - *anvaya*

भरतः परमया मुदा युक्तः तस्मै आगताय अभिसत्कृतम् न्यासम् तद् राज्यम् निर्यातयामास।

bharataḥ paramayā mudā yuktaḥ tasmai āgatāya abhisatkṛtam nyāsam tad rājyam niryātayāmāsa.

English Translation

Bharata, filled with extreme joy, restituted the honourary kingdom to the one who returned.

०३ २७५ ०६५

शास्त्र - *śāstra*

ततस्तं वैष्णवे शूरं नक्षत्रेऽभिमतेऽहनि।
वसिष्ठो वामदेवश्च सहितावभ्यषिञ्चताम्॥

tatastaṃ vaiṣṇave śūraṃ nakṣatre'bhimate'hani.
vasiṣṭho vāmadevaśca sahitāvabhyaṣiñcatām..

अन्वय - *anvaya*

ततः श्रवणे वैष्णवे नक्षत्रे अभिमते अहनि वसिष्ठः वामदेवः च सहितौ अभ्यषिञ्चताम् तम् शूरम्।

tataḥ śravaṇe vaiṣṇave nakṣatre abhimate ahani vasiṣṭhaḥ vāmadevaḥ ca sahitau abhyaṣiñcatām tam śūram.

English Translation

Thus, on the desirous day of the Śravaṇa Nakṣatra, Vasiṣṭha and Vāmadeva consecrated the hero.

०३ २७५ ०६६

शास्त्र - *śāstra*

सोऽभिषिक्तः कपिश्रेष्ठं सुग्रीवं ससुहृज्जनम्।
विभीषणं च पौलस्त्यमन्वजानाद्गृहान्प्रति॥

so'bhiṣiktaḥ kapiśreṣṭhaṃ sugrīvaṃ sasuhṛjjanam.
vibhīṣaṇaṃ ca paulastyamanvajānādgṛhānprati..

अन्वय - *anvaya*

सः अभिषिक्तः कपिश्रेष्ठम् सुग्रीवम् ससुहृज्जनम् विभीषणम् च पौलस्त्यम् अन्वजानात् गृहान् प्रति।

saḥ abhiṣiktaḥ kapiśreṣṭham sugrīvam sasuhṛjjanam vibhīṣaṇam ca paulastyam anvajānāt gṛhān prati.

English Translation

The anointed one bid farewell to the monkey-lord Sugrīva, along with his friends and the son of Pulastya Vibhīṣaṇa, going towards their homes.

०३ २७५ ०६७

शास्त्र - *śāstra*

अभ्यर्च्य विविधै रत्नैः प्रीतियुक्तौ मुदा युतौ।
समाधायेतिकर्तव्यं दुःखेन विससर्ज ह॥

abhyarcya vividhai ratnaiḥ prītiyuktau mudā yutau.
samādhāyetikartavyaṃ duḥkhena visasarja ha..

अन्वय - *anvaya*

विविधैः रत्नैः अभ्यर्च्य इतिकर्तव्यम् समाधाय प्रीतियुक्तौ मुदा युतौ सुग्रीवविभीषणौ दुःखेन विससर्ज रामः ह।

vividhaiḥ ratnaiḥ abhyarcya itikartavyam samādhāya prītiyuktau mudā yutau sugrīvavibhīṣaṇau duḥkhena visasarja rāmaḥ ha.

English Translation

Having reverenced with various jewels and put the duties in place, he let go of both of those who were filled with love and possessed with joy.

०३ २७५ ०६८

शास्त्र - *śāstra*

पुष्पकं च विमानं तत्पूजयित्वा स राघवः।
प्रादाद्भैश्रवणायैव प्रीत्या स रघुनन्दनः॥

puṣpakaṃ ca vimānaṃ tatpūjayitvā sa rāghavaḥ.
prādādvaiśravaṇāyaiva prītyā sa raghunandanaḥ..

अन्वय - *anvaya*

पुष्पकम् च विमानम् तद् पूजयित्वा सः राघवः रघुनन्दनः प्रादात् वैश्रवणाय विभीषणाय एव प्रीत्या।

puṣpakam ca vimānam tad pūjayitvā saḥ rāghavaḥ raghunandanaḥ prādāt vaiśravaṇāya vibhīṣaṇāya eva prītyā.

English Translation

And having honoured the Puṣpaka Vimāna, the scion and descendant of Raghu gave it to the son of Vaiśravaṇa with love.

०३ २७५ ०६९

शास्त्र - *śāstra*

ततो देवर्षिसहितः सरितं गोमतीमनु।
दशाश्वमेधानाजह्रे जारूथ्यान्स निरर्गलान्॥

tato devarṣisahitaḥ saritaṃ gomatīmanu.
daśāśvamedhānājahre jārūthyānsa nirargalān..

अन्वय - *anvaya*

ततः देवर्षिसहितः सरितम् गोमतीम् अनु दशाश्वमेधान् जारूथ्यान् निरर्गलान् सः आजह्रे।

tataḥ devarṣisahitaḥ saritam gomatīm anu daśāśvamedhān jārūthyān nirargalān saḥ ājahre.

English Translation

Then, along with celestial saints alongside the Gomatī river, he offered ten Aśvameghas in which three kinds of dakṣiṇā were freely given.

— २० —

०३ २७६

असतो मा सद्गमय।
तमसो मा ज्योतिर्गमय।
मृत्योर्मामृतं गमय॥
ॐ शान्तिः शान्तिः शान्तिः॥

०३ २७६ ००१

शास्त्र - *śāstra*

मार्कण्डेय उवाच।
एवमेतन्महाबाहो रामेणामिततेजसा।
प्राप्तं व्यसनमत्युग्रं वनवासकृतं पुरा॥

mārkaṇḍeya uvāca.
evametanmahābāho rāmeṇāmitatejasā.
prāptaṃ vyasanamatyugraṃ vanavāsakṛtaṃ purā..

अन्वय - *anvaya*

महाबाहो एवम् रामेण अमिततेजसा प्राप्तम् एतद् व्यसनम् अत्युग्रम् वनवासकृतम् पुरा।

mahābāho evam rāmeṇa amitatejasā prāptam etad vyasanam atyugram vanavāsakṛtam purā.

English Translation

Mārkaṇḍeya said: O, one with long arms! This fierce disaster was obtained by the unboundedly glorious Rāma in this way, having lived in the forest earlier.

०३ २७६ ००२

शास्त्र - *śāstra*

मा शुचः पुरुषव्याघ्र क्षत्रियोऽसि परंतप।
बाहुवीर्याश्रये मार्गे वर्तसे दीप्तनिर्णये॥

mā śucaḥ puruṣavyāghra kṣatriyo'si paraṃtapa.
bāhuvīryāśraye mārge vartase dīptanirṇaye..

अन्वय - *anvaya*

मा शुचः पुरुषव्याघ्र। क्षत्रियः असि परंतप। बाहुवीर्याश्रये मार्गे दीप्तनिर्णये वर्तसे।

mā śucaḥ puruṣavyāghra. kṣatriyaḥ asi paraṃtapa. bāhuvīryāśraye mārge dīptanirṇaye vartase.

English Translation

O tiger amongst men! Do not lament. O destroyer of enemies! You are a Kṣatriya. You stand on the path of brilliant resolution and dwell on the strength of arms.

०३ २७६ ००३

शास्त्र - *śāstra*

न हि ते वृजिनं किंचिद्दृश्यते परमण्वपि।
अस्मिन्मार्गे विषीदेयुः सेन्द्रा अपि सुरासुराः॥

na hi te vṛjinaṃ kiṃciddṛśyate paramaṇvapi.
asminmārge viṣīdeyuḥ sendrā api surāsurāḥ..

अन्वय - *anvaya*

न हि ते वृजिनम् किंचित् दृश्यते परमण्वपि। सेन्द्राः अपि सुरासुराः अस्मिन् मार्गे विषीदेयुः।

na hi te vṛjinam kiṃcit dṛśyate paramaṇvapi. sendrāḥ api surāsurāḥ asmin mārge viṣīdeyuḥ.

English Translation

Even your minutest sin is not seen. Even the gods and demons including Indra, shall despair on this path.

०३ २७६ ००४

शास्त्र - *śāstra*

संहत्य निहतो वृत्रो मरुद्भिर्वज्रपाणिना।
नमुचिश्चैव दुर्धर्षो दीर्घजिह्वा च राक्षसी॥

saṃhatya nihato vṛtro marudbhirvajrapāṇinā.
namuciścaiva durdharṣo dīrghajihvā ca rākṣasī..

अन्वय - *anvaya*

संहत्य निहतः वृत्रः मरुद्भिः वज्रपाणिना नमुचिः च एव दुर्धर्षः दीर्घजिह्वा च राक्षसी।

saṃhatya nihataḥ vṛtraḥ marudbhiḥ vajrapāṇinā namuciḥ ca eva durdharṣaḥ dīrghajihvā ca rākṣasī.

English Translation

Having struck them, Vṛtra, the unconquerable Namuci, and the demoness Dīrghajihvā were killed by the bearer of Vajra, Indra, with the Maruts.

०३ २७६ ००५

शास्त्र - *śāstra*

सहायवति सर्वार्थाः संतिष्ठन्तीह सर्वशः।
किं नु तस्याजितं संख्ये भ्राता यस्य धनंजयः॥

sahāyavati sarvārthāḥ saṃtiṣṭhantīha sarvaśaḥ.
kiṃ nu tasyājitaṃ saṃkhye bhrātā yasya dhanaṃjayaḥ..

अन्वय - *anvaya*

सर्वशः सहायवति सर्वार्थाः संतिष्ठन्ति इह। भ्राता यस्य धनंजयः अर्जुनः किम् नु तस्य अजितम् संख्ये।

sarvaśaḥ sahāyavati sarvārthāḥ saṃtiṣṭhanti iha.
bhrātā yasya dhanaṃjayaḥ arjunaḥ kim nu tasya ajitam saṃkhye.

English Translation

All the objectives are accomplished here when there is help on all sides. What is

unconquered in the battle for whose brother is the conqueror of wealth, Arjuna?

०३ २७६ ००६

शास्त्र - *śāstra*

अयं च बलिनां श्रेष्ठो भीमो भीमपराक्रमः।
युवानौ च महेष्वासौ यमौ माद्रवतीसुतौ।
एभिः सहायैः कस्मात्त्वं विषीदसि परंतप॥

ayaṃ ca balināṃ śreṣṭho bhīmo bhīmaparākramaḥ.
yuvānau ca maheṣvāsau yamau mādravatīsutau.
ebhiḥ sahāyaiḥ kasmāttvaṃ viṣīdasi paraṃtapa..

अन्वय - *anvaya*

अयम् च बलिनाम् श्रेष्ठः भीमः भीमपराक्रमः। युवानौ च महेष्वासौ यमौ माद्रवतीसुतौ। एभिः सहायैः कस्मात् त्वम् विषीदसि परंतप।

ayam ca balinām śreṣṭhaḥ bhīmaḥ bhīmaparākramaḥ.
yuvānau ca maheṣvāsau yamau mādravatīsutau.
ebhiḥ sahāyaiḥ kasmāt tvam viṣīdasi paraṃtapa.

English Translation

And there is Bhīma, the best amongst the mighty, who possesses formidable power. And there are two great young archer sons of Mādri, Sahadeva and Nakula. O destroyer of enemies! With this help, why are you dejected?

०३ २७६ ००७

शास्त्र - *śāstra*

य इमे वज्रिणः सेनां जयेयुः समरुद्गणाम्।
त्वमप्येभिर्महेष्वासैः सहायैर्देवरूपिभिः।
विजेष्यसि रणे सर्वानमित्रान्भरतर्षभ॥

ya ime vajriṇaḥ senāṃ jayeyuḥ samarudgaṇām.
tvamapyebhirmaheṣvāsaiḥ sahāyairdevarūpibhiḥ.
vijeṣyasi raṇe sarvānamitrānbharatarṣabha..

अन्वय - *anvaya*

ये इमे वज्रिणः समरुद्गणाम् सेनाम् जयेयुः। त्वम् अपि एभिः महेष्वासैः सहायैः देवरूपिभिः विजेष्यसि रणे सर्वान् अमित्रान् भरतर्षभ।

ye ime vajriṇaḥ samarudgaṇām senām jayeyuḥ.
tvam api ebhiḥ maheṣvāsaiḥ sahāyaiḥ devarūpibhiḥ
vijeṣyasi raṇe sarvān amitrān bharatarṣabha.

English Translation

O scion of Bharata! They are those who can conquer the army of Indra along with Maruts. You also will win over all enemies in battle with these godly archer companions.

०३ २७६ ००८

शास्त्र - *śāstra*

इतश्च त्वमिमां पश्य सैन्धवेन दुरात्मना।
बलिना वीर्यमत्तेन हृतामेभिर्महात्मभिः॥

itaśca tvamimāṃ paśya saindhavena durātmanā.
balinā vīryamattena hṛtāmebhirmahātmabhiḥ..

अन्वय - *anvaya*

इतः च त्वम् एभिः महात्मभिः पश्य इमाम् हृताम् सैन्धवेन दुरात्मना बलिना वीर्यमत्तेन।

itaḥ ca tvam ebhiḥ mahātmabhiḥ paśya imām hṛtām
saindhavena durātmanā balinā vīryamattena.

English Translation

And here you and these magnanimous souls see her, who the strong and evil power-intoxicated Saindhava abducted.

०३ २७६ ००९

शास्त्र - *śāstra*

आनीतां द्रौपदीं कृष्णां कृत्वा कर्म सुदुष्करम्।
जयद्रथं च राजानं विजितं वशमागतम्॥

ānītāṃ draupadīṃ kṛṣṇāṃ kṛtvā karma suduṣkaram.
jayadrathaṃ ca rājānaṃ vijitaṃ vaśamāgatam..

अन्वय - *anvaya*

आनीताम् द्रौपदीम् कृष्णाम् कर्म सुदुष्करम् कृत्वा जयद्रथम् च राजानम् विजितम् वशम् आगतम्।

ānītām draupadīm kṛṣṇām karma suduṣkaram kṛtvā jayadratham ca rājānam vijitam vaśam āgatam.

English Translation

Having done the very difficult action, Kṛṣṇā Draupadi was brought back, and King Jayadratha was defeated and brought into control.

०३ २७६ ०१०

शास्त्र - *śāstra*

असहायेन रामेण वैदेही पुनराहृता।
हत्वा संख्ये दशग्रीवं राक्षसं भीमविक्रमम्॥

asahāyena rāmeṇa vaidehī punarāhṛtā.
hatvā saṃkhye daśagrīvaṃ rākṣasaṃ bhīmavikramam..

अन्वय - *anvaya*

रामेण वैदेही पुनराहृता हत्वा संख्ये दशग्रीवम् राक्षसम् भीमविक्रमम्।

rāmeṇa vaidehī punarāhṛtā hatvā saṃkhye daśagrīvam rākṣasam bhīmavikramam.

English Translation

Vaidehī was again brought back by Rāma, having killed the mighty ten-headed demon.

०३ २७६ ०११

शास्त्र - *śāstra*

यस्य शाखामृगा मित्रा ऋक्षाः कालमुखास्तथा।
जात्यन्तरगता राजन्नेतद्बुद्ध्यानुचिन्तय॥

yasya śākhāmṛgā mitrā ṛkṣāḥ kālamukhāstathā.
jātyantaragatā rājannetadbuddhyānucintaya..

अन्वय - *anvaya*

यस्य शाखामृगाः मित्राः ऋक्षाः कालमुखाः तथा जात्यन्तरगताः। राजन् एतद् बुद्ध्या अनुचिन्तय।

yasya śākhāmṛgāḥ mitrāḥ ṛkṣāḥ kālamukhāḥ tathā jātyantaragatāḥ. rājan etad buddhyā anucintaya.

English Translation

His friends were monkeys and black-faced bears, along with those who had gone to different genera. O King! Meditate with your intellect upon this.

०३ २७६ ०१२

शास्त्र - *śāstra*

तस्मात्त्वं कुरुशार्दूल मा शुचो भरतर्षभ।
त्वद्विधा हि महात्मानो न शोचन्ति परंतप॥

tasmāttvaṃ kuruśārdūla mā śuco bharatarṣabha.
tvadvidhā hi mahātmāno na śocanti paraṃtapa..

अन्वय - *anvaya*

कुरुशार्दूल भरतर्षभ तस्मात् त्वम् मा शुचः। त्वद्विधाः हि महात्मानः न शोचन्ति परंतप।

kuruśārdūla bharatarṣabha tasmāt tvam mā śucaḥ. tvadvidhāḥ hi mahātmānaḥ na śocanti paraṃtapa.

English Translation

O tiger amongst Kurus! O chief of Bharata! Therefore, Do not lament. O destroyer of enemies! High-minded souls like you do not grieve.

०३ २७६ ०१३

शास्त्र - *śāstra*

वैशंपायन उवाच।
एवमाश्वासितो राजा मार्कण्डेयेन धीमता।
त्यक्त्वा दुःखमदीनात्मा पुनरेवेदमब्रवीत्॥

vaiśaṃpāyana uvāca.
evamāśvāsito rājā mārkaṇḍeyena dhīmatā.
tyaktvā duḥkhamadīnātmā punarevedamabravīt..

अन्वय - *anvaya*

एवम् आश्वासितः मार्कण्डेयेन धीमता अत्यजत् दुःखम् राजा अदीनात्मा।

evam āśvāsitaḥ mārkaṇḍeyena dhīmatā atyajat duḥkham rājā adīnātmā.

English Translation

Vaiśampāyana said: Being encouraged this way by the intelligent Mārkaṇḍeya, the King, undepressed in spirit, abandoned his sorrow.

असतो मा सद्गमय।
तमसो मा ज्योतिर्गमय।
मृत्योर्मामृतं गमय॥
ॐ शान्तिः शान्तिः शान्तिः॥